वि.सं.२०७१
वर्ष : ३
अङ्क : १

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो निश्चे, निःश्रेयसपदप्रदा ।।

# श्री निःश्रेयसम्

## षाण्मासिक-पत्रम्

५

श्री निःश्रेयसम्
षाण्मासिक-पत्रम्
५

### वाचकवर्य
### श्रीयशोविजयविशेषाङ्कः

सम्पादकः
मुनिश्रीसम्यग्दर्शनविजयगणिः

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो निश्चे, निःश्रेयसपदप्रदा ॥

# श्री निःश्रेयसम्

षाण्मासिक-पत्रम्

५

वाचकवर्य
श्रीयशोविजयविशेषाङ्कः

संपादकः
मुनिश्रीसम्यग्दर्शनविजयगणिः

प्रकाशनप्रतिष्ठानम् :
जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।

।। ॐ ह्रीं श्री शंखेश्वरपार्श्वनाथाय नमः ।।

।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।

।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।

# श्री निःश्रेयसम्

## षाण्मासिक-पत्रम्

## ५

### वाचकवर्यश्रीयशोविजयविशेषाङ्कः

✻ निमित्तम् ✻

**जैनशासनज्योतिर्धर पू.आ.श्री**

**विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी**

✻ आशीर्वाद प्रदानम् ✻

सुविशालगच्छनायक पूज्यपादाचार्यप्रवरश्रीमद् विजय पुण्यपालसूरीश्वराणाम्
प्रवचनप्रभावकपूज्यपादाचार्यप्रवरश्रीमद् विजय मुक्तिप्रभसूरीश्वराणाम्
वात्सल्यवारिधिपूज्यपादपंन्यासप्रवर श्रीमद् वज्रसेनविजयगणिवराणाम्

✻ प्रेरणादानम् ✻

प्रसिद्धप्रवचनकार गुरुदेव पूज्यपादाचार्यप्रवरश्रीमद् विजय श्रेयांसप्रभसूरीश्वराणाम्
प्रवचनकुशल पूज्यपादाचार्यप्रवरश्रीमद् विजय हेमप्रभसूरीश्वराणाम्

✻ सम्पादनम् ✻

पूज्य मुनिप्रवरश्री सम्यग्दर्शन विजय गणिवरः

✻ संशोधनम् ✻

पू. साध्वीश्री प्रशमनिधिश्रीः
पं.श्री अमृतभाई पटेलः

✻ प्रकाशनम् ✻

**वैक्रमीय २०७१, पोषशुक्लत्रयोदशी, शनिवार, दि.३-१-२०१५** **प्रतयः ७५०** **मूल्यम् : २००**

---

**आभारः....अनुग्रहः....अनुमोदनम्....**

प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजयश्रेयांसप्रभसूरीश्वराणामुपकारस्मृत्यर्थम्
एकेन गुरुभक्तपरिवारेण अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति...

**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य**

**सञ्चालकगणः अहमदाबादः**

# प्रणामोऽस्तु सततम्...

ऐन्द्रपूजितभगवन्तं, भगवद्वचनं, भगवद्वचनप्रकाशकसूरिवरं भगवद्वचनसंसाधकमुनिवरं, भगवद्वचनश्रद्धालुश्च संपश्य मनः रोमाञ्चक-ञ्चुकमाबिभ्रति।

तेषामेव प्रभावतः जैनेन्द्रवचनप्रकाशनस्य कार्यमिदमस्माकं संभवति नान्यथा। तद्वचनप्रकाशनस्य प्रवाहे श्रीनिःश्रेयसस्य पञ्चमाङ्के न्यायाचार्य-न्यायविशारद-कूर्चालसरस्वति-निष्प्रतिपक्षप्रतिभासंपन्न-टंकशालीवचन-प्रणेता-"आगमशाख" "शास्त्रवचनं" वेति प्रसिद्धिसंप्राप्त- तार्किक-शिरोमणि-साहित्यालङ्कार-छन्द-योगा-ध्यात्माचार चारित्रोपदेशा-दिमर्मवेत्ता-महामहोपाध्यायश्रीयशो-विजयवाचकानां विशेषाङ्क-प्रकाशनस्य प्रयत्नोऽयमस्माकम् सफलीभवतु।

विद्वद्वर्याणां प्रणामोऽस्तु सततमस्माकं विज्ञप्तिश्च विशोधयन्तु क्षतयः, दर्शयन्तु नवीनभावाः, प्रसाधयन्तु शुभदृष्ट्या।

नास्माकं प्रज्ञापटुता, तथाऽपि दीक्षायुगप्रवर्तकपरमगुरुदेवानां सत्कृपां संप्राप्य तदुपरिप्रीतिभक्तिभावितधिया परमसामर्थ्यस्य सञ्चयं कृत्वा "**कार्यं साधयामि देहं पातयामीति** प्रणिधानेन सफलारम्भोऽस्माकम् ।

प्रेषयन्तु सज्जनाः!
स्वाभिप्रायं स्वमनीषया स्वाभिप्रेतं स्वहस्तेन ।
मङ्गलं सततं भवतु सर्वत्र
जैनेन्द्रशासनस्य जैनेन्द्रवचनस्य च ।

**सं.: २०७१** | **-श्रीविजयहीरसूरीश्वरश्रुतज्ञानभवनम्**
**पोष कृष्ण दशमी,** | **मुख्यसञ्चालकः दिनेशजैनः**
**बुधवार, दि.३१-१२-२०१४** | **अहमदाबाद (गूर्जरदेशः)**

# 'अहो! मे परमं भाग्यम्!'

ऐंकारबीजमन्त्रप्रारब्धाऽनेकग्रन्थाः, सिद्धसारस्वताः, बहुश्रुतसङ्घधुरन्धराः, कूर्चालशारदाः, न्यायाचार्याः, न्यायविशारदाः, वादिविजेतारः, प्राप्तगुर्वनुग्रहाः, स्वविशेषणेनैव प्रसिद्धाः, महामहोपाध्यायाः श्रीमद्यशोविजयपूज्याः नैकगुणकमलसौरभेण मम मनो मधुकरं सज्जनमनोभ्रमरनिकरञ्च प्रीणयन्तितमाम्।

तत्र तेषां १) गुणप्रकर्षः २) प्रचण्डप्रतिभा ३) प्रभुप्रीतिश्च गुणरागिजनहृदयं नितरां समाकर्षति।

यद्यपि तत्रभवतां पूज्यानां गुणवर्णनं मादृशमन्दजनकृतं उपहासास्पदम्, तथापि साम्प्रतं परमपुण्योदयप्राप्तगुणगानक्षणं कथमुत्सृजामि? तैः **गुणप्रकर्षः** प्राप्तस्तत्र प्रथमं कारणं गुरुसमर्पणम्। गुरुणां प्रीति-भक्ति-वचोऽनुसरणेन तैरगण्यगुण-संपल्लब्धा। **प्रचण्डप्रतिभया** तैः त्रिविधं कार्यं कृतम्। स्याद्वादेन सन्मार्गमण्डनं, तर्क-युक्तिभिः कुमार्गखण्डनं, नयभेदैः विद्वज्जनशङ्कास्पदतत्वानां समन्वय इति।

**प्रभुप्रीतिस्तु** तेषु योगिराजानन्दघनमहात्मनां सम्मीलनेन परमप्रकर्षवत्यभवत् सा तेषां नैकगीर्वाणगूर्जरगिरानिबद्धागण्यकृतिषु प्रोल्लसतितराम्-तथाहि :-

✍ **भवान् भानु र्भूत्वा हृदयकमलं स्मेरयतु मे!**
**द्विरेफः पर्याप्तं तदनु वसतिं तत्र कुरुतात्।**
**सुधांशुः सन्नस्मिन् किरणनिकरैर्वर्षतु ततो।**
**न याचे त्वामन्यत् किमपि भगवन् भक्त्यधिकृतेः ।।**

प्रीतिसमुत्थभक्तिवशेन प्रभुसमक्षं सर्वस्वं समर्पयन्तः दासानुदास्यं दर्शयन्तश्च ते प्रार्थयन्ते यथा-

✍ **पिता त्वं बन्धुस्त्वं त्वमिह नयनं त्वं मम गति।**
**स्त्वमेवासि त्राता त्वमसि च नियन्ता नतनृपः ।।**
**भजे नान्यं त्वत्तो जगति भगवन् दैवतधिया ।**
**दयस्वातः प्रीतः प्रतिदिनमनन्तस्तुतिसृजम् ।।**

गूर्जरगिरायामपि-

✍ **'मेरे मनतो तुंहि रुचत है परे कुण पर के लारि.**
**तेरे नयन की मेरे नयन में 'जस' कहे दीयो छबी अवतारी....**

✍ **प्राण से अधिक सांई, कैसे कहुं प्राण,**

**प्राणथी अभिन्न दाख्यो, प्रत्यक्ष प्रमाण....**

✍ **में कीनो नहि तुम बिन औरशुं राग.....**

इत्यादिविविधभावभङ्गिभिस्ते प्रभुप्रीतिं भक्तिञ्च प्रकटयामासुः तत्सद्गुण-कार्मणचूर्णेन समाकृष्टेषु तत्समकालीनविद्वद्हृदयेष्वपि तेषामप्रतिमस्थानमासीत् तत् तैः कृतासु गुणस्तुतिषु व्यक्तीभवति–यथाहि

**धर्मसङ्ग्रहे मानविजयगणिवरैः** प्रोक्तं यद्–

सत्तर्ककर्कशधियाखिलदर्शनेषु, मूर्धन्यतामधिगतास्तपगच्छधुर्याः ।
काश्यां विजित्य परयूथिकपर्षदोग्र्या, विस्तारितप्रवरजैनमतप्रभावाः ।।
तर्कप्रमाणनयमुख्यविवेचनेन, प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः ।
चक्रु**र्यशोविजय**वाचकराजिमुख्या, ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः ।।

इत्थं तत्कालीनानेकस्थवीरविद्वद्संयमीनां चेतांसि चन्द्रमोवत् आह्लादयन्तः पूज्या अद्यापि विबुधबोधप्रकर्षकारिणो भवन्ति । तेषां गुरुस्तुतिक्षणं संप्राप्य मम हृदयं सततं मोदते।

प्रारब्धोऽयमुपक्रमो विशेषाङ्कस्य कविकुलदक्षपूज्यपादमुनिप्रवरश्री **प्रशमरतिविजय** प्रेरणया, प्रथम महामहोपाध्यायाणाञ्च विशेषाङ्कः, नव्यन्यायलब्धप्रतिभमुनिपुङ्गवश्री **कीर्त्तीन्द्रविजय** शुभप्रेरणया।

तत्र मे विज्ञप्तिः विद्वद्वरेण्यानां सज्जनानां निःसङ्कोचस्खलनानिदर्शनविषये। प्रसाधयतु मे मनः संतुष्टिः। शुभं भवतु जैनेन्द्रवचसामित्यलं विस्तरेण।

**- परमश्रद्धेय गुरुदेवश्रीमद्विजयश्रेयांसप्रभसूरीश्वर-**
**चरणसेवाहेवाकी गणिसम्यग्दर्शनविजयः**

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| यशोगुरुशरणम् । | मुनिश्रीसम्यग्दर्शनविजयगणिः। | १ |
| महामहोपाध्यायन्यायविशारदः। | आचार्यश्रीविजयभद्रङ्करसूरिः। | २ |
| परमात्मपञ्चविंशतिका। | आचार्यश्रीविजयकल्याणबोधिसूरिः। | ४ |
| सद्भूता भावाञ्जलिः। | पंन्यासप्रवरश्री यशोविजयगणिः। | २३ |
| बुद्धिप्रकर्षः, श्रद्धाप्रकर्षश्चैकत्र। | पंन्यासप्रवरश्रीमोक्षरतिविजयगणिः। | ३२ |
| यशोविजयवाचकाऽष्टकम्। | मुनिश्रीप्रशमरतिविजयः। | ३४ |
| यशोगुणगीता। | मुनिश्रीसम्यग्दर्शनविजयगणिः। | ३४ |
| वृत्तं यशोविजयवाचकपुङ्गवानाम्। | मुनिश्रीसम्यग्दर्शन विजयगणिः। | ३६ |
| वाचकजसविजयवचनमौक्तिकानि। | मुनिश्रीआत्मदर्शन विजयः। | ४३ |
| यशोविजयानां नयोपदेशः। | मुनिश्रीतीर्थबोधिविजयः। | ५२ |
| महोपाध्यायानां माहात्म्यम्। | मुनिश्रीरत्नबोधिविजयः। | ५८ |
| वदन्ति के किम्। | मुनिश्रीप्रियङ्करप्रभविजयः। | ७४ |
| यशोविजयस्य यशःकीर्त्तिः। | मुनिश्रीज्ञानभूषणविजयः। | ८१ |
| महातेजाः महाविभूतिः। | मुनी पुण्डरीक-पुनितप्रभविजयौ। | ८३ |
| यशोविजयवन्दना। | मुनिश्रीप्रशमरक्षितविजयः। | ८६ |
| ग्रन्थकाठिन्याच्चित्तस्थैर्यं खलु। | मुनिश्रीप्रशमरक्षितविजयः। | ८८ |
| भारति प्रत्यक्षम्। | मुनिश्रीदिव्यदर्शन विजयः। | ९० |
| वैराग्यत्रैविध्यम्। | सा.श्री क्षमानिधिश्रीः। | ९३ |
| प्रचण्डप्रतिभापतिपुरुषोत्तमपरिचयांशः। | सा.श्रीविरागदर्शनाश्रीः। | ९७ |
| स्तवनानुवादः। | सा.श्रीविरागदर्शनाश्रीः। | १०० |
| उद्देशलक्षणविचारः। | सा.श्रीनम्रगिराश्रीः। | १०२ |
| परमानन्दपयोनिधिवाचकवर्याः। | सा.श्रीप्रशमनिधिश्रीः। | १०७ |
| उपदेशरहस्यग्रन्थस्य व्याख्यासङ्ग्रहः। | श्रेयःशिशुः। | ११० |
| न्यायविशारदस्य स्याद्वादस्रोतः। | सा.श्रीव्रतरक्षिताश्रीः। | १२३ |
| अमृतवेलद्वात्रिंशिका। | पं.अमृतपटेलः। | १२७ |
| सम्मीलनम्। | राजेन्द्र एस. संघवी। | १४४ |

# यशोगुरुशरणम्

-*मुनिश्रीसम्यग्दर्शनविजयगणिः

(तर्जःविनय! विधीयताम् रे श्रीजिनधर्मशरणम्...)

**विनय! विधीयतां रे, श्री सद्गुरुवरशरणम्;**

**भवदुःखं दह्यतां रे, कुरु शाश्वतसुखस्मरणम्।**

चरणरथं यो नित्यं वहति, गुणनिकरश्चाऽदीनः;

जननमरणदशामपनेतुं, वहति निजगुणमहीनः। ॥१॥

जनकजननीसहोदरवद् यःप्रेमामृतरसपूर्णः;

गुरुर्मम त्राणं मन्त्रं तन्त्रं, मोक्षाकर्षणचूर्णः। ॥२॥

समिति-गुप्ति-महाव्रत-धीरः; कुमत-धूली समीरः;

गुरुवरः सागरवरगंभीर; गुरुगुणवल्लिकीरः। ॥३॥

गुरुर्मम नयनं, गुरुर्मम शरणं, गुरुमर्म हृदयाधारः;

गुरुर्मम ज्ञानं, गुरुमर्म ध्यानं, गुरुराट् भवदुःखविदारः। ॥४॥

परमपदपथि गुरुवरशरणं, पथ्यदनं निर्मिथ्यम्;

**सम्यग्दर्शन**मर्पयति यत्, **श्रेयस्करं** गुणतथ्यम्। ॥५॥

---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

# महामहोपाध्यायन्यायविशारदः

**-*आचार्यश्रीविजयभद्रङ्करसूरिः**

(वसन्ततिलकाछन्दः)

वन्दे यशोविजयवाचकवर्यधुर्यम्,
विद्यासुधाव्यसनिनं शमिनं सुचर्यम्।
श्रीमत्क्रियोद्धतिकृतौ विधृतैक्यधैर्यम्,
वादीभकुम्भदलने धृतसिंहशौर्यः ॥१॥

बाल्येऽपि बुद्धिबलतो निजमातरं यः,
भक्तामरस्तवनसंश्रवणे व्रतस्थाम् ।
पार्श्वे गुरोरधिकवृष्टिकृतोपवासां,
तद् श्रावणाद् विहितपारणकां चकार ॥२॥

ऐँकारजापमसकृत् सुकृताढ्यसाध्यम्,
गाङ्गे तटेऽतिशुचिमानसमानसेन ।
यो विश्वसारममितोद्धृतिमुख्यमूल्यम्,
श्रीजैनवाक्परमविस्तृतये चकार ॥३॥

---

* पू.आ.श्री.वि.भुवनतिलकसूरीश्वरशिष्यः।

पाठेऽतितीव्ररसमैक्ष्य गुरो: सुभक्त:,
प्रोचे गुरुं गुणगुरुं च भवान् सुशक्त: ।
श्रीहेमचन्द्रसदृशं निजशिष्यमेनं,
काशीं विहृत्य नवतर्कयुतं विधत्तां ॥४॥
'काशीं गतो गुरुवर: सह शिष्यकेन,
तर्के नवेऽध्ययनपारगतेरनु द्राग् ।
वादेऽथ वादिजगतो निपुणत्वपूर्वम्,
स्याद्वादनीतिनयमण्डनसत्यपुष्ट्या ॥५॥
न्याये विशारदपदं समबुद्धवर्गै:,
काश्यास्तदा जयभृते समदायि यस्मै।
वाण्यां वरं जयप्रदं नवतर्कसिद्धिं,
काश्या: प्रपद्य स यशोविजयो यशस्वी ॥६॥
अष्टोत्तरं शतमहो नवतर्कमिश्रान्,
गन्थाँस्ततोऽधिकगुणान् रचयाञ्चकार ।
योऽध्यात्म-योग-नय-काव्यमयान् समुच्चान्,
जीयाद् **यशो**विजयवाचकपुङ्गव: स: ॥७॥
विद्वद्यशोविजयवाचकपुङ्गवाय,
न्यायप्रसाधकगणेऽतुलरङ्गदाय ।
निर्मानिने वरमनस्विनृपूजिताय,
तस्मै नम: प्रतिदिनं कृतभूहिताय ॥८॥

प्रशस्ति:

**अनुष्टुभ्**-भुवनतिलकाचार्यवर्यपट्टभृता मया ।
कृतं **भद्रङ्करे**णेदं, श्री **यशोविजयाष्टकम्** ।

# परमात्मपञ्चविंशतिका

**(श्लोकवार्त्तिकम्)**

(मूलकाराः महोपाध्यायश्रीयशोविजयपादाः)

**- श्लोकवार्त्तिककाराः**

*** आचार्यश्रीविजयकल्याणबोधिसूरिः**

**वार्त्तिककाराणां मङ्गलाचरणम्**

**(उपजातिवृत्तम्)**

**श्रीवर्द्धमानं जिनवर्द्धमानं, सूरीन्द्रमेवं गुरुहेमचन्द्रम्।**
**प्रणम्य नम्यं रमणीयरम्यं, वक्ष्ये रहस्यं परमात्मसत्कम् ॥१॥**

**(इन्द्रवज्रावृत्तम्)**

**यः स्यात् परस्मात् परमः प्रकर्षात्, ज्ञेयः स आत्मा परमात्मरूपः।**
**ध्येयः स एवेह महावधानात्, सेव्यश्च भक्त्या परमत्वकामैः ॥२॥**

**(उपेन्द्रवज्रावृत्तम्)**

**महर्षिभिर्यत् कथितं स्वरूपं, महाप्रबन्धात् परमात्मसत्कम्।**
**कृपापरो न्यायविशारदोऽत्र, तदेव सङ्क्षेपत आह सम्यक् ॥३॥**

---

**मूलम् १) परमात्मा परं ज्योतिः, परमेष्ठी निरञ्जनः।**
**अजः सनातनः शम्भुः, स्वयम्भूर्जयताज्जिनः ॥**

**श्लो०वा०** अपकर्षो हि कालुष्यात्, पावित्र्याद्धि प्रकर्षता ।
परिशुद्धस्वरूपत्वात्, **परमात्मा**ऽभिधीयते ॥४॥

---

* पू.आ.श्री.वि.भुवनभानुसूरिसाम्राज्यवर्ती।

सापेक्षं सावधि स्वल्प-मपरं ज्योतिरुच्यते ।
विपरीतं **परंज्योति**ज्योतिर्यज्ज्योतिषामपि ॥५॥

क्षुद्रभूमिपरित्यागात्, पारम्यैकावलम्बनात्।
**परमेष्ठी** कथितोऽसौ, परमभावमास्थितः ॥६॥

रागो हि जायते तत्र, यत्राऽतत्तद्विलोकनम्।
तत्तद्विलोकनं यस्य, सदाऽऽस्ते स **निरञ्जनः** ॥७॥

कर्मबीजसमुच्छेदाज्जन्माङ्कुरवियोगतः ।
अपुनर्जन्मतां यातो, **ह्यज** इत्यभिधीयते ॥८॥

व्यय एव व्ययं नीते, नाश एव विनाशिते ।
स्वरूपसम्प्रतिष्ठायां, **सनातनो**ऽवशिष्यते ॥९॥

कल्याणरूपता शं स्यात्, तद् भवत्यधिगच्छति ।
यः सोऽभिधीयते **शम्भु**स्तन्निरुक्तिसमन्वयात् ॥१०॥

स्वयं भवति सम्बुद्धो, यो न परोपदेशतः ।
स **स्वयम्भू**रिति प्रोक्तस्तथागुणप्रकर्षतः ॥११॥

दुर्वारान्तररागादिरिपुनिर्जयसुन्दरः।
सोऽयं परमपुण्यात्मा, सदापि **जयताज्जिनः** ॥१२॥

यद्यपि जितकाश्येष, कृतकृत्यश्च सर्वथा ।
तथाप्येषा स्पृहा तत्त्वात्, स्वान्तःशत्रुजयस्पृहा ॥१३॥

तथानुभावतस्तस्य, तथाशयविशुद्धितः ।
**तथार्थनार्थिनां** दृष्टा, तथा फलवती दृढम् ॥१४॥

किञ्च स्वभाव एतस्य, यथाभूतो व्यवस्थितः ।
नमस्कारं प्रकुर्वाणस्तदेव कथयत्यथ ॥१५॥

---

**मूलम् २) नित्यं विज्ञानमानन्दं, ब्रह्म[1] यत्र प्रतिष्ठितम् ।**
**शुद्धबुद्धस्वभावाय, नमस्तस्मै परात्मने ॥**

---

१.तुलना - नित्यं विज्ञानमानन्दं ब्रह्म-बृहदारण्यकोपनिषदि ३-९-२८

श्लो०वा० कल्पान्तपवना वान्तु, यान्तु चैकत्वमर्णवाः ।
यस्मादस्य क्षतिर्नास्ति, **नित्य**मेतदतो मतम् ॥१६॥
एवंविधं हि **विज्ञान**-मानन्दं ब्रह्म चापि हि ।
प्रकर्षेण स्थितं यत्र, परमात्मा स इष्यते ॥१७॥
उपरागप्रकल्पं हि, ज्ञानमात्रं मतं मतैः ।
आत्मपरिणतिप्राप्तं, **विज्ञान**मभिधीयते ॥१८॥
कुङ्कुमस्य यथा भार, ऊष्ट्रस्य नोपयुज्यते ।
ज्ञानमात्रं तथैवेह, नात्मन उपयुज्यते ॥१९॥
यत्किञ्चिद्गोचरो बोधो, यदि वा ज्ञानमुच्यते ।
सर्वविषयको बोधो, **विज्ञान**मिति कथ्यते ॥२०॥
निरवच्छिन्नविज्ञानविभूत्येकविभूषितम् ।
यत्स्वरूपं स एव स्यात्, परमात्मेह नापरः ॥२१॥
आनन्दं यन्निजं रूपं, परमसौख्यलक्षणम् ।
स्वतः स्फुरति तत् कृत्स्ने, पररूपे विरेचिते ॥२२॥
अपेक्षैव ह्यनानन्द, आनन्दस्तद्विमुक्तता ।
अपेक्षातन्तुविच्छेदान्नानन्दान्यत्तु शिष्यते ॥२३॥
स्वगुणपोषकं तत्त्वं, **ब्रह्म** ब्रह्मविदां मतम् ।
बृंहकत्वात्मकं यस्मात्, समेत्यत्र निरुक्तकम् ॥२४॥
एवंविधस्वरूपत्वाद्, व्यतिरिक्तवियोगतः ।
परमात्माभिधं तत्त्वं, **शुद्धबुद्धस्वभावकम्** ॥२५॥
द्रव्यभावैकसङ्कोचः, स्वावध्युत्कृष्टवेदनम् ।
नमस्कारः स एष स्याच्छ्रेयान् परात्मगोचरः ॥२६॥
पुण्यः पुण्याऽऽशयात् तस्माच्छुद्धिश्चित्तविशुद्धितः ।
परमात्मनमस्कारं, चकार **कृतिकृत्** कृती ॥२७॥
**सन्ततमप्य**तृप्तोऽसौ, पीयूषादिव संस्तवात् ।
प्रकारान्तरतः स्तौति, स्वरूपं परमात्मनः ॥२८॥

मूलम् ३) **अविद्याजनितैः सर्वै र्विकारैरनुपद्रुतः ।**

**व्यक्त्या शिवपदस्थोऽसौ, शक्त्या जयति सर्वगः ।।**

श्लो०वा० विद्येति प्रोच्यते ज्ञानमविद्याऽज्ञानमुच्यते ।
तया रागादिरूपाणां, विकाराणां समुद्भवः ।।२९।।
रागादयो विकारा हि, **भवभ्रमणकारणम्** ।
दुःखाब्धौ धारणं ह्येते, मुक्तिसौख्यैकवारणम् ।।३०।।
तदुपद्रवमुक्तोऽसौ, तद्विकारविमुक्तितः ।
साप्यविद्यावियोगेन, सोऽपि विद्यैकयोगतः ।।३१।।
**नित्यं विज्ञान**मित्यादिग्रन्थतः स प्रसिद्धिमान् ।
अनुपद्रुतता चैवं, प्रसिद्धा परमात्मनः ।।३२।।
व्यक्तिः सा कथ्यते यस्यां, स्वप्रदेशैरवस्थितिः ।
व्यक्त्या शिवपदस्थोऽसौ, तत्स्वरूपं हि तत्र यत् ।।३३।।
लोकालोकगतं ज्ञानं, यदस्याचिन्त्यशक्तिकम् ।
परमात्मा ततो ह्येष, शक्त्या जयति सर्वगः ।।३४।।
वचोपीदं वचोमात्रं, न परात्मस्वरूपगम् ।
**न्यायविशारदः** पूज्य, इति निरूपयत्यथ ।।३५।।

---

मूलम् ४) **यतो वाचो निवर्त्तन्ते, न यत्र मनसो गतिः ।**

**शुद्धानुभवसंवेद्यं, तद्रूपं परमात्मनः ।।**

श्लो०वा० विकल्पयोनयः शब्दा, विकल्पाः शब्दयोनयः ।
तत्त्वविचारणायां हि, नार्थान् शब्दाः स्पृशन्त्यपि ।।३६।।
तत्रापि परमार्थो यः, परमात्मेति सञ्ज्ञितः ।
कथं शब्दाः स्पृशेयुस्तं, शब्दातीतैकलक्षणम् ।।३७।।
सितं वाप्यसितं वापि, नीलं पीतं च रक्तकम् ।
यन्न वर्णातिगत्वेन, वर्णवाक् तत् कथं स्पृशेत् ? ।।३८।।
सुरभि खलु यन्नास्ति, दुरभि चापि नास्ति यत् ।

गन्धातीतस्वभावं तद्, गन्धवाणी स्पृशेत् कथम् ? ॥३९॥
मधुरं कटुकं तिक्तमम्लाद्यपि च नास्ति यत् ।
रसवाक् तत् कथं ब्रूयाद्, रसनातीतगोचरम् ? ॥४०॥
यन्नर्क्षं नापि च स्निग्धं, शीतं चोष्णं च नास्ति यत् ।
न मृदु कर्कशं वापि, स्पर्शवाक् तत् स्पृशेत् कथम् ? ॥४१॥
न वृत्तं नापि च त्र्यंसं, चतुरंसं न वाऽपि यत् ।
तदनित्यंस्थसंस्थानं[१], संस्थानवाक् स्पृशेत् कथम् ? ॥४२॥
रूपादिकं समालम्ब्य, वाक्प्रवृत्तिर्निरीक्ष्यते ।
रूपातीतं समाख्यातुं, प्रवर्त्तेत वचः कथम् ? ॥४३॥
वर्णाद्यतीतमप्येतद्, यदि स्याच्छब्दलक्षणम् ।
तदा शब्दाः प्रवर्त्तेरन्, किन्त्वेतत् तु विलक्षणम् ॥४४॥
प्राप्यमवाप्य तिष्ठन्ति, ह्यप्राप्यं प्रेक्ष्य गोचरम् ।
ततो वाचो निवर्त्तन्ते, निश्चित्य तदगोचरम् ॥४५॥
आस्तां वाचां प्रवृत्तिस्तु, **न तत्र मनसो गतिः ।**
अचिन्त्यो यत्स्वभावस्तन् मनोऽपि चिन्तयेत् कथम् ? ॥४६॥
[२]सर्वे स्वरा निवर्त्तन्ते, तर्को यत्र न विद्यते ।
गाहते न मतिर्यत्र, तद्रूपं परमात्मनः ॥४७॥
चक्षुर्ग्राह्यं यथा रूपं, श्रोत्रेण न हि गृह्यते ।
शुद्धानुभववेद्यः स, तथाऽन्येन न वेद्यते ॥४८॥
रागादिदोषदुष्टो योऽनुभवः प्राकृतात्मनाम् ।
अशुद्धोऽनुभवः स स्यात्, नातः परात्मवेदनम् ॥४९॥
रागादिदोषकालुष्यशून्यो योऽनुभवो भवेत् ।
शुद्धः सोऽनुभवो ज्ञेयः, परमात्मैकवेदकः ॥५०॥
कालुष्यात् कलुषावाप्तिः, पावित्र्याच्च पवित्रता ।
ददाति यत्तु यस्यास्ति, सुप्रसिद्धमिदं वचः ॥५१॥

---

१. अणित्थंत्थसंठाणे-पञ्चसूत्रे ॥५॥ २. सव्वे सरा नियट्टंति, तक्का जत्थ न विज्जइ, मई तत्थ न गाहिया-परमपावने श्री आचाराङ्गसूत्रे २-५-६ ।

शोध्यतां स्वानुभूति-[1]स्तदर्थश्चेत् परमात्मना ।
शुद्धानुभवसंवेद्यं, [2]यद्रूपं परमात्मनः ।।५२।।
परमात्मस्वरूपं यत्, स्पर्शाद्यतीतलक्षणम् ।
उदितं वदति साक्षात्, **कृतिकृदपि** तत् स्वयम् ।।५३।।

---

**मूलम्(५) न स्पर्शो यस्य नो वर्णो, न गन्धो न [3]रसश्श्रुतिः।**
**शुद्धचिन्मात्रगुणवान्, परमात्मा स गीयते ।।**

श्लो०वा० **ननु** स्पर्शाद्यतीतो हि, वन्ध्यासुतो यथेष्यते ।
तथैवैषोपि किं न स्यादिति चेदत्र कथ्यते ।।५४।।

---

**मूलम्(६) माधुर्यातिशयो यद्वा, गुणौघः परमात्मनः ।**
**तथाख्यातुं न शक्योऽपि, प्रत्याख्यातुं न शक्यते ।।**

श्लो०वा० यथा गुडादि**माधुर्यं**, मूको वक्तुमनीश्वरः ।
तथा तत् तत्त्वतो वक्तुं, वावदूकोप्यनीश्वरः ।।५५।।
अनुभवैकसंवेद्यं, यथा माधुर्यमप्यहो ।
परमात्म**गुणौघो** हि, वेद्यस्तथाऽनुभूतितः ।।५६।।
यथाख्यातुमशक्यं तन्, माधुर्यं न ह्यपोह्यते ।
परमात्मगुणौघोऽपि, तद्वदेव विलोक्यताम् ।।५७।।
स्पष्टमन्तः सदा साक्षात्, यः खलु प्रतिभासते ।
**स आख्यातुमशक्योऽपि, प्रत्याख्यातुं न शक्यते** ।।५८।।
अन्तः संवेद्यते यस्तु, परमानन्दनन्दनः ।
स आख्यातुमशक्योपि, प्रत्याख्यातुं न शक्यते ।।५९।।
चक्रवर्त्त्यपि यल्लाभाद्, द्रमकप्राय ईक्ष्यते ।
स आख्यातुमशक्योपि, प्रत्याख्यातुं न शक्यते ।।६०।।

---

१-२. हेतौ यत् तद् यतस्ततः ------अभिधानचिन्तामणौ (श्लो.१५३१) ।
३. से न सद्दे, न रूवे न गंधे न रसे न फासे, अरूविणी सत्ता---इति पञ्चसूत्रे ।।५।।

सुरासुरेश्वरैश्वर्यं, न किञ्चिदिव यत्पुरः ।
स आख्यातुमशक्योपि, प्रत्याख्यातुं न शक्यते ।।६१।।
त्रैलोक्यस्यापि साम्राज्यं, यत्पुरस्तात् तृणायते ।
स आख्यातुमशक्योपि, प्रत्याख्यातुं न शक्यते ।।६२।।
अन्यो वन्ध्यासुतो हन्त !, योऽसद्ग्रामाग्रणी ननु ।
परमात्मगुणौघस्तु, सत्सर्वस्वं न संशयः ।।६३।।
ननु च परमात्मेति, प्रसिद्धा बहवो यतः ।
ततः कोऽधिकृतो ज्ञेय, इति चेदत्र कथ्यते ।।६४।।

---

**मूलम्७) बुद्धो जिनो हृषीकेशः, शम्भुर्ब्रह्मादिपुरुषः ।**
**इत्यादि नामभेदेऽपि, नार्थतः स विभिद्यते ।।**

श्लो०वा० यस्य स्यात् परमो बोधः, केवलज्ञानसञ्ज्ञितः ।
**बुद्धो**यमुच्यते तत्त्वात्, परमात्मायमेव हि ।।६५।।
रागादिस्वान्तरारातिविजयलक्ष्मीवल्लभः ।
**जिन** इत्युच्यते तत्त्वात्, परमात्मायमेव हि ।।६६।।
हृषीकाणीन्द्रियाणीह, तद्वशीकारकारकः ।
**हृषीकेशो** भवेत् तत्त्वात्, परमात्मायमेव हि ।।६७।।
शमिति कथ्यते सौख्यं, यतस्तस्यास्ति सम्भवः ।
**शम्भुः** स गद्यते तत्त्वात्, परमात्मायमेव हि ।।६८।।
शरणागतसत्त्वानां, गुणबृंहणकृद् यतः ।
ततो **ब्रह्मे**ति स प्रोक्तः, परमात्मैव तत्त्वतः ।।६९।।
प्रकृष्टत्वात् प्रधानत्वान्मुख्यत्वाच्छ्रेष्ठभावतः ।
**आदिपुरुष** इत्युक्तः, परमात्मैव तत्त्वतः ।।७०।।
यथा [१]पानीयमबऽम्भः, प्रभृतिनामभेदतः ।
नार्थतो भिद्यते वारि, तत्त्वात्तदेकमेव यत् ।।७१।।

---

१. बहवो ह्यनुष्टुब्भेदाः, अतो न छन्दोभङ्गारेका विधेया ।

तथा **बुद्धजिनादीनां**, नाम्नां भेदेऽपि तत्त्वतः ।
अर्थस्य त्वेकभावेन, परमात्मैक एव हि ।।७२।।
तत्तद्गुणप्रधाना हि, तत्तदाख्या परात्मनः ।
अर्थतस्त्वेक एवैष, नामभेदो न किञ्चन ।।७३।।
ननु बुद्धादिरूपोऽयमिति यतोऽभिधीयते ।
परमात्मस्वरूपं तत्, स्पष्टमेव प्रतीयते ।।७४।।
एवं तत्तन्नयादेव, तत्स्वरूपावबोधतः ।
नागम्यं तत्स्वरूपं स्यादिति चेदत्र कथ्यते ।।७५।।

---

**मूलम्८) धावन्तोपि नया नैके, तत्स्वरूपं स्पृशन्ति न ।**
**समुद्र इव कल्लोलाः, कृतप्रतिनिवृत्तयः ।।**

**श्लो०वा०** कल्लोलो हि यथाम्भोधौ, गत्वा गत्वा निवर्तते ।
धावन्नपि नयः सर्वस्तथा ततो निवर्तते ।।७६।।
एको नयो हि बुद्धत्वं, द्वितीयो वीतरागताम् ।
आनन्दत्वं तृतीयस्तु, तुर्यः कल्याणरूपताम् ।।७७।।
पञ्चमो ब्रह्मरूपत्वं, षष्ठो ज्योतिःस्वरूपताम् ।
सप्तमो नित्यतां किञ्च, स्वयम्भूत्वं तथाऽष्टमः ।।७८।।
एवं प्रख्यापयन्तोऽस्य, स्वरूपं विविधा नयाः ।
यान्ति पारं न तस्येह, तदसम्भवभावतः ।।७९।।
आस्तां तत्पारयायित्वं, तत्त्वतो न स्पृशन्त्यपि ।
तत्स्वरूपं यतोऽत्यन्तमगम्यत्वं समास्थितम् ।।८०।।
नन्वेतदप्यगम्यत्वं, कथं नु परमात्मनः ?
कोऽत्र हेतुविशेषस्स्यादिति चेदिह गद्यते ।।८१।।

---

**मूलम्९) शब्दोपरक्ततद्रूपबोधकृन्नयपद्धतिः ।**
**निर्विकल्पं तु तद्रूपं, गम्यं नानुभवं विना ।।**

यावन्तो वचनाध्वानस्तावन्तो हि नया यतः ।
न शब्दमतिगम्य स्यान्नयमार्गः कदाचन ॥८२॥
तस्माच्छब्दोपरागेण, ह्युपरक्तं हि यद् भवेत् ।
तद्रूपं ज्ञापयन्त्यत्र, नयाः सर्वेऽपि नापरम् ॥८३॥
तस्माद् बुद्धस्वभावादिस्वरूपं परमात्मनः ।
ज्ञापयन्तोऽपि शब्दोपरक्तमेव गदन्ति ते ॥८४॥
सर्वशब्दातिगं यत्तु, विकल्पविसरातिगम् ।
परमात्मस्वरूपं तत्, कथं ब्रूयुर्नया ननु ? ॥८५॥
निर्विकल्पं मतं यस्मात्, स्वरूपं परमात्मनः ।
तस्मादनुभवेनैव, गम्यमेतन्न चान्यथा ॥८६॥
तत् तदेव समायातं, यत् पूर्वमुपपादितम् ।
शुद्धानुभवसंवेद्यं, स्वरूपं परमात्मनः ॥८७॥
रागद्वेषौ ततो मुक्त्वा, मुक्त्वा मोहं च सर्वथा ।
यत्नः सर्वात्मना कार्यः, शुद्धानुभवगोचरः ॥८८॥
न च [१]शास्त्रसमभ्यासमात्रादनुभवोद्भवः ।
इति तत्त्वं समाख्याति, क्षीरोदाहरणादथ ॥८९॥

---

**मूलम् १०) केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ?**
**स्तोकास्तत्त्वरसास्वादविदोऽनुभवजिह्वया ॥**

**श्लो०वा०** न दर्वीतो ग्रहादेव, क्षीरस्यास्वादनं यथा ।
किन्तु जिह्वानियोगेन, तथात्रापि विभाव्यताम् ॥९०॥
जिह्वया हि विना व्यर्था, दर्वी क्षीरभृता यथा ।
अनुभवं विना तद्वच्छास्त्रभृताऽपि कल्पना ॥९१॥
ननु तर्ह्येक एवास्तु, ह्यनुभवः कृतं परैः ।
तत एवार्थनिष्पत्तेरिति चेदत्र कथ्यते ॥९२॥

---

१. प्रभूताभ्यासः।

क्षीराभावे यथास्वादो, जिह्वामात्रान्न सम्भवी ।
तथा तत्त्वरसास्वादविधावपि विलोक्यताम् ॥९३॥
आदृतव्यमतः शास्त्रं, तत् तत्कल्याणकामिना ।
तदिदमुक्तमन्यत्र, **श्रीहरिभद्रसूरिणा** ॥९४॥

[१]परलोकविधौ शास्त्रात्, प्रायो नान्यदपेक्षते ।
आसन्नभव्यो मतिमान्, श्रद्धाधनसमन्वितः ॥९५॥
पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।
चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥९६॥
यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।
उन्मत्तगुणतुल्यत्वान्न प्रशंसास्पदं नृणाम् ॥९७॥
मलिनस्य यथाऽत्यन्तं, जलं वस्त्रस्य शोधनम् ।
अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥९८॥
शास्त्रे भक्तिर्जगद्वन्द्यै मुक्तिदूती परोदिता ।
अत्रैवेयमतो न्याय्या, तत्प्राप्यासन्नभावतः ॥९९॥
आद्यमतो हि सोपानं, शास्त्रमिह मतं मतैः ।
द्वितीयं कल्पनारूपमनुभवस्तृतीयकम् ॥१००॥
सोपानत्रितयेनैवमनेनावाप्यते द्रुतम् ।
तत्त्वरससमास्वादमुदद्वैतैकमन्दिरम् ॥१०१॥
तृतीयस्य वियोगे स्याद्, विकलमादिमद्वयम् ।
एतदेवात्र तात्पर्यं, सूक्ष्मदृष्ट्या निरीक्ष्यताम् ॥१०२॥
तत्त्वरससमास्वादफलो हि शास्त्रविस्तरः ।
तदभावे वृथैवैष, यथा नीरविलोडनम् ॥१०३॥
प्रेक्षाया अपि तीक्ष्णाया, एतदेव प्रयोजनम् ।
तदभावेऽफलैवैषा, यथा वन्ध्यानियोजनम् ॥१०४॥
शास्त्रमतः समादृत्य, समालम्ब्य च कल्पनाम् ।
अनुभवानुभावेन, तत्त्वरसं निपीयताम् ॥१०५॥

१. इतः ९५ तमपद्यतः ९९ तमं यावत् पद्यानि योगबिन्दुगतानि।

सोयं तत्त्वरसास्वादः, परमात्मगतिप्रदः ।
परमार्थामृतं तद् यदजरामरतावहम् ॥१०६॥
तत्त्वरससमास्वादो, यत्र यत्र भवेदिह ।
स स सर्वोऽपि मार्गस्स्यात्, पदस्य परमात्मनः ॥१०७॥
यतस्तत्त्वरसास्वादाज्जिताक्षत्वादियोगतः ।
परमात्माऽधिगम्येत, ह्येतदेव गदत्यथ ॥१०८॥

---

**मूलम् ११) जितेन्द्रिया जितक्रोधा, दान्तात्मानः शुभाशयाः ।**
**परमात्मगतिं यान्ति, विभिन्नैरपि वर्त्मभिः ॥**

**श्लो०वा०** यथैकस्य पुरस्याप्तिर्विभिन्नैरपि वर्त्मभिः ।
परमात्मपदावाप्तिरेवमेव हि दृश्यताम् ॥१०९॥
यथा ते सकलाध्वानस् तत्पुराध्वान एव हि ।
तथात्रापीक्ष्यतामेतत्, स्पष्टं निरूपयत्यथ ॥११०॥

---

**मूलम् १२) नूनं मुमुक्षवः सर्वे, परमेश्वरसेवकाः ।**
**दूरासन्नादिभेदस्तु, तद्भृत्यत्वं निहन्ति न ॥**

**श्लो०वा०** सेवको यः समासन्नो, यश्च दूरे व्यवस्थितः ।
सेवकौ तावुभौ ज्ञेयौ, यथाहुः सूरयोपि हि ॥१११॥
[१]यथैवैकस्य नृपतेर्बहवोऽपि समाश्रिताः ।
दूरासन्नादिभेदेऽपि, तद्भृत्याः सर्व एव ते ॥११२॥
सर्वज्ञतत्त्वाभेदेन, तथा सर्वज्ञवादिनः ।
सर्वे तत्तत्त्वगा ज्ञेया, भिन्नाचारस्थिता अपि ॥११३॥
ननु चाभेद एवायं, येषामसिद्धतां गतः ।
तेषां सर्वमिदं वाच्यमसिद्धमेव तत्त्वतः ॥११४॥
बुद्धमेवेह यो बौद्धः, शङ्करमेव शाङ्करः ।

---

१. अत्र ११२-११३ तमे पद्ये 'योगदृष्टिसमुच्चये'।

वैष्णवो विष्णुमेवेह, परमात्मेति मन्यते ।।११५।।
तेषां तद् भेदभावेन, मिथो हि परमात्मनाम् ।
दूरे तत्सेवकाभेदस्तदभेदोऽपि **नेति चेत्**? ।।११६।।
सत्यं, किन्तु विचारोऽयं, क्रियते तत्त्वदृष्टितः ।
नातात्त्विकविचारोऽस्य, बाधकः स्यात् कदाचन ।।११७।।
स एव परमात्मेह, बोधप्रधानदृष्टितः ।
उच्यते बुद्ध इत्येवं, नामान्तरेऽपि दृश्यताम् ।।११८।।
तस्मान्नामाग्रहं त्यक्त्वा, ज्ञानदृष्ट्या विलोक्यताम्।
तद्दर्शनं भवेदेवं, नान्यथेत्याह कण्ठतः ।।११९।।

---

मुलम् १३) **नाममात्रेण ये दृप्ता, ज्ञानमार्गविवर्जिताः ।**
**न पश्यन्ति परात्मानं, ते घूका इव भास्करम् ।।**

श्लो0वा0 प्रतिबध्येत विज्ञानं, नाममात्रेण दर्पतः ।
अर्थानुचिन्तनं यस्मात्, तत्र जातु न सम्भवि ।।१२०।।
ततश्चार्थोहवैकल्याद्, वाङ्मात्रप्रतिबन्धतः ।
न पश्यन्ति परात्मानमर्थरूपं व्यवस्थितम् ।।१२१।।
नामैव नामतत्त्वेन, ह्यर्थोऽर्थरूप आस्थितः।
तस्मादर्थं न पश्यन्ति, नाममात्रकृताग्रहाः ।।१२२।।
यथा घूका न पश्यन्ति, भासुरमपि भास्करम् ।
न पश्यन्ति परात्मानं, तथा नामैकमानिनः ।।१२३।।
आदेयो ज्ञानमार्गस्तज्, जिज्ञासुभिः परात्मनः ।
**न्यायविशारदो**ऽत्रैव, प्रोत्साहयति कोविदः ।।१२४।।

---

मूलम् १४) **श्रमः शास्त्राश्रयः सर्वो यज्ज्ञानेन फलेग्रहिः।**
**ध्यातव्योऽयमुपास्योऽयं, परमात्मा निरञ्जनः।।**

श्लो0वा0 शास्त्रलक्षमधीत्यापि, परात्मावगतो न चेत् ।

सोऽफलः सर्व आयासो, नभोरोमन्थवत् खलु ॥१२५॥
सर्वमेवेह विज्ञातं, विज्ञातपरमात्मनाम् ।
न किञ्चिदिह विज्ञातमज्ञातपरमात्मनाम् ॥१२६॥
एतच्छास्त्रफलं ज्ञेयमेतद् बुद्धिफलं तथा।
एतज् जन्मफलं चापि, यज् ज्ञानं परमात्मनः ॥१२७॥
ध्यातव्योयं प्रयत्नेन, तद् द्रव्यगुणपर्ययैः ।
मोहज्वरौषधं ह्येतत्, परस्मात् परमं [1]मतम्* ॥१२८॥
[2]कृतकृत्य उपास्योयं, स्यादाज्ञापालनात् पुनः ।
आज्ञा तु निर्मलं चित्तं, कर्त्तव्यं स्फटिकोपमम् ॥१२९॥
[2]ज्ञानदर्शनशीलानि, पोषणीयानि सर्वदा ।
रागद्वेषादयो दोषा, हन्तव्याश्च क्षणे क्षणे ॥१३०॥
[2]एतावत्येव तस्याज्ञा, कर्मद्रुमकुठारिका ।
समस्तज्ञानसारार्थसारभूतातिदुर्लभा ॥१३१॥
शास्त्रं तं ज्ञापयेत् सम्यग्, ज्ञानं ध्यानं समावहेत्।
ततोप्याज्ञासमायोगादुपास्योऽयं निरञ्जनः ॥१३२॥
नोपलेपोऽस्य रागस्य, नापि द्वेषस्य चास्ति यत्।
तच्छ्लेषयोग्यताभावात्, तत एष निरञ्जनः ॥१३३॥
एवं दोषविमुक्तत्वाद्, गुणसामग्र्ययोगतः ।
ज्ञानध्याननिषेवार्हः, परमात्मैव नापरः ॥१३४॥
दोषविमुक्ततैवैषा, शास्त्रोक्ता परमात्मनः ।
सद्वृत्तेन त्रिभिर्वृत्तैर्व्यक्तमेवाथ वर्ण्यते ॥१३५॥

---

**मूलम्(१५) नान्तराया न मिथ्यात्वं, हासो रत्यरती च न ।**
**न भीर्यस्य जुगुप्सा नो, परमात्मा स मे गतिः ॥**
**मूलम्(१६) न शोको यस्य नो कामो, नाज्ञानाविरती तथा ।**

---

१. प्रवचनसारे अर्थतः। २.योगसारे लेशभेदतः ।

**नावकाशश्च निद्रायाः, परमात्मा स मे गतिः ।**

मूलम् १७) **रागद्वेषौ हतौ येन, जगत्त्रयभयङ्करौ ।**
**स त्राणं परमात्मा मे, स्वप्ने वा जागरेऽपि वा ।।**

श्लो०वा० यदि तु दोषयुक्तोपि, परमात्मेति कथ्यते ।
सर्वोऽपि परमात्मा स्यात्, तदा तत्सचिवत्वतः ।।१३६।।
तस्माद् दोषविमुक्तत्वं, तल्लक्षणं समिष्यताम् ।
दशाष्टदोषमुक्तो यः, परमात्मा स एव हि ।।१३७।।
यत्र यत्र हि तन्मुक्तिः, स स मुक्तो न संशयः।
स स स्यात् परमात्माऽपि, **गङ्गा कस्येह पैतृकी ?** ।।१३८।।
निकुरम्बे हि दोषाणां, निःशेषतो विरेचिते ।
स्फुरद्गुणाद्भुतज्योतिः, परमात्मावशिष्यते ।।१३९।।
प्रादुर्भूतगुणग्रामः, साक्षात् सद्गुणविग्रहः ।
शरणीकरणीयोऽसौ, परमात्मैव नापरः ।।१४०।।
स गतिः स मतिर्मेऽस्तु, स प्राणास्त्राणमेव च ।
स एवास्तु च सर्वस्वं, **स्वप्ने वा जागरेऽपि वा** ।।१४१।।
प्रणिधानमिदं शुभ्रं, परमात्मैकगोचरम्।
तथाचिन्त्यानुभावेन, त्राणाद्येकनिबन्धनम् ।।१४२।।
प्रत्यूषं श्रेयसामेतदेतत् प्रत्यूहसङ्क्षयः।
सौख्यानाञ्च वशीकारः, स्वीकारः सर्वसम्पदाम् ।।१४३।।
प्रकारान्तरतोऽप्येवमन्यापोहनयाध्वनः।
लक्षयति **महामेधो**, लक्षणं परमात्मनः ।।१४४।।

---

मूलम् १८) **उपाधिजनिता भावा, ये ये जन्मजरादिकाः।**
**तेषां तेषां निषेधेन, सिद्धं रूपं परात्मनः।।**

श्लो०वा० यस्य जन्म जरा नापि, नापि रोगो मृतिश्च न।
तदिह परमं तत्त्वं, स्वरूपं परमात्मनः ।।१४५।।

दोषावरणयोर्द्वैतमुपाधिरुच्यते बुधैः।
'उप' आत्मसमीपे य, आहितोनादिकालतः ॥१४६॥
उपाधिभावतो भावो, यस्य यस्येह सम्भवी।
तस्य तस्य ह्यभावस्स्यान्नूनमुपाध्यभावतः ॥१४७॥
नाकारणं भवेत् कार्यं, नान्यकारणकारणम्।
अन्यथा न व्यवस्था स्यात्, कार्यकारणयोः क्वचित् ॥१४८॥
तस्मात् सकारणं जन्मप्रभृत्यत्र निरीक्ष्यताम्।
तस्यात्यन्तक्षयात् तस्याप्यात्यन्तिकश्च सङ्क्षयः ॥१४९॥
यत्र तत्सङ्क्षयस्तत्र, सिद्धं रूपं परात्मनः ।
विभावाभावभावे यत्, स्वभावस्यैव सम्भवः ॥१५०॥
अन्यापोहनयेनैवमुक्त्वा रूपं परात्मनः।
वस्तुवृत्त्याऽस्य यद् रूपं, तदाह **न्यायकोविदः** ॥१५१॥

---

**मूलम्१९) अतद्व्यावृत्तितो [१]भीतं, सिद्धान्ताः कथयन्ति तम् ।**
**वस्तुतस्तु न निर्वाच्यं, तस्य रूपं कथञ्चन ॥**

**श्लो०वा०** यथा निर्वाच्यता तस्य, तथोक्तं पूर्वमेव हि ।
'**धावन्तोऽपी**'ति ग्रन्थेन, न पुनस्तत् प्रतन्यते ॥१५२॥
एतामवाच्यतामेव, परमां परमात्मनः।
**न्यायविशारदः** पूज्य, आह विधान्तराश्रयात् ॥१५३॥

---

**मूलम्२०) जानन्नपि यथा म्लेच्छो, न शक्नोति पुरीगुणान् ।**
**प्रवक्तुमुपमाभावात्, तथा सिद्धसुखं जनः॥**

**श्लो०वा०** मार्गभ्रष्टो यथा राजा, म्लेच्छेनोपकृतस्ततः।
तमाकार्य पुरे बाढमुपचरितवानसौ ॥१५४॥
जातु प्रतिनिवृत्तः स, स्वकैः पृष्टः पुरीगुणान्।

---

१. ससाध्वसं यथा स्यात् तथेत्याशयः-क्रियाविशेषणमेतद्।

वने तदुपमाऽभावात्, वक्तुं शक्नोति नैव तान् ॥१५५॥
तथा जानन्नपि ज्ञानी, परमात्मसुखाम्बुधिम्।
तस्य निरुपमत्वेन, शक्नोति गदितुं न तम् ॥१५६॥
उपमयाऽभिधीयेत, ह्यशक्यं वक्तुमन्यथा।
यत् सर्वोपमाऽतीतमभिधीयेत तत् कथम्? ॥१५७॥
गुणप्रज्ञापनेनैव, द्रव्यं प्रज्ञाप्यते जनैः ।
रक्तो घटः, खरः शब्द, आम्रश्च मधुरो यथा ॥१५८॥
अवाच्यास्तु गुणा यस्य, वर्णाद्यतीतभावतः ।
तथा निरुपमत्वेन, द्रव्यं ज्ञाप्येत तत् कथम्? ॥१५९॥
तस्मात् सिद्धाभिधस्यास्य, गुणा हि परमात्मनः ।
सुखप्रभृतयः सर्वेप्यनिर्वाच्या इति स्थितम् ॥१६०॥
निरुपमस्वभावत्वं, तत्सुखस्य यदीरितम् ।
तदेव स्पष्टमाचष्टे, [१]**कूचार्लीयं सरस्वती** ॥१६१॥

---

**मूलम्(२१) सुरासुराणां सर्वेषां, यत् सुखं पिण्डितं भवेत् ।**
**एकस्यापि हि सिद्धस्य, तदनन्ततमांशगम्॥**

**श्लो०वा०** अतीत-वर्तमानाध्व-भविष्यदध्वगा हि ये ।
सर्वे सुरासुरास्तेषां, समस्तमपि यत् सुखम् ॥१६२॥
असत्कल्पनया तच्चेन्मिलितं स्यात् कथञ्चन ।
तन्नैकस्यापि सिद्धस्य, सुखस्यावाप्नुयात् तुलाम् ॥१६३॥
द्विगुणितमपि स्याच्चेन् न तुल्यं तत् तदाऽपि हि ।
न दशगुणितं चापि, न शतगुणितं ह्यपि ॥१६४॥
न लक्षगुणितं तुल्यं, न कोटिगुणितं ह्यपि।
कोटिकोटि गुणं चेत् स्यात्, तदापि न समानता ॥१६५॥
तदापि न सरूपं स्यादनन्तगुणितं यदा।

---

१. विशेषणं 'कूर्चालसरस्वती' इति उपाध्यायश्रीमद्यशोविजयानाम्।

[1]सर्वकालक्षणैरेतद्, गुण्यते चेत् तदाऽपि न ।।१६६।।

ततश्चेत् क्रियते वर्गः, पुनः पुनरनन्तशः।

तदाऽपि न तदाप्नोति, सिद्धसौख्यसदृक्षताम् ।।१६७।।

स्वयं वेद्यं हि तत् सौख्यं, सिद्धिसाधनयोगतः ।

[2]असिद्धो तन्न संवेत्ति, सम्यग् जात्यन्धवद् घटम् ।।१६९।।

सुखलक्षणपर्याय-मुक्त्वैवं परमात्मनाम् ।

तेषामन्येऽपि पर्यायाः, कथ्यन्ते **न्यायवादिना** ।।१७०।।

---

मूलम् २२) **अदेहा दर्शनज्ञानोपयोगमयमूर्त्तयः ।**

**आकालं परमात्मानः, सिद्धाः सन्ति निरामयाः ।।**

मूलम् २३) **लोकाग्रशिखरारूढाः, स्वभावसमवस्थिताः ।**

**भवप्रपञ्चनिर्मुक्ता, युक्तानन्तावगाहनाः ।।**

श्लो०वा० देह एव हि संसारस् तन्मुक्तानां **विदेहता** ।

दर्शनावरणध्वंसादनन्त**दर्शनेशता** ।।१७१।।

प्रतिबन्धकपार्थक्यादनन्तचित्समृद्धता ।

समासात् त्रितयं ह्येतत्, स्वरूपं परमात्मनाम् ।।१७२।।

दर्शनज्ञानसंवित्तिरुपयोगोऽभिधीयते ।

तन्मात्रमूर्त्तिरेतेषामतिरिक्तवियोगतः ।।१७३।।

साद्यनन्ता स्थितिर्यस्माद्, भवति परमात्मनाम् ।

कालः स्थास्यति यावद्धि, तावत् तेऽपि न संशयः ।।१७४।।

**सितं बद्धं** पुरा कर्म, यैस्तद् ध्मातं विनाशितम् ।

**सिद्धास्ते** ह्यभिधीयन्ते, परमात्मान एव ते ।।१७५।।

कृत्स्नकर्मक्षयान्मुक्तिरिति यन् मुक्तिरुच्यते ।

सिद्धा एव भवान्मुक्ता, मुक्ता सिद्धा हि नापरे ।।१७६।।

---

१. समयाऽभिधोऽयमविभागः कालः, लोकाभिमतक्षणमध्य एवासङ्ख्या व्यतिव्रजन्ति क्षणाः, आर्हतपरिभाषायां समयाः। २.एतदनुभवनापेक्षया बोध्यम्, नातो जीवन्मुक्तै र्व्यभिचारः।

भव एवामयस्तत्त्वाज्, जन्ममृत्युविकारवान् ।
रागादिवेदनोन्मुक्तास् तदभावे निरामया: ॥१७७॥
सर्वलोकशिरोभागे, प्राप्तास्तन्मुकुटोपमा: ।
पररूपनिकाराप्तस्वरूपसम्प्रतिष्ठिता: ॥१७८॥
[1]चातुरन्तो हि संसारो, भवप्रपञ्च उच्यते ।
निर्मुक्ता एत उच्यन्ते, तदात्यन्तिकमुक्तित: ॥१७९॥
अनन्तं ज्ञानमेतेषां, दर्शनमप्यनन्तकम्।
सौख्यमनन्तमेवैवं, वीर्यमनन्तमेव हि ॥१८०॥
एवं युक्ता: सदैतेषामनन्ता अवगाहना: ।
तस्मात् सुष्ठूदिता एते, युक्तानन्तावगाहना: ॥१८१॥
उक्तसर्वगुणापूर्णमुक्तलक्षणलक्षितम्।
यथाप्यते परात्मत्वं, तदेव कथयत्यथ ॥१८२॥

---

**मूलम्(२४) इलिका भ्रमरीध्यानाद्, भ्रमरीत्वं यथाश्नुते ।**
**तथा ध्यायन् परात्मत्वं, परमात्मत्वमाप्नुयात् ॥**

**श्लो०वा०** यथाविधं भवेद् ध्येयं, ध्याताऽपि स्यात्तथाविध: ।
तथाध्येयस्वभावोयं, तथास्वतुल्यतावह: ॥१८३॥
रागादिदूषितं ध्यायन्, रागादिविवशो भवेत् ।
कामुक: कामिनीं ध्यायन्, यथा कामैकविह्वल: [2]॥१८४॥
वीतरागमतो ध्यायन्, वीतरागो भवेद्, भवी ।
इलिका भ्रमरीभीता, ध्यायन्ती भ्रमरीं यथा ॥१८५॥
परमात्मा ततो ध्येय:, परमात्मपदार्थिभि: ।
एतदेव दृढीकुर्वन्, समुपसंहरत्यथ ॥१८६॥

---

१. नृ-नारक-देव-तिर्यग्-रूपचतुर्गतिक इत्यभिप्राय: ।
२.१८४-१८५ पद्ये योगसारत:॥ १/४२,४३॥

**मूलम् २५) परमात्मगुणानेवं, ये ध्यायन्ति समाहिता: ।**
**लभन्ते निभृतानन्दास् ते यशोविजयश्रियम् ।।**

**श्लो0वा0** तद्गुणध्यानतस्तत्त्वात्, ध्यानं तस्यैव जायते ।
समाधिसचिवं चैतत्, तन्मयत्वनिबन्धनम् ।।१८७।।
तद्गुणग्रामसंलीनमानसस्तद्गताऽऽशय: ।
तद्भावभावितो योगी, तन्मयत्वं प्रपद्यते [१]।।१८८।।
स एष निभृतानन्दलाभ उक्तसुखोदय:।
स एष कुन्दवृन्दाभशुभ्रयश:प्रथोदय: ।।१८९।।
[२]अन्तररातिवर्गस्य, स एष विजय: पर: ।
**यशोविजय**लक्ष्म्येवं, प्राप्यते प्राप्यसत्तमा ।।१९०।।
सर्वदु:खक्षयस्यैष, पन्था नान्योस्ति सञ्चर: ।
सर्वसुखागमस्यैष, मार्गो नान्यस्तु विद्यते ।।१९१।।
ताम्रं रसानुवेधेन, स्वर्णत्वमधिगच्छति ।
एतदुपनिषद्वेधाज्जीव: शिवत्वमृच्छति ।।१९२।।
**महोपाध्यायमुख्यस्य, श्रीयशोविजयस्य हि ।**
**पञ्चविंशतिका** सेयं, **परमात्माभिधायिनी** ।।१९३।।
तच्छ्लोकवार्त्तिकं ह्येतदर्थलेशप्रकाशकम्।
कृतं गुरुकृपां प्राप्य, [३]**सूरिकल्याणबोधिना** ।।१९४।।
यदत्र सौष्ठवं किञ्चित्, तद् गुरोरेव मे न हि।
[४]यदत्रासौष्ठवं किञ्चित्, तन्ममैव गुरोर्न हि ।।१९५।।
यदत्रोत्सूत्रितं किञ्चिदयुक्तं वाऽपि भाषितम् ।
तत् क्षमायाचनां कुर्वे, मिथ्या मे दुष्कृतं भवेत् ।।१९६।।
परमात्मैकसर्वस्वं, ज्ञात्वेदं परमार्थत:।
तदेव प्राप्नुयाद् विश्वं, फलमेतावदर्थये ।।१९७।।

१.१८८ तमं पद्यं ज्ञानार्णवे ।।३९-४१।। २. अन्त: + अराति:। ३. शुक्रसितद्वितीयायां नभोनयाम्बरनयने (२०७०) वैक्रमेऽब्दे श्रीपरिमलजैनसङ्घे। ३. सिद्धान्तबिन्दौ ।

# सद्भूता-भावाञ्जलिः

**-*पंन्यासप्रवरश्रीयशोविजयगणिः**

तत्रभवतां भवतां विदितमेवैतद्विचित्रचङ्क्रमचातुरीपरिचितरोचिष्णुक्रकचचक्रचर्याचारिण्यस्मिन् भवप्रपञ्चे प्रकृतिदुःसहनानाविधव्यथाप्रथापथात् सचेताः कोपि न पृथग् भवितुं तथा प्रयतमानोऽपि पृथग्भूत उपलभ्यते। प्रतिपलप्रपतत्परापत्पारमप्राप्नुवन्तो भियाऽभियन्त इतस्ततोऽभियान्तश्च नानोच्चावचयोनिषु न क्षणमपि सुखशय्यानिद्रामुद्रया क्रोडीक्रियन्ते केऽपि।

मन्मथमदमन्थरनाकनितम्बिनीनिकरकरचामरधीरसमीरशिशिरीकृतरत्नसिंहासनमध्यमध्यासीनमवनतसुरकराञ्जलिकलिकाविलसदुपवनायमानभुवनमण्डलाधीश्वरं सुरेश्वरमपि न जातु जहाति कार्मिकारिक्लेशावेशः। तदवधार्य्यते पर्याकुलयापि धिया आसुरेश्वरमाकीटकुलं च कर्मैवासुभृतां दुःखमिति तन्निवृत्तिरेव श्रेयसी।

तच्च दुःखं रागद्वेषदोषैः, ते च मिथ्याज्ञानेनेति मिथ्याज्ञानमेव सर्वानर्थपारावारनिमज्जननिदानमूर्धाभिषिक्तमिति मिथ्याज्ञानोन्मूलनायैव सपदि प्रवर्तितव्यं प्रेक्षावद्भिः।

* सकलसङ्घहितचिन्तकपूज्याचार्यश्रीभुवनभानुसूरीश्वरप्रशिष्यः, सुविशालगच्छाधिपति पूज्याचार्यश्रीजयघोषसूरीश्वरसाम्राज्यवर्त्ती, पद्ममणितीर्थोद्धारकपूज्याचार्यश्रीविश्वकल्याणसूरीश्वरशिष्यः। ज्ञानपञ्चमी वि.सं.२०७१ मयूरपूरी (मोरबी)

मिथ्याज्ञानग्रहग्रथिला हि मनुजा अनित्यदेहादौ नित्यात्मबुद्धिं विधाय, विधीयमानोपदेशमनालोच्य, परित्यज्य च देहानुकूलं स्वेष्टं परिभाव्य तत्र प्रवर्तमाना:, तदितरे तु तदितरदभिमत्य ततो निवर्तमाना:, पुण्यपापादिप्रभारं परिचिन्वाना:, दुष्पार दु:खक्लेशोर्मिकोटिसमाकुले नानाविधयोनिपर्याकुले संसारपारावारे निमज्जन्ति।

यथावद्विवेकसमालोकसमुत्सारिततमसश्च हेयोपादेयरागद्वेषविहीना:, सर्वतोऽप्रवर्तमाना, अखण्डामलव्यापकध्रुवस्वात्मनि निलीयमाना:, कर्माण्यसञ्चिन्वाना:, प्रारब्धबीजानि भेदज्ञानाग्निना भस्मसात्कृत्य जन्मान्यलभमाना न बध्यन्तेऽनर्थक-कर्मपाशकोटिभि: सम्पूर्णसुखसागरमग्ना निखिलोपाधिविनिर्मुक्ता: सुखमासते सिद्धशिलायामिति निरवधिनिरुपाधिकनिरुपमानन्दमभिनन्दयितुकामा: कामं प्रयतन्ते मिथ्याज्ञानं समूलमुन्मूलयितुमिति नात्र विप्रतिपत्तिलेशावकाश:।

सा च मिथ्याबुद्धिरनित्यदेहादौ नित्यात्मत्वावगाहिनी 'नाहं देहो न मे देहो देहभिन्नोऽहं हि चित्' इत्याद्यभियुक्ततरोक्ते: नितरां परिभावनया सर्वतोपचीयमानरसेन स्वात्मनि प्रबलोच्छलद्रसवशेन च कस्मिँश्चिद् धन्यक्षणे निबिडरागद्वेषनिचितग्रन्थिभेदत: समुपजायमानतीव्रानन्दपूर्णात्मसंवेदनेन नितरां निवर्तते ग्रीष्मोष्मकरकरकोटिसमभितप्ते भूतले प्रपतत्तोयांशवत्, प्रचण्डसिंहस्वनमाकर्ण्य प्रचलायमानक्षुद्रमृगयूथवत्, प्रचण्डांशु-माल्युदयत्रस्ततमोवद् वा।

अत: संसारचक्रचारमनभिलष्यद्भिरात्मैव तत्वतो जिज्ञास्य:। 'अहमात्मा' इत्याकृत्या साक्षात्कृत्याविषयीक्रियमाणोऽपि गौरोहमित्याद्यारोपितदेहाद्यभेदाव-गाहिप्रत्ययशततमोमलीमसदृष्टिभि र्लोकोत्तरमहामहिममहनीय: मनसोऽप्यगोचर: केवलात्मसंवेदनेनैव संवेद्योऽयमात्मा याथातथ्येनावगन्तुं शक्यते, न केवलेन्द्रिय-जन्यज्ञानेनेति विदितमेव विदुषां भवताम्।

आत्माऽज्ञानभवदु:खत्रस्तानसुभृतो विलोक्य करुणावरुणालय: तीर्थंकर आत्मज्ञानपथं स्पष्टं निरूपितवान्, बहवश्च सद्गुरुवर्या: तत्पथमुपलक्ष्य तं चानुसृत्यात्मज्ञानं च प्राप्य, "तदनन्तानन्दास्वादमेते दु:खत्रस्ता: सुखकाङ्क्षया इतस्ततो धावन्तोऽपि प्राप्नुवन्त्विति" करुणया तत्तज्जीवमुपलभ्य तत्तदनुरूपपथशतमन्तत आत्मज्ञान-लक्षणलक्ष्यवेधि समुपदर्शयामासुरिति तात्विकतत्तन्मार्गसमभिक्रमप्राप्तनिरवधि-स्वात्मानन्दा: जीवास्तान् तान् सद्गुरुवर्याननतीवादरभक्त्याभिनन्देयुरिति सहजमेव कृतोपकृतिप्रतिकृत्यभिव्यजनम्।

एतादृशसद्गुरुधोरणीधौरेयाः महोपाध्यायाः **श्रीयशोविजया** इति न विप्रतिपत्तिविषयम्। आत्मज्ञानसम्पन्ना योगीश्वराः, निखिलदुःखध्वंसोपायमजानानं, 'विष्ठासु शूकरवत्' तत्तदिष्टविषयप्राप्तावेव सुखमभ्युपगच्छन्तम्, अत एव तत्प्राप्तिव्याकुलतया मृगजलजन्यतृष्णाच्छेदकाङ्क्षाकारिजनवद् अतीव क्लिश्यमानं जनं समुपलभ्य, एते महोपाध्यायाः अनुपमाभिव्यक्तिकौशलसम्पादिताधरीकृतमधुमधुरत्वेन नितरामास्वादनीयानि मिथ्याज्ञानसमुच्छेदप्रत्यलानि वचनानि विरचय्यात्मार्थिनां सदा समुपास्याः, अप्रतिकार्योपकृतिवशेन अभिवन्द्याश्च सञ्जाता इति।

महत्वं हि देशकत्वाभिष्वङ्गि । देशकत्वञ्च न जनमनोरञ्जकदेशनाविधातृत्व-मात्रपर्यवसितम्, अपि तु आत्मज्ञानं प्रत्यवन्ध्योपायभूतप्रबलरुचिवीर्याद्युद्रेकापादक-निसर्गसुन्दराभ्रान्तपथप्रदर्शकवाङ्मयनिष्यन्दविधायित्वम्। यथा हि वचनं सघनम-पूर्वोल्लासापादकमर्थगम्भीरमात्मानन्दकारि भवति तथा तदुपदेष्टृणां महत्वं समीक्ष्यते, योग्यानामपि तथाविधगुणविरहितानामात्मज्ञानप्रापकप्रबलवीर्यरुच्याद्यापादकत्वस्या-न्यथानुपपत्ते :। न हि क्षुद्रः कदाचित् तथाविधवचननिष्यन्दं प्रयोक्तुं प्रत्यलो भवति, क्षुद्रादपि कदाचित् कस्यचिदिष्टसम्पत्तावपि तत्र तद्वचनस्य गौणत्वात्, तथाविधजीवयोग्यत्वस्यैव तत्र मुख्यनिदानत्वात्। तथाविधवचनं प्रत्यभिव्यक्तिकौशल्यस्य स्वकीयशुद्धेश्च कारणतया पुष्टि-शुद्धिमत्त्वं तत्प्रयोक्तृणां समभिवीक्ष्यत इत्यवदातम् । अभिव्यक्तिकौशल्यस्य पुण्यप्राप्यस्य सत्त्वेऽपि तथाविधशुद्धिविरहे आनन्दकत्वमधुरत्वादिकं वचसि संपद्यते, किन्तु न तथाविधमार्गप्राप्तिस्तत्प्रयाणोत्साह इत्यादिकं तथाविधं सम्पनीपद्यते। अतो मुमुक्षुभिः मधुरवाचनिकत्वमात्रेण न महत्त्वमङ्गीक्रियत, किन्तु तथाविधमार्गप्रदर्शकत्वान्तरोत्साह-जनकत्वादिवचोगुणंविभाव्यैव महत्त्वं सद्गुरुत्वञ्चाङ्गीक्रियत इति तीव्रमुमुक्षासम्पन्नस्य सद्भूतगुणज्ञत्वाभिव्यक्त्यान्तरावगमविशेषेण स्वयमवभासते।

बहूनि वचनानि तथाविधानि महोपाध्यायानां महत्त्वनिश्चायकानि, तथाप्यद्भुतः कश्चन एकश्श्लोकोभिवर्ण्यतेऽत्र, वचनस्तुत्या वाचकस्तुतेरवश्यम्भावात्, वस्तुतः वचनबहुमानेनैव वाचकस्य सद्भूतबहुमानोपपत्तेरिति। कृतिप्रीतिकारिकृतिकृतकृति ज्ञानसारे-उक्तम्-

**प्रत्याहृत्येन्द्रियव्यूहम्, समाधाय मनो निजम्।**

**दधच्चिन्मात्रविश्रान्तिम्, मग्न इत्यभिधीयते।।** [ज्ञानसारः २/१]

आन्तं मोक्षमार्ग एवात्र प्रदर्शितः, अहो कौशल्यम् । साधकवर्णनं च प्रकृते तथा

कृतं यथा साधनापि अभिव्यज्यते।

आत्मज्ञानं तेन च सिद्धत्वं काङ्क्षमाणैः, इदं हि अत्रोपदर्शितं कर्तव्यत्रयमवश्यं कर्तव्यम्।

**तत्र प्रथमं कर्तव्यम्-इन्द्रियप्रत्याहारः।**

**'ज्ञानस्य फलं विरतिः'** इति न्यायः, आत्मज्ञानपूर्वं कथञ्चित् परावृत्य, **'विरतेः फलं ज्ञानम्'** इत्येवं प्रयोक्तव्यः। इयमत्र भावना-

[१]आत्मज्ञानमिन्द्रियप्रत्याहार-[२]चित्तसमाधान-[३]चिन्मात्रविश्रान्तिभिः समवाप्यते। तत्रात्मज्ञानपथे प्रचिचलिषोरैदम्प्राथम्येन कर्तव्यं, स्वेन्द्रियनिरोधः, आदौ प्रयत्नसाध्योऽभ्यासवशेन च सहजः। न ह्यनिरुद्धेष्टानिष्टविषयजनितरागद्वेषवशेन्द्रिय-चाञ्चल्यम् तन्निरोधेच्छाविकलो जन आत्मज्ञानकथाश्रवणायापि योग्यः तत्तदिन्द्रियनिरोध-लक्षणविरतेः फलमात्मज्ञानमित्याशयेनोक्तं **'विरतेः फलं ज्ञानम्'** इति। एतादृशात्म-ज्ञानावाप्तावेव भवति समुचिता विरतिः = आत्मरमणतालक्षणचारित्ररूपेति सुष्ठूक्तं **'ज्ञानस्य फलं विरतिः'** इति तत्-तन्नयवशेन सर्वं समञ्जसम्।

जीवो ह्यनादिकालतो भ्रान्तिवशेन बाह्येष्टविषयेष्वेव सुखं मन्यमान इन्द्रियाणि व्यापारयति तत्-तदिष्टविषयेषु। किन्तु न जातुचिद् विषयसुखं सुखं भवितुर्महति, न हि विष्ठायामभिरतिं मन्वानस्य शूकरस्य तन्निमग्नता प्रशस्या कस्यचिद् विपश्चितः। तथैव न कदाचिदप्युत्कृष्टविषयसुखोपभोगोऽपि विष्ठोपभोगतुल्यतामतिशेते, बाह्यतो भेदोपलम्भेऽपि पुद्गलजनिताभिरतेरात्मविदामविशिष्टत्वात्। अत एवात्मानन्दप्राप्तिपुष्टाः विद्वांसः कदाचिदपि विषयोपभोगस्य सारत्वं न मन्यन्ते, तात्त्विकात्मानन्दप्राप्तौ विषयसुखस्य तुच्छत्वं निसर्गतो ज्ञायते, सहजा हि तन्निवृत्तिः सम्पद्यते, न हि तन्निवृत्तौ क्लेशोऽनुभूयते तस्य मानसिकोऽपि, अपि तु तत्प्रवृत्तौ महान् क्लेशः। न चोपदेशसाचिव्येनैतत्सम्पत्तिः, किन्तु स्वानुभवप्राप्त्या सहजा ह्येषावस्था तेषामुपदेशवैकल्येऽपि। वस्तुतः तुच्छमेव विषयसुखमिति निर्गलितोऽर्थः। आत्मज्ञानानवाप्तावपि तदभिमुखीभूतस्य जीवस्य बाह्यपदार्थप्रत्ययिकद्वन्द्वाः शिथिलीभवन्ति। सुखं न बहिरपित्वन्त इति नाभीत आविर्भवति कश्चनान्तर्नादः।

**"आत्माज्ञानभवं दुःखम्, आत्मज्ञानेन हन्यते"** [योगशास्त्र]

**"पारं तु प्रापयत्येकोनुभवो भववारिधेः"** [ज्ञानसार]

इत्याद्युक्तिपर्यालोचनेन स जीवः सम्यगवगच्छति, आत्मज्ञानं विना सर्वोत्कृष्टचारित्राचारपालनमपि कायक्लेशतां परमार्थतो नातिक्रामति, सद्गुरुसमागमं सम्प्राप्य जीव एतेषां वचनानां तात्पर्यं सम्यगवगम्य, तात्त्विकमोक्षमार्गं समुपलभ्य, मोक्षमार्गप्रवेशद्वारभूतं सम्यग्दर्शनं प्राप्तुमतीवोत्सहते। सम्यग्दर्शनं नाम निजनिर्विकल्पाखण्डानन्दपूर्णात्मसाक्षात्कार एव, न तु 'अर्हन् मम देवः, तदनुयायिनः अमुका मे गुरवः, अहिंसाद्यात्मको मे धर्मः' इत्यादिकथनमात्रेण सम्यग्दर्शनलाभ इत्यादिकं स सम्यग् श्रद्दधते।

फलतस्तदीया चित्तवृत्ति अन्तस्तत्त्वं प्राप्तुं सदा समुत्सुका भवति, तद्रसप्राबल्यवशेन अन्यविषयकरसाः स्वयमेव हानिं प्राप्नुवन्ति। भोजनादिषु रुच्यरुच्यादिविकल्पाः सुतरां हीयन्ते, इष्टानिष्टप्राप्तिपरिहारनिम्बन्धनां व्याकुलतां जीवः शनैः शनैः जहाति। स्वविषयं सम्प्राप्य तद्ग्रहणाय सदैव समुत्सुकानीन्द्रियाणि वृद्धत्वमनुभवन्त्यर्थात् झटिति तत्तद्विषयग्रहणाय न धावन्ति, कदाचिद् धावेयुरपि, तथापि न जीवस्तत्र रतिं विन्दते, किन्तु तस्य मनसि पश्चात्तापः प्रादुर्भवति–न हीन्द्रियजन्यं सुखं सुखं भवितुमर्हति, न वेन्द्रियजन्यं ज्ञानं मम स्वभावभूतम्, आत्मसमुत्थं सुखं ज्ञानमेव च मदीयम्, एतदवगम्यापि किमर्थं बहिरटाम्यहम्, किमर्थं नात्मनि निमज्जामि?। आत्मानन्दसमवाप्तये ग्रन्थिभेदोत्तरकालीनसम्यग्दर्शनप्राप्तये च किमर्थं नातीवोद्यच्छामि? किं भवभ्रमणखेदो नानुभूयते, किं पुनरप्यात्मसुखं विहायेन्द्रियसुखं समवाप्तुं नानाविधयोनिषु भ्रमणं काङ्क्ष्यते? श्रद्धत्स्व जीव! श्रद्धत्स्व, बाह्यजगति समवाप्यमानं यशःकीर्तिप्रतिष्ठादिकं न तवांशेनापि लाभकृत्, न वा बाह्यजनानां रोषतोषौ तवापायादिकारिणौ सम्भवत इति मा बाह्यविषयेषु रतिं विन्त्स्व मा शूकरो भव, हंसतुल्यो भव, आत्मानन्दमौक्तिकचारमेव चर, विष्ठातुल्यपुद्गलजन्यं सुखं मा बहुमन्यस्व, अतीवोत्कर्षत्वं प्राप्ता अपि पुद्गलाः पुद्गला एव, न तेषां समुद्भूतातिशायिसौन्दर्यशालित्वेपि पुद्गलत्वमपगच्छति, जडा हि पुद्गला न चैतन्यपिण्डं, मां लेशत आनन्दमाधातुं समर्थाः सन्ति, मम भ्रान्तिरेवेयं यत् तद्वशेन सुखं मन्ये।'' इत्यादिपश्चातापवशेन पुनः पुनरिष्टविषयेष्वभिरत्यादिकं निवर्तते।

जीवो ह्यात्मानन्दप्राप्तये एव बद्धलक्ष्योऽन्यत् सर्वं प्रत्यौदासीन्यं बिभर्ति, इन्द्रियाणि च तस्य निसर्गतो विषयादिकं प्रत्यरक्तद्विष्टानि सञ्जायन्ते। अयमेव हीन्द्रियप्रत्याहारः, रुच्यरुच्यादिपूर्वमिष्टानिष्टेषु धावदिन्द्रियाणां सम्यगवगमपूर्वं, न केवलमनोबलेन, तत्-तद्विषयादिकं प्राप्यापि क्षोभविरह एवेन्द्रियप्रत्याहारः। स च मुमुक्षूणामादिगुणः, न

ह्यप्रत्याहृतेन्द्रियो जीवो यथेष्टं इष्टानिष्टविषयेषु रुच्यरुचिपूर्वं प्रवर्तमानेन्द्रिय-प्रसारनिरोधमनादृत्य केवलज्ञानध्यानवशेनात्मज्ञानं प्राप्तुं समर्थो भवति। कदाचिद् बाह्यतस् त्यागाद्यदर्शनेपि तत्पक्षपात:, तदरुचिरित्यादिकं त्ववश्यं निवर्तते, पश्चातापोऽप्यान्तर: समुद्भवति, कदाचिदिष्टानवाप्तावपि मनो न तथा क्षोभमनुभवति। आत्मज्ञानप्राप्तये चेदमावश्यकम्, आत्मज्ञानप्राप्त्यनन्तरं कदाचिद् हीयमानोऽपीन्द्रियप्रत्याहार: स्यात्। तत्प्राप्तिपूर्वं तु निबिडग्रन्थिभेदकतीव्रपुरुषार्थवशेनायं वर्धमान: पराकाष्ठां च प्राप्तो भवति। आत्मज्ञानप्राप्तौ रुचिरेव मुख्या, तीव्रा रुचिरन्यसर्वरुचिहानिमापाद्यावश्यमात्मज्ञानं प्रापयति। मार्गोऽपि तीव्ररुचिवशेन स्वयं स्फुटो भवति, इयं रुचिरेवेन्द्रियप्रत्याहारं जनयति।

**द्वितीयं हि कर्तव्यम्-चित्तसमाधानम्।**

प्रत्याहृतेन्द्रियो जीव आत्मज्ञानसन्निधावभिसरन् चित्तसमाधानं चित्तस्थैर्यञ्चानु-भवति, उत्कृष्टसौन्दर्यशालिनोऽपि वस्तुन: पुद्गलत्वं परिभाव्य तद्विषयकरागादि-कमननुभवत् चित्तं समाहितं स्थिरं च भवति।

करिष्यामि करिष्यामि करिष्यामीति चिन्तया।
मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम्।।...

इत्यादिवचनपरिभावनया 'इदं करिष्यामि, इदं च करिष्यामि'इत्याद्याकारका: सङ्कल्पा:। इदं सम्यग्, इदं च ने'त्याद्याकारका विकल्पाश्च तादृशजीवस्य विनिवर्तन्ते। आत्मज्ञानं प्रत्यग्रे गच्छन् जीव:, आत्मनि लीनतामनुभवितुं चित्तस्थैर्यं काङ्क्षते, चित्तशुद्धे: कथञ्चित् प्राप्तत्वेन चित्तस्थैर्यप्राप्तौ तस्याधिकारित्वात्। श्वासोच्छ्वासादि-कमालम्ब्य तदान्तं जीवेन चित्तस्थैर्यमवश्यमासादनीयम्। एतदर्थं प्रत्यहमवश्यं नियतसमये नियतसमयावधि चित्तस्थैर्यार्थं प्रयतनीयम्। यथा हि सर्वोत्कृष्टेष्टावाप्तावनिष्टप्राप्तौ वा मन: क्षोभं नानुभवेत्, अपि तु सर्वेषामनित्यत्वपर्यालोचनया तत्तदिष्टानिष्टप्राप्तावपि स्वात्मन: सर्वथाऽस्पृष्टत्वविभावनया चित्तं माध्यस्थ्यमनुभवेत्, निर्मलत्वञ्चासादयेत् तथा प्रयतितव्यम्। चित्तं हि संवेदनशीलं कार्यम्, परपीडादर्शनमात्रेण स्वपीडावद् दु:खमनुभवच्चित्तं नवनीततुल्यमृदुतां परिस्पृशद्, मोक्षमार्गाभिसरणायावश्यकम्। तादृशं हि चित्तम्, अनन्यसरलतादिसम्पन्नं न कदाचिदप्यरतिमनानन्दतां वा स्पृशेत्, अपि तु सर्वावस्थासु सदैव नन्ददास्ते, इदमेव हि चित्तसमाधानमक्षुब्धचित्तवृत्तिलक्षणमवसेयम्।

**तृतीयं हि कर्तव्यम्-'चिन्मात्रविश्रान्ति:'।**

इदं हि कर्तव्यमावश्यकमतीवोपयोगि च। स्वरुपमहिम्ना ह्येतत् सम्भवति।

"नाहं देहो न मे देहो, नाहमिन्द्रियादिरूपः, अहं हि आत्माऽखण्डानन्दपूर्णः, परमसमाधिनिष्ठः, निर्विकल्पानन्तज्ञानसम्पन्नः यादृशो हि सिद्धात्मा, तादृशोऽहमिदानीमपिस्वभावतः, मदीयानन्दः निरवधिः, निरपेक्षश्च कश्चिदपि पुद्गलमनव्याप्यापि सदैव सहजं समुद्भवँश्च। न हि कदाचिदपैति सः, आत्यन्तिक एकान्तिकश्च सः। सैव हि काम्यः विदुषा, अनाद्यनन्तकालवर्तिसर्वोत्तमेन्द्रियसुखमनन्तसुरेश्वरचक्रवर्त्यादिसमनुभूतपुण्यप्रकर्षप्राप्यसुखसम्मिश्रितमपि नात्मानन्दलवमप्यतिशेते, अपि त्वात्मानन्दलवस्तादृशसर्वसुखमतिशेते। ज्ञानञ्चापि मम नेन्द्रियापेक्षम्, किन्तु सहजं, स्वसमुद्भवमेव..." इत्याद्यात्मस्वरूपविभावनया बाह्येषु सर्वेषु संयोगादिष्वौदासीन्यं भजन् जीवश्चिन्मात्रे=स्वकीयाखण्डात्मतत्त्वे चैतन्यपिण्ड उपयोगमये विश्रान्तो भवति, बहिर्घटमानः शुभाशुभः न कोप्युदन्तस्तं क्षोभयति, न वा तमासाद्य स क्षुभ्यति, तदीयनिःसारत्वानित्यत्वादिसमवगतेः, आत्मसुखास्वादस्य स्वाधीनत्वसम्पूर्णत्व स्वादुतमत्वसारत्वसम्प्रतिपत्तेश्च।

चिन्मात्रविश्रान्तिर्हि तथाविधयोग्यत्वानवाप्तौ प्रयत्नपूर्वं विधीयमानाकृत्रिमतां भजते, इन्द्रियप्रत्याहारादिसम्पन्नो जीवः कदाचित् प्रयत्नपूर्वं कदाचिच्च प्रकृत्यैतां समासादयति। सैव हि योग्यः, इयं हि विश्रान्तिः आत्मज्ञाननिकटतामुद्घोषयति, यथा यथा ह्यात्मज्ञानं सन्निहितं भवति तथा तथा चिन्मात्रविश्रान्तिं जीवः समनुभवति। आत्मज्ञानसूर्योदयादर्वागरुणोदयकल्पा हीयं विश्रान्तिः। इदञ्चात्रावधेयमवर्णनीया केवलानुभवनीया चेयं तत्त्वतः सद्यतीनां भवति। अत एव सद्यतिरेव मग्न इत्यभिधीयते इति दिक्।

कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम्।
ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन।। (**भजगोविन्दम्**, श्लो.-१९)
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। (भगवद्गीता ४/३९)
अज्ञानी तपसा जन्मकोटिभिः कर्म यन्नयेत्।
अन्तं ज्ञानतपोयुक्तःस्तत् क्षणेनैव संहरेत् ।।
ज्ञानयोगस्तपः शुद्धमित्याहुर्मुनिपुङ्गवाः।
तस्मान्निकाचितस्यापि कर्मणो युज्यते क्षयः ।।
(**अध्यात्मसारः**- आत्मनिश्चयाधिकारे। १६२/१६३)

क्रियाशून्यं च यज्ज्ञानं, ज्ञानशून्या च या क्रिया।
अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव।। (**ज्ञानसार प्रशस्तिश्लोक**-११)

इत्यादिषु यदपूर्वं ज्ञानमाहात्म्यमनुभूतिसम्पन्नैः प्रोद्घोषितं, तज्ज्ञानं न शास्त्राभ्यासैकसम्पाद्यम्, न वा केवलाक्षरज्ञानम्, अपि तु अनुभूतिजन्यम्, बाहुभ्यां स्वयम्भूरमणमहोदधितरणपुरुषार्थतुल्यमपूर्वं पुरुषार्थं तथाविधतीव्ररुचिवशतोऽनुपमात्म-वीर्यप्रभावेणादृत्य कस्मिंश्चिद् धन्यक्षणे देहाद् भिन्नं यथा वस्त्रं स्पष्टमनुभूयते, तथैवाभ्रान्तं स्पष्टमपूर्वात्मानन्दाधायकं निबिडग्रन्थिभेदेनैव चिदानन्दपूर्णमात्मानं वीतरागकल्पं संवेत्ति, अयमेवानुभवः, इदमेव सम्यग्दर्शनम्, नात्र कोऽप्याभासः, प्रतिभासो वा। एतादृशानुभवावाप्तावेव परमार्थतो जिनशासने प्रवेशः, न च बाह्यतो जैनमताभ्युपगममात्रेण ग्रन्थिभेदोत्तरकालीनं सम्यग्दर्शनं विना तत्त्वतो जिनमतावगतेरेवासम्भवात्। अयं ह्यनुभवोऽत्यन्तमभ्रान्तः, न च कदाचिदपि संशयं स्वकीयानुभवादिविषयकं जनयति। एतदवाप्तौ मूलतो जीवनं परिवर्त्तते, यच्च पूर्वमादेयतया प्रतिभासितम्, तत्तुच्छमवभासते, दृष्टिरेव मूलतः परिवर्त्तते, निष्कामयोगित्वादिकं तस्यैव सङ्गच्छते, तत्प्राप्तावेव स्वकीयमूलभूतं वीतरागसर्वज्ञस्वरूपं श्रद्धत्तुं समर्थो भवति, अन्यथा तत् कल्पनामात्रमेव भवति, अनुभूतिकाले च कथञ्चित् किञ्चित्कालावधि सिद्धतुल्यस्वात्मसंवेदनेन वीतरागत्वसर्वज्ञत्वादिश्रद्धा तात्त्विकी सम्पद्यते। इयं ह्यनुभूतिः विरलतमेति स्वस्यात्मज्ञानसम्पन्नत्वनिश्चयपूर्वं गम्भीरतया विचिन्त्यम्, स्वकीयावस्थां प्रति शाहमृगीयदृष्टिरात्मार्थिना झटिति त्याज्या, सम्यक् तां परिज्ञाय तदपहानाया-त्यन्तमुद्यच्छनीयम्, तयैव हितसम्प्राप्तेः।

एतादृशात्मज्ञानमाहात्म्यमुपलभ्यात्मार्थी जीवोऽन्यत् सर्वं परित्यज्यात्मज्ञानाय संयस्यति, आत्मज्ञानप्राप्तिपथश्च सम्पूर्णः केवलैकेनापि श्लोकेन प्रदर्शितः महोपाध्यायैरित्यात्मार्थिनां तादृशदेशकत्वलब्धिसम्पन्नेष्वभ्रान्तमार्गप्रदर्शकेषु महोपाध्याये-ष्वतीव बहुमानो विलसत्येव, नात्र किमप्याश्चर्यम्, आन्तरभक्तिविशेषवशेनानन्योपकारि-महोपाध्यायगुणोत्कीर्त्तनादिकमात्मार्थिभिः क्रियते, कृतज्ञतावशमेतत् सर्वं भवति। आत्मार्थी चैतेषां महोपाध्यायानाम्, आत्मज्ञानप्राप्तिगोचरां हार्दिकीं प्रेरणां प्राप्य तदर्थमतिशयेन प्रयतते, तथैव महोपाध्यायानां तात्त्विकश्रद्धाञ्जलिसम्पत्तेः।

"द्रष्टुः दृगात्मता मुक्तिः, दृश्यैकात्म्यं भवभ्रमः" (**अध्यात्मोपनिषद्**)तथा

"पारं तु प्रापयत्येकोनुभवो भववारिधेः" (**ज्ञानसार**)

इत्याद्यनुपमवचनैः स्पष्टं मोक्षमार्गदेशकेभ्यः महोपाध्यायेभ्यः भक्तिभरनतिततिपूर्वं कार्तज्ञ्यभावं भावाञ्जलिञ्च समर्पयन् विरमामि, जिनाज्ञाविरुद्धञ्च क्षन्तव्यम्।

अत्रत्यं तत्त्वं समधिगन्तुमाभिनवप्रकाशितद्रव्यगुणपर्यायरासोपजीविवृत्तौ द्रव्यानुयोगपरामर्शकर्णिकायामन्त्यमाध्यात्मिकोपनयं विभावयितुं विज्ञप्तिः।

## लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीयाऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्।

* स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते।

* नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यकी।

* ये लेखा निर्णितप्रकाशनदिनात् चैत्रकृष्णाद्वादशीदिनाऽभ्यन्तरे (दि.१६ एप्रिल) मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते,

* तदनन्तरं प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्।

* गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसंधिः कर्तव्यैव।

* अर्थभेदस्थाने एव ''अवग्रहः'' कर्तव्यः।

* अनुस्वारानुनासिकयो र्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वारस्तत्रानुस्वारकरणे न बाधा।

* लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणामेवाधिकारो भविष्यति।

**-प्रकाशकः**

# बुद्धिप्रकर्षः, श्रद्धाप्रकर्षश्चैकत्र

-*पंन्यासप्रवरश्रीमोक्षरतिविजयगणिः

विश्वेऽस्मिन् बुद्धिप्रकर्षः श्रद्धाप्रकर्षश्चैकत्र प्रायेण न दृश्यते । परंतु बुद्धिगम्ये तर्कसङ्गते सुधीसंमते श्रीमति जैनशासने बहवः श्रद्धालवः प्रकृष्टबुद्धिशालिनोऽभवन् । तेषु प्रथमपङ्क्तिगतमेकं सर्वविद्वत्संमतं नाम महोपाध्याय **श्री यशोविजय**गणिवरपादानाम् ।

यथा, तै रचिता ग्रन्था विदुषां शिरांसि नामयन्ति, तथैव तैर्निर्मितानि गूर्जरगीःकलितानि स्तवनानि सामान्यजनानां हृदयानि नर्तयन्ति।

विदुषां चाविदुषां च सर्वेषां श्री जिनमतानुयायिनां हृदयेषु स्थानं संप्राप्तानां तेषां हृदये कियदस्ति स्म भगवद्बहुमानं तद् दर्शयदेकं गुर्जरभाषाबद्धं स्तवनं प्रस्तुतीक्रियतेऽत्र संस्कृतभाषायाम् ।

सुमतिनाथगुणवृन्दे मिलिता, वर्धत एव मम प्रीतिः;
तैलबिन्दुरिव विस्तरति सदा, सलिले सारस्फीतिः
विलसति जिनचन्द्रे लग्नश्चित्तचकोरः....

सज्जनैः समं बद्धा प्रीतिः, गुप्ता तिष्ठति नैव;
कस्तुरीपरिमल आयाति, प्रत्यक्षं त्वरयैव... विलसति...

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां शिष्यः।

अङ्गुल्या मेरूर्न विलुप्यति, स्थाल्या नहि रविकान्तिः;
अञ्जल्यामिव गङ्गापः प्रभु-प्रीतयो हृदये न मान्ति...   विलसति...

ताम्बूलं भक्ष्यमाणमधरं, प्रकटीकुरूते रक्तत्वम्;
वारंवारं प्रभुगुणममृतं, पिबति हृदयमासक्तम्...   विलसति...

छादितमतिपत्रैरिक्षुवणं, लभत एव विस्तारम्;
**यशोविजय** इति वच्मि, प्रभुवरप्रेम ममैवं प्रकारम्...   विलसति...

# यशोविजयवाचकाऽष्टकम्

-*मुनिश्रीप्रशमरतिविजयः

गङ्गातरङ्गपरिसंगमभङ्गमङ्ग-
रङ्गप्रसङ्गमुपलभ्य तपःपवित्रम्;
ऐंकारमंत्रमिव वाक्यबलं य आप,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।१।।
स्याद्वादसारघटितैरविरोध्यतर्कैः,
भङ्गीनयैरुपगतं कमनीयशास्त्रम्;
वैविध्यबद्धमनुकूलमयं लिलेख,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।२।।
वाराणसीयविबुधैर्बहुमानितस्सन्,
श्रीजैनधर्मजयकारमयं चकार;
जित्वा विरोधिनमवाप विपक्षभक्तिं,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।३।।
अध्यात्ममार्गमनुभूतिमयं प्रपन्नः,

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां शिष्यः।

पूर्णं निमज्जनरसं सहसाऽऽप्तवान् यः;
गीतिं जगौ परमचेतनतत्त्वपूर्णां,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।४।।
भाषात्रयेण त्रिपदीपरमार्थबोधं,
रत्नत्रयीविशदतत्त्वविचारधाराम् ।।
सूत्रत्रिकं हृदयहारि विविक्तवान् यः,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।५।।
सर्वेषु नाम विषयेषु सदा प्रविष्टः,
सर्वत्र सैष सततं समुवाच सम्यग्;
सर्वज्ञपुत्रपदवीं सफलीचकार,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।६।।
माता पिता सहचरोऽस्य गुरुश्च शिष्यः,
नूनं यशोविभवमुच्चमवाप्तवन्तः;
येनाऽभवज्जिनमतस्य यशोविवृद्धिः,
वन्दे यशोविजयवाचकमात्मसिद्धम् ।।७।।
यस्याभिधानममलं महनीयमन्त्रं,
स्मृत्वा भवेत् शुभमतिः प्रगुणा स्थिरा च;
**देवर्द्धि**वासितधियं श्रुतनिष्ठितार्थं,
वन्दे **यशोविजय**वाचकमात्मसिद्धम् ।।८।।

# यशोगुणगीता

**(गेयकाव्यम्)**

**-*मुनिश्रीसम्यग्दर्शनविजयगणिः**

तर्ज : विनय निभालय निजभवनम्।

* जयतु वाचकयशः सुगुरुः
वाचकज्येष्ठः कविकुलश्रेष्ठः मन्दधीदुर्भगकल्पतरुः; जयतु० ।।
नयगुरुपदकमले भ्रमरस्य, श्रुतसंपन्निकरं सृजतः;
प्रसृतं शान्तसुधारसधवलं, यशः सज्जनप्रीतिं ददतः जयतु० ।।१।।

* निजहृदये धत्ते जिनवचनं, कर्मकाष्ठकुठारसमं;
निराशंसतया भव्यानां, यो विदधाति हितमसमम् जयतु० ।।२।।

* यन्त्रसमः गुरुगुणस्वाध्यायः, मन्त्रसमं सद्गुरुशरणम्;
गुरुचरणं स्वीकुरुते तस्य, भवति द्रुतं भवजलतरणम् जयतु० ।।३।।

* पठितं भक्तामरं बाल्येऽपि, मातृमनःप्रमोदकरम्;
यौवने गुरुमुखसरसः पीतं, शास्त्रामृतं भवतृषाहरम् जयतु० ।।४।।

* सोल्लासो यो ज्ञानक्रियासु, कृतकर्मारिभटभेदः;
सततं गुरुसेवासु निरतः, विनयकर्त्तव्ये गतखेदः जयतु० ।।५।।

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

* न्यायागम-व्याकरण-कोषानां, छन्दोऽलङ्कृतिकाव्यानाम्;
वेत्ति रहस्य सहजतया यः, संरचयति च नव्यानाम् जयतु० ।।६।।

* यद् यशसा त्रिभुवनपूरणाय, 'जसवन्त' नाम कृतं स्वजनैः;
मन्ये तद् फलीभूतं यस्य, यशः प्रथितं गुणगणैः जयतु० ।।७।।

* भवजङ्गलमध्ये पर्यटतां, ध्रुवतारकवद् पथदर्शी;
विषयपिपासुतृट्शमनाय, साम्यसुधावारिवर्षी जयतु० ।।८।।

* यशः स्मृति र्मन्त्रवद् हरति, विषयकषायेषु गृद्धिम्;
यशोग्रन्थाभ्यासः स्थापयति, भव्यजनेषु सद्बुद्धिम् जयतु० ।।९।।

* विनय-विवेक-सेवावधूवृन्दं, नित्यं भुङ्क्ते यो रक्तः;
शास्त्र-पठन-पाठन-परिशीलनैः, तिष्ठति तदपि विरक्तः जयतु० ।।१०।।

* नव्य-भव्य-काव्यविरचनाद्, धत्ते कविराट् मृदुहृदयम्;
कर्कश-तार्किक-ग्रन्थरचनया, चित्ते धृतं काठिन्यम् जयतु० ।।११।।

* गुणदाः भक्तिः सुखदाः स्मृतिः, त्वद्दर्शनं सुधाझरणम्;
भवहरणं चरणं यस्यास्ति, प्रतिभवं स्यान् मे शरणम् जयतु० ।।१२।।

* हृत्कमले यस्य गुर्वाज्ञा, मुखात् कुरुते जिनवाक्पानं;
प्रतिस्थानं सन्मानं तदपि, वाचको नम्रः गतमानः जयतु० ।।१३।।

* पुण्यप्रतिभा-समर्पण-स्वाध्याय-पावित्र्यादिगुणविसरः;
सर्वो यत्र सहजो मिलितः, वन्दे तमहं भक्तिभरः जयतु० ।।१४।।

* सद्गुरुणां सेवा न त्यक्ता, मुक्ता निजमनस इच्छा;
दिवानिशं भोजन-शयनयोः, येन कृता न तनुसुखेच्छा जयतु० ।।१५।।

* न्यायाचार्यो न्यायविशारदः, कूर्चालसरस्वती इति ख्यातः;
विशेषणमपि यन्नाम्ना प्रथितं, यशोगुरुणामहो गुणव्रातः जयतु० ।।१६।।

* गुणस्मरणं हरति पापौघं, नामस्मरणतः सर्वदुःखम्;
अज्ञानं वन्दनात् विनश्यति, पूजनाल्लभते सर्वसुखम् जयतु० ।।१७।।

* यत् प्रतिभांशु र्यादृक् दृष्टः, नान्योऽस्ति जगति तादृक्;
न ग्रहो ग्रसति नास्तं याति, प्रत्यहं तु समुदेति जयतु० ।।१८।।

* यस्य समर्पणसौरभजितं, कमलं कुरुते तपः जले;
करुणापूर्णनयनाऽवधीरितः, शीघ्रं पतति चकोरोऽनले जयतु० ।।१९।।

* सहस्रदीधितिभिः पूर्णोऽपि, सूर्यो जगति दुष्प्रेक्ष्यः;
गुरुराट् गुणकिरणैः पूर्णोऽपि, भव्यजनानां संप्रेक्ष्यः जयतु० ।।२०।।

* जिनवचनानुरक्तिश्चित्ते, वपुषि यस्य सुगुरुभक्तिः;
प्रीतिः परमा स्याद्वादेऽस्य, कुमतनाशे निपुणा नीतिः जयतु० ।।२१।।

* युक्तिकुवादिमानहराऽस्य, शासनविजयप्रदा शक्तिः;
मुक्तिस्थापनकृदुक्तिश्च, परमानन्दकरा जिनभक्तिः जयतु० ।।२२।।

* यशोगुणरागः शश्वन् मेऽस्तु, सकलवचनसमृद्धिप्रदः;
यशोगुणगानं शश्वन् मेऽस्तु, सम्यक् सद्गुणसिद्धिप्रदम् जयतु० ।।२३।।

* त्वद्गुणसंपद् काचिदर्पय, नाशय मे दुर्गुणजालम्;
बालो मातुः किं नहि याचते, पल्लवग्राही सुवाचालः जयतु० ।।२४।।

* "**मुक्ति**"पददातः सद्गुरो!, "**श्रेयो**"गुण संपत्तिकरा;
स्वीकुरु मे स्तुतितति विकलाऽपि, "**सम्यग्दर्शन**"सुगुणवरा जयतु० ।।२५।।

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

**ऐं नमः**

**-*मुनिश्रीसम्यग्दर्शनविजयगणिः**

(परमश्रद्धेयवाचकवर्याणामनुपमं चरितं संस्कृतभाषायामद्यापि कुत्रचिदपि न मिलति, तेषां ग्रन्थाऽभ्याससमुद्भूतवचनानुरक्त्या **'अयस्कान्तेनाऽयोवत्'** तद्सद्गुणगणसमाकृष्टेन मया प्रारब्धोऽयं प्रयासः।)

ऐन्द्रसदनमिव त्रिभुवनमध्ये विराजमानकुवलयकुवलये भ्रमर इव शोभमानो जम्बुद्विपनामा द्विपोऽस्तीह। स सङ्ख्यया लक्षयोजनप्रमितोऽप्यसङ्ख्यैः जनैरासेव्यतेऽहर्निशम्। स भूभामिन्या नाभीस्थानवद् महापुंसामपि हृदयहारकोऽस्ति।

यतस्तिर्च्छालोकेऽस्मिन्नसङ्ख्यातेषु द्वीपेषु सत्स्वपि सिद्धाचलतीर्थेण तस्य पावित्र्यं प्रापणात् स्वोत्सङ्गे च लक्षयोजनोच्चं मेरुं गृहित्वासं, तेतैव मेरुच्छलेन स्वाङ्गुलीमुर्ध्वीकृत्य 'सर्वेभ्यो प्रकृष्टसौभाग्यवानहमेकोऽस्मि पृथ्व्यामिति' कथयति। तेनैवाऽहं शङ्के रात्रौ गगने ग्रहादिगणपरिकलितचन्द्रवद् दिवानिशं पृथिव्यां नैकवन-गिरि-नदी-परिवृत-लवणोदधिना परिवेष्टितो वृत्तोऽसौ मोहयति देवान्नपि। लवणसिन्धु र्वेलाच्छलेन नवां नवां कीर्तिपताकां स्थापयन्निव, उच्छलत्वेला-कल्लोलोर्म्यक्षतैरहर्निशं वर्धापयन्निव, वेलाघोषेण च कथयति नास्मादन्यःप्रशस्यः।

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

तत्राऽस्ति भारतं नाम क्षेत्रं कोदण्डाकारधारकम्। य: स्वश्रिया गर्वितं वक्रतां गतमिति मन्येऽहम्। ससीमन्तसिमन्तिनीशिरोवद् राजतवैताढयेन द्विधा विभक्त: शुशुभे। मन्येऽहं नाकेष्वपि तस्य कीर्तिर्गता तेनैव सिद्धाद्रिपर्वतवन्दन-पूजनसेवनव्याजेन दुषमारकेऽपि प्रतिदिनं तत्र देवा: समागच्छन्ति।

ईदृशे गणनातीतगुणगणसमृद्धिसंभारविभूषिते भारते नैकदेशेषु सत्सु भूभामिनी भालस्थले तिलकमिव गूर्जराख्यदेशोऽस्ति ।

सो समस्तो देशोऽकरोऽपि गुणनिकर आसीद्। तत्र प्राणिन: पाणिग्रहणे करपीडनं प्राप्नुवन्ति किन्तु न राज्यमहत्तमै:, तत्र चौर्यमपि गुणानामेवासीद् न तु धनादिनां, तत्र दुर्जनानां दुष्काल आसीत् न तु धान्यजलानां, तेनैव तत्र कलावपि सुषमारावत् राज्यं सुराज्यमिव चलति स्म। तत्र भूपाला देवालयप्रतिमावत् सेवनीया एवासन्, हस्त्यश्वरथपदातिस्वरुपसैन्यं दर्शनीयमेवासीत्। तत्र राज्ञां धर्मप्रियतया, प्रतापाज्ञैश्वर्यवत्तया, सद्भोगभोगितया, भीमकान्तगुणतया च धर्मार्थकामानां साम्यं प्रथितम् ।

तत्राऽऽसीद् कनोडानामनगरं यत् पुरातनकालेसु प्रसिद्धिं प्राप्तममरावतीवद् सौभाग्यभागभवत्। तन्नगरं मेदिन्या: सर्वस्वमिव, देहस्य मुखमिव, मुखस्य नयनमिव, नयनस्य तारावत्, ताराया: श्यामत्वमिव, दिने तरणीव, निशासु चन्द्रमिव, देहस्य विभूषेव शोभामादधत् ।

तत्र सरवापीकूपोद्यानराजमार्गश्रीमदावासहट्टविथ्यादीनां शोभां द्रष्टुकामा: पथिका अहंपूर्वीकया निरंतरं समागच्छन्ति स्म। किं बहुना तन्नगरस्य कीर्तिवल्ली तत्रस्थ जनै: मार्दवार्जवसौजन्यादिगुणसमृद्धिस्वरुपवारिभिस्तथा सिञ्चिता यथा निरंतरं देवमंदिरादिधर्मस्थानकन्दजन्मा, वितता, विकस्वरा, प्ररूहन्ती चतुर्दिक्ष्वपि प्रासरत् ।

तत्र दम्पतीनां वि-योगोऽपि रतिबन्धनायैवाऽभवत्, तत्र मन्दताऽपि ग्रहेष्वेवासीत् न तु जनेषु, वधोऽप्यासीत् किन्त्वान्तरशत्रूणां नत्वन्येषाम्। इदृशस्य, शोभालयस्य, मङ्गलनिलयस्य, सुखैकनिकेतनस्य, दु:खनाशायतनस्य, तस्य नगरस्य बहि: **रुपेण**नामानदी प्रावहत्। तस्या: प्रवाहोऽपि नगरस्य कीर्तिकल्लोलकथामेव कथयति स्म। तदुपरि समुड्डीयमानविहगवृन्दकलकलनिनाद: सञ्चरन्पान्थजनान्

तन्नगरशोभां निभालयितुं समाकारयन्निव भाति स्म।

पुनश्चास्य नगरस्य प्रभूततरं शोभास्थानं स्मरणादेव्याः मन्दिरमप्यासीत् । विश्वप्रसृतस्य तस्य मन्दिरस्य महिम्ना यथा भ्रमरगणाः कुवलये तद्वद् दूरस्थनगरेभ्यः दर्शनार्थिजनाः पुनः पुनः समागच्छन्ति स्म, स्वेप्सितञ्च साधयन्ति स्म । चौलुक्यवंशे प्रतिष्ठितस्यास्य मंदिरस्य पञ्चशतानि वर्षाणि सञ्जातानि तथापि तस्य शील्पकला स्तोकाऽपि न खण्डिता, जीर्णापि नाऽभवत्, नूतना इव दृश्यते,ततस्तन्मन्दिरं जनानां विश्वासस्थानमभवत् ।

इत्येवं स्थिते लक्ष्मीवद् संसारस्य संसरणशीलत्वाद्, गगनस्थितगन्धर्वनगरवद् पुद्‌गलस्य शटनपतनविध्वंसनशीलत्वाद्, कुमुदस्थितजलबिन्दुवद् सर्वभावानां चञ्चलत्वाच्च तस्य मंदिरस्याऽपि ईदृश्येव काचिद् घटना घटिता। तदानीं भारतवर्षे दिल्हीनगरे नवनियुक्तदुर्दान्तस्वदोर्बलसंभवगर्वपर्वतसर्वस्वेन हस्ति-पदाति-रथ-हयादिभिः सन्नद्धकटकेन सुबेदारझफरखानेन गूर्जरः संरुद्धः। प्रारम्भे तु गूर्जराधिपरास्तीखानेन सफरखानः प्रचण्डतयाऽऽक्रान्तः किन्तु पश्चाद् रास्तीखानं प्रति सफरखानो द्विगुणपराक्रमेण समायुध्यत बद्धश्च रास्तीखानः । गुर्जरराष्ट्रे हारितो रास्तीखान इति हाहारवोऽभवत्। नैकग्रामनगराश्च सफरखानेन लुण्टिताः, नैकसंपद् स्वहस्तीकृत्य यथायातस्तथैव गतः ।

दुष्टेन तेन कनोडानगरमपि न मुक्तम् तस्याऽपि नैकसंपद् नष्टप्रायः कृता। तेषु परमशान्तिमन्दिरं, नैकजनसुखैकास्थानं, मनःप्रसन्नतानिलयं स्मरणादेव्या मन्दिरमपि ध्वस्तं । तस्याऽपि शिल्पकला बहुशः खण्डिता कतिचिदवशिष्टावशेषैरपि दर्शनीयं तन्मन्दिरं बहुजनश्रद्धासद्मासीत् तस्य शोभा दुष्टजनहस्तगतसन्नारीवत्, कण्टकतरुपार्श्वस्थितकदलीवत् नष्टप्रायो जाता। तथापि मङ्गलमुहूर्तप्रतिष्ठिता स्मरणादेवीप्रतिमा तथैव स्थिता। सा तस्य प्रभावमाख्यातुमेव स्थितेति मन्ये। तस्याश्चमत्कृतिकृतचमत्काराः चित्तचकोराय चन्द्रायते। ततो बहुजनास्तद्दर्शनार्थं समायान्ति। खण्डितावशेषमपि स्थापत्यं दृष्टवा निर्निमेषीभूताः जनाः भाविमहापुरुषजन्मभूमिशोभां वर्धयितुं समागतामरनिकरलीलां बिभ्रति।

तन्नगरबहिस्तन्नगरं पूतपापं कर्त्तुमिव रुपेणनामा या नदी प्रवहति सा तत्र

स्थित-चक्रवाकमिथुनसुरतलीलान्दोलितजलकल्लोलकलानिनादेन "किञ्चिद् समया-नन्तरमेवभाविमहापुरुषाश्रयदानेन त्वं जगति श्रीमन्तावतंसं भावि ततः सांप्रतं दिवसे परित उच्छलन् रेणुसंपातधूलीधूसरग्राम्यबालवृन्ददौर्भाग्यं, शून्यगृहहट्ट-चतुष्पथादिश्रीरहितं दृष्ट्वा स्मशानवत् दारिद्र्यं स्मृत्वा च "मा रोदीः" इति तमाश्वासयितुमागता इव भाति स्म।

तन्नद्याः परितः प्रदेशः सर्वर्त्तुकाले तत्तत्पुष्पफलादिसमृद्धिशोभया नन्दनवनवत् शोभते स्म।

तथाहि-शरदत्तौ-फुल्ल-कुसुम-किसलय-गुच्छाभि-वर्धितशोभः कुन्द-पादपो निकटायातजनं त्वरयैव कामबाणेन विध्यति स्म। स्वललना-विरहानलसन्तप्ताऽपि शीतार्त्ताः पान्थाः स्वकान्ताकुचकुम्भपरिरम्भेण शीतव्यथा-मपनोदितुमभिलषन्ति स्म।

**वसन्तर्त्तौ**-तस्य प्रदेशशोभा शब्दातीता भवति। तथाहि-स प्रदेशः समञ्जरीषु नवपल्लविताम्रवणखण्डेषु कोकिलकलकूजितैः प्रीतिरसपरिपूर्णनवोढयुवायुगलं समाकारयन्निव, रक्ताशोकतरुमूलपतितपरागकणैः वसन्तागमने कुङ्कुमवर्धापनं कुर्वन्निव, कामिनीकुचकुम्भैरिव पुष्ट-कोमल-सरसचूतफलैः विषयविमुखजन-मनांसि क्षोभयन्निव, नवविकसितधवलपुष्पगुच्छभृततरुनिकरैः विरागिजनोपहासं कुर्वन्निव, शुकसारिकादिशुभविहगवृन्दैः मङ्गलपाठकवत् मङ्गलं गायन्निव, वातान्दोलितमहावृक्षोत्तमाङ्गैः भाविमहापुरुषचरणपवित्रितं तं नगरं नमतीव स प्रदेशः शोभतेतराम् ।

तदा नागराः सन्तानकवनेषु प्रविष्टाः सर्वकार्यविमुखा भवन्ति । बकुलवृक्षेषु तेषां मनांसि मुहुर्मुहुः धावन्ति । विकस्वरमाधवीलतासु परमरतरतिमनुभवन्तः परमब्रह्मनिमग्नयोगीजनवत् सर्वं सर्वस्वं विस्मरन्ति । सिन्दुवारकुसुमेषु लुभ्यन्ति, पाटलपल्लवेषु परितुष्यन्ति, मदनशरविद्धहृदयानि युवमिथुनानि चूतवन-चन्दनतरुगहनप्रविष्टानि नानाक्रीडापराणि तत्रैव स्थातुमनांसि गृहगमनविमुखानि भवन्ति। एवं वसन्तर्त्तौ तत्र मकरध्वजसाम्राज्यपराभूतो जन्तुलोको विविधप्रकारेण विलसन्ति । **(क्रमशः)**

# वाचक-**जस**-विजय-वचन-मौक्तिकानि

**-*मुनिश्री आत्मदर्शनविजयः**

विश्वोद्धारकश्रीजिनशासने न कोऽपि बुधः **श्रीयशोविजय**वाचकवर्यस्य नाम-कर्मणोऽज्ञातोऽस्ति। यद्यपि तेषां गीर्वाण-प्राकृतभाषयोरनेकानेककृतयः काव्य-कथा-काव्यशास्त्र-धर्मोपदेश-ज्ञानमिमांसा-भक्ति-न्याय-नय-तर्कशास्त्र-जैन-सिद्धांत-वेदांत-बौद्ध समीक्षा-योगा-ऽध्यात्मप्रभृतिरुपैरुपलभ्यन्ते।

अपितु न सर्वे जिनभक्ताः साधुश्रावकरुपास्तेषां शास्त्राण्यध्येतुं शक्नुवन्ति, गूढरहस्यक्लिष्टतर्कयुक्तत्वात्। अतस्तैः स्वानुभवज्ञानगुरूपदेशशास्त्रबोधनिस्यन्दं गूर्जरप्रमुखलोकभाषायामप्यवतारितम्। कथमेवं कृतम्? तद्विषये दन्तोक्तिः श्रूयते। तद्यथा,

स्वगुरुभिः सह काशीदेशाऽऽग्राप्रदेशेषु सप्तवर्षाणि न्याय-तर्क-दर्शनादि-शास्त्राभ्यासं कृत्वा गूर्जरसमागमनानन्तरं ते कदाचित् प्रतिक्रमणविधावुद्युक्तवन्त आसन्। सज्झायवेलायां यदा गुरुभिराऽऽज्ञापिता अपि सरलगूर्जरस्वाध्यायं प्रवक्तुं न शक्नुवन्ति स्म तदा केनचित् श्रावकेनालपितम्, "किमेतावत् कालं काशीषु तृणानि लूनानि?!"

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

तत्छुत्वा लब्धसरस्वतिप्रासाद-कूर्चालसरस्वति-महामहोपाध्याय-श्रीयशोविजयगणिवर: स्वशास्त्राभ्यासं गूर्जरभाषायामवतारयितुं प्रवृत्त: । तद्वेलायामेव तै: श्रीसीमंधरजिनविनंतिरुपसपञ्चाशत्त्रिशतवृत्तानि रचितानि। उद्विग्नै: श्रावकैर्विज्ञप्ता यदुत, ''कियत् शेषम्?'' तदा यशोविजयभिरुद्घोषितम् ।

''यानि तृणानि मया लुनान्याऽऽसन् तानि बद्ध्वा सञ्चिनोमि! तस्याऽरम्भ एव मयाऽद्य कृत:।''

एतदनुमीयते, तत: प्रभृति तै: स्वज्ञाननिधि: प्राकृतलोकबोधार्थं गूर्जर-राजस्थानीत्यादिभाषासु प्रकटित:। तेषां शब्दा: साधुश्रावकसङ्घानां भवसमुद्रे मुक्तिद्वीपगमनाय सेतूयन्ते। तै गूर्जरादिभाषासु त्रयश्चतुर्विंशतिस्तवा:, १२५-१५०-३५० वृत्तयुक्तानि श्रीसीमंधरजिनविनंतिस्तवनानि, योगदृष्टिस्वाध्याय:, सम्यक्त्व-सप्तषष्ठीस्थानकस्वाध्याय:, अष्टादशपापस्थानकस्वाध्याय:, आत्मषट्स्थान-चतुष्पदी, आनन्दघनाष्टपदी, हरियालीस्तव:, समुद्रयानपात्रसंवाद:, जंबुस्वामिरास:, श्रीपालरासार्ध:, नवनिधानस्तवनानि, अध्यात्मपदानि, सुगुरुकुगुरुस्वाध्याय:, निश्चयव्यवहारगर्भश्रीशांतिजिनस्तवनानि, विविधस्तवनस्तुतिस्वाध्यायाश्च रचिता:।

एतेषु सर्वेषु तै: क्वचिदाऽऽत्मनिन्दा कृता। क्वचिद् दृष्टान्तैर्भिन्नभिन्नकल्पनायोगैश्च हितोपदेशोऽपि दत्त:। क्वचिद् वादयुक्तिप्रयोगै: स्याद्वादसिद्धान्तस्य सिद्धिरपि कृता। क्वचित् तीर्थवन्दना क्वचिच्च साधुवन्दना। क्वचित् कार्मग्रन्थिकपदार्थैरात्मस्वरुपनिरूपणं कृतम्। क्वचित् शुद्धविधिस्थापनेनोन्मार्गस्योन्मूलनं कृतम्। क्वचित् शुद्धदेवगुरुधर्मतत्त्वनिरुपणैस्तपागच्छस्य शुद्धपरंपराऽपि दर्शिता। क्वचित् कथासाहित्यमपि प्रज्ञप्तम् । क्वचिज्जैनशासने व्यवहारनिश्चयमार्गयोर्विवेकोऽपि कृत: । क्वचित् स्थापनानिक्षेपं साधयन् प्रतिमापूजया द्रव्यभावस्तवौ समर्थितौ। क्वचित् शुद्धसामाचारीनिरुपणेन सम्यक्त्वस्य स्वरुपमपि स्पष्टीकृतम्। क्वचिद् वैराग्योपदेशैराऽऽत्मन: समता-समाधि-स्वरुपावस्था निर्देशिता:। क्वचिच्च बालो, मित्रं, स्नेही, स्वजन:, प्रिय:, कान्त:, मूर्खो वा भूत्वा प्रेममूढतानम्रताहास्योग्रतापूज्यतोपालम्भभक्ति भावप्रमुखवचनाडम्बरै: सर्वत्र भूतभाविवर्तमानजिनानां पुरत: स्वहृदयभावो व्यक्तीकृत:। भक्तहृदयस्य परमात्मानं प्रति के भावा वर्तन्ते तान् सर्वान् शब्दरुपेणाऽवतारिता इति तत्त्वम्।

पुण्यपुरुषैस्तै: शास्त्रावगाहनारुपपरिश्रमं कृत्वा दुर्वादीप्रलापरुपाग्निधूमं

सहित्वा तत्वात्मकधान्यानि मेलयित्वा नयनिक्षेपात्मकव्यञ्जनैः संयोज्यौ-दनसूपरुपस्वानुभवगुरुकृपे स्थापयित्वा मिष्टान्नरुपस्वशब्दलालित्यं दत्वा तिक्ताम्लादिरसरूपकटाक्षवचनैश्च गूर्जरभाषास्थाल्यां गूर्जरसाहित्यरुपारसवती प्रगुणीकृता। तदंशमेव गृहित्वा मया संस्कृतगिरया गद्यरुपेणाऽत्र परिवेषितम्। न किञ्चिन्नवीनं कृतम्। तेषामेव वचनानि तेभ्यः स्मरणाञ्जलिरुपेण दापयामीति भावः। श्रीरस्तु!

वाचकैरेतदवधारितव्यं यदुत, ममास्मिन् गद्यलेखे ये पत्राङ्काः निर्दिष्टाः ते "श्रुतज्ञानैप्रचारकसभाप्रकाशनै -वैक्रमीय-२०७१-तमे वर्षे प्रकाशित-गूर्जर-साहित्यसङ्ग्रहपुस्तकस्था ज्ञेया इति शम्।।

(१) त्यजन् लोकसंज्ञां मुनिर्दशविधं यतिधर्मं धारयेत्।
एवं लाभालाभं मानापमानं मृत्काञ्चनं सर्वं समं पश्येत् ।।१०१।।
-(पञ्चपरमेष्ठिगीता, साधुगुणवर्णना-पत्राङ्कः २४)

(२) कृपापरो भवनिस्तारको जङ्गमतीर्थभूः साधुर्गुणर्महिमनिधिः सदा सुखी कृती च भवेत् ।।१०८।।-(पञ्चपरमेष्ठिगीता, साधुगुणवर्णना-पत्राङ्कः२५)

(३) यथा कुमारी भर्तृसुखं न विन्दति, तथा वीतरागध्यानं विना जनः सिद्धिसुखं नानुभवति। तदर्थं जनाः सुबहु क्लिष्यन्ते, अपि तु परमात्मावस्था चिद्रुपदशायां स्वयमेव प्रकाशते ।।८।।
-(सिद्धसहस्रनामवर्णनछन्दः-पत्राङ्कः ३२)

(४) रसवेधेन स्वर्णीभूतं ताम्रं न भूयस्ताम्रत्वं प्राप्नोति, एवं परमात्मरागेण परमात्मीभूतात्मा न तस्मात् प्रच्यवते ।।३।।
-(अनन्तनाथजिनस्तवन-पत्राङ्कः ६७)

(५) यथा समुद्रपतितमुदकबिन्दुरक्षयत्वमधिगच्छति; तथा जिनगुणागारे मम रागप्रतिबन्धोऽपि न विलीयते ।।५।।
-(अनन्तनाथजिनस्तवन-पत्राङ्कः ६७)

(६) हे स्वामिन्! येन तव गुणलवोऽपि ज्ञातो भवति, न सोऽन्यरसे माद्यति। यथामृतास्वादेन तृप्तो जीवो न तुच्छभोजनैर्जीवति ।।२।।
तव ध्यानमेव सम्यक्त्वम्, ज्ञानम्, चारित्रम्।

तव स्वरुपध्यातैव ध्येयरुपो भवति ।।४।।

-(शांतिनाथजिनस्तवन-पत्राङ्कः ६८)

(७) परमात्मतत्त्वस्य द्रव्यगुणपर्यायैर्ध्यानमेव शिघ्रं मोक्षं दापयति ।।४।।
यस्तु कदापि न जिनचरणमुज्झति स नित्यं सुखभाग् भवति; यस्तु जिनचरणाद् दूरः स सुखभाग् न भवति। अतोऽहमन्यध्यानं त्यक्त्वा जिनगुणध्यानमेकमेव समाचरामि ।।५।।

-(अरनाथजिनस्तवन-पत्राङ्कः ७०)

(८) यो नित्यं प्रभुभक्तिं विनयेन प्रयुञ्जति
स सबलभावशत्रुमपि पराजयति. ।।४।। -(नमिजिनस्तवन-पत्राङ्कः ७२)

(९) हे प्रभो! त्वमेव गतिर्मम, शरणं मम
प्रियपात्रं जीवजीवनस्य चाधारः ।।५।।-(वीरजिनस्तवन-पत्राङ्कः ७४)

(१०) हे देव! तव गुणरङ्गे मम मनो लीनं जातम्।
अतस्त्वया प्रतिदिनं प्रगल्भतरं निर्वाह्यम् ।।३।।

-(अजितजिनस्तवन-पत्राङ्कः ७६)

(११) हे नाथ! तव गुणकोशे न किमपि न्यूनमस्ति। तर्हि कथं गुणलेशदानेऽपि विलम्बसे? किं विमृशसि? येनेप्सितदाने याचको याचनां कुर्वन् विडम्ब्यते? ।।२।। -(सुमतिजिनस्तवन-पत्राङ्कः ७७)

(१२) हे प्रभो! त्वया जिनशासनाराधनारुपो भोजनसमारम्भः प्रारब्धस्तत्र च सम्यक्त्वरुपं भोजनपात्रमपि दत्तम्। अतः परं को रिक्तभाजनक्लेशं सहेत्? अतस्त्वरितं सरसं शिवमोदकमर्पय ।।२।।

-(पद्मप्रभजिनस्तवन-पत्राङ्कः ७७)

(१३) हे स्वामिन्! "गजग्राससिक्थेन जीवन्ति पिप्पिलिकावंशानि।" एवं विमृश्य ददस्व तव भक्ताय गुणलेशमपि ।।३।।

-(पद्मप्रभजिनस्तवन-पत्राङ्कः ७८)

(१४) हे परमेश्वर! तव चित्ते मम वास एतद् वार्ताप्युदुम्बरवृक्षे पुष्पोद्गमसमाना। अपि तु यदि केवलं मम चित्ते त्वं वसेः, तर्ह्यस्माकं नवनिधानानि सिद्धानि।।२।। -(कुंथुनाथजिन स्तवन-पत्राङ्कः ८३)

(१५) हे स्वामिन्! यदि निश्चलो निरीहः सुगुणनिधिस्त्वं पुरुषसिंहः प्रभुर्मम हृदयगिरौ वसेः; तर्हि कुमतमतङ्गजयूथेभ्योऽस्माकं न लेशमात्रमपि भयः।।६।। -(वीरजिनस्तवन-पत्राङ्कः १०८)

(१६) हे नाथ! यदि त्वं मम शिरसि नायकत्वेन स्थितः, तर्हि कथंकारं मोहो मां पराभवेत्? यथा हि सूर्योदये सति प्रबलोऽप्यन्धकारो न तिष्ठेत्, तथात्राऽपि ।।२।।

हे जगद्गुरो! त्वमक्षयं सुखमनुभवसि। तदंशदानेनाऽपि ममानन्तं भवदुःखं नश्येत्, तथा परमं विवेकमप्यहं प्राप्नोमि ।।७।।

-(वीरजिनस्तवन- पत्राङ्कः ११२)

(१७) तं दिवसमहं निष्फलं मन्ये यस्मिञ्जिनैः प्रीतगोष्ठिर्न क्रियते।
प्रभुप्रेमप्रबन्धे भक्तिदूत्या मम मनो गृहीतमस्ति ।।३।।

-(सुबाहुजिनस्तवन-पत्राङ्कः ११५)

(१८) हे प्रभो! तपजपक्रियाप्रमुखानुष्ठानानि तव गुणध्याननिमित्तेन फलन्ति। अत एव त्वमस्माकं परमकल्याणनिमित्तं मित्रम् ।।७।।

-(ऋषभाननजिनस्तवन-पत्राङ्कः ११८)

(१९) जिनदर्शनसुखस्य पुरतो न मणि-माणिक्य-स्वर्णकोटिद्रव्य-प्राज्यर्द्धि-स्त्रीभोगाः किमपि कोटिं प्राप्नुवन्ति। अतोऽहं तव दर्शनमेव सर्वश्रेष्ठ-मभ्यर्थये ।।६।। -(वज्रधरजिनस्तवन-पत्राङ्कः १२१)

(२०) तस्य जनुः कृतकृत्यं येन प्रभुदर्शनं प्राप्तम्;
सा तनुः पवित्रिता या त्वां नमस्करोति;
तन्मनः पूतं यत् प्रभुगुणान् ध्यायते;
सा जिह्वा शुभा या प्रभुगुणान् गायति;
स समयः सफलो यस्मिन् प्रभुर्वन्दितो भवति ।।३।।

-(ईश्वरजिनस्तवन-पत्राङ्कः १२५)

(२१) हे स्वामिन्! अहं तव दर्शनप्रभावात् सम्यक्त्वरत्नं प्राप्नोमि ततो न कदापि मम दुर्गतिर्भविष्यति।।४५।।

-(वीरजिनस्तवन-पत्राङ्कः १३२)

(२२) हे प्रभो! मम चित्ते त्वमेव रोचसे, न कोऽप्यन्यो रोचते। तेन तव नेत्रे मम

नेत्रयोरऽवतारय।।५।। -(अभिनन्दनजिनस्तवन-पत्राङ्क: १३३)

(२३) हे स्वामिन्! तव दर्शनान् मयाऽतीवसुखं प्राप्तम्। यतोऽहं मन्ये मम गृहाङ्गणे सुरधेनुराऽऽगता, कामकुम्भश्चाऽपि मम संमुखमाऽऽगतोऽस्ति। प्रभुणा सह मम चिरप्रेमानुबन्ध: पुनरपि संजात: ।।६।।

-(ऋषभजिनस्तवन-पत्राङ्क: १४०)

(२४) हे जगद्गुरो! त्वं दर्शनं दत्वा मम भवभयं गालय, तव भक्तिषु गुणादरं पूरय, मम च पातकानि विनाशय। यद्यहं तव गुणयोग्यस्तर्ह्य अभीप्सितं ददस्व, न तस्मिन् किमपि न्यूनं कर्तव्यम् ।।८।।

-(ऋषभजिनस्तवन-पत्राङ्क: १४१)

(२५) हे परमात्मन्! मया तु मुक्तेरपि तव भक्तिषु चित्तं दृढतरं स्थापितम्। यतो यथाऽयस्कान्तमणिनाऽय आकर्षितं भवति तथा तव भक्तियोगादपि मम मुक्तिर्निश्चयेन भविष्यति ।।६।। -(ऋषभजिनस्तवन-पत्राङ्क: १४२)

(२६) हे जगद्बन्धो! अत्र संसारे नागपाशरुपानेकानेककर्मबन्धनानि मम सन्ति। अतस्त्वयैका विरतिमयूरी प्रेषणीया येनाऽहं तेभ्यो मुक्तो भवेयम् ।।६।। हे स्वामिन्! यदि त्वमनुज्ञापयेस् तर्हि मम पार्श्वे एकं परमगारूडमित्रं नाम्ना प्रवचनमस्ति, तस्योपयोगेनाऽहं मम सर्वदु:खनागबन्धनानि निर्मूल-येयम् ।।७।।

हे प्रभो! तव प्रीतिरूपचन्दनवासनया मम मनो वासितमस्ति।

तद्वासनायाश्चोत्कृष्टत्वं यत्र प्राप्यते स मलयाचलो नग इव त्वं मे प्राप्तोऽसि, अतोऽहं स्वं धन्यं मन्ये ।।८।। (सुपार्श्वनाथजिनस्तवन-पत्राङ्क: १४८)

(२७) हे परमात्मन्! विषयासक्त्या योऽग्निर्मम लग्नोऽस्ति, तन्निर्वापनाय तव गुणा जलीयन्ते। तद्गुणजलाशये च निमज्जतो मम न सुवर्णैर्दरैर्वा कार्यम् ।।४।। -(शीतलनाथजिनस्तवन-पत्राङ्क: १५०)

(२८) मूढो जनो मम प्रभोश्च प्रीतिं ज्ञातुं न शक्नोति। यथा हि भिल्लो न नगरवर्णनं कर्तुं समर्थो भवति, तथा प्रभुणा सहाऽस्माकमेतादृशी प्रीतिरस्ति ।।४।। सामान्यजनो यथा जानाति तथा जानातु, अहं तु प्रभोर्दास एव। प्रभुश्च मम ध्याने दृढीकृत:, शेषान् प्रति तु नोल्लसते मम चित्तम् ।।५।।

-(विमलनाथजिनस्तवन-पत्राङ्क: १५१)

(२९) हे प्रभो! तवाऽऽज्ञारुपी सुरशाखा मम नंदनवनरुपचित्ते प्रादुर्भूता । अतस्तस्मिन् कदापि न कुमतिकदाग्रहरुपविषकण्टकशाखिन: संभवेयु:।।७।।

हे स्वामिन्! यदि गुरूपदेशेनाऽहं तव शासनरागं प्राप्नुयां तर्हि तस्मान् मोक्षपदमपि साधीयान् भविष्यति । यथा कुसुमेषु किञ्जल्कप्रभावेनाऽलय: समागच्छन्ति, तथाऽत्राऽपि।।९।।

यदा च मम चित्तं तव शासने लीनं भवति तदा न तद् बहि र्निर्गन्तुमुत्सहते। यथा हि जलनिधावुन्मज्जन् निमज्जन् कुर्वन् मत्स्यो निजपद एव तिष्ठति, तथा मम चित्तमपि तव शासनपद एव स्थितमस्ति।।१०।।

हे पूज्य! ''त्वं स्वामी, सेवकोऽहं'' इति व्यवहारनयस्याभिप्राय:। निश्चयदृष्ट्या तु न किञ्चिदपि भेदमावयो र्मध्ये वर्तते।।१३।।

हे जगत्स्वामिन्! भवान् ममान्तरघटे प्रकट: स्थितवानस्ति। यथा निर्मलमणौ कान्ति र्विद्यते तथाऽत्राऽपि। अपितु मूर्खजना मृगा मृगमदमिव बर्हि दृष्ट्या न किञ्चिद् लप्स्यन्ति।।१५।। (पार्श्वनाथजिनस्तवन-पत्राङ्क: १६५)

(३०) हे प्रभो! तत्त्वपरिणतिरूपाऽऽत्मज्ञानदशाप्राप्त्या जीवस्तात्त्विक-वैराग्यपूर्विकां तव गुणस्तवनां प्राप्नोति। यथा रत्नपरीक्षया कश्चित् शुद्धरत्नं लभते तथा तव तात्त्विकगुणस्तवप्राप्तिरपि निजात्मज्ञानसद्भावा-ज्जायते।।१७।। (पार्श्वनाथजिनस्तवन-पत्राङ्क: १६५)

(३१) हे स्वामिन्! अद्यप्रभृति तव कृपयैवाऽहमियतीं गुणस्थितिं प्राप्तोऽस्मि। अत: प्रभृतिश्च द्वयं चत्वारि वा गुणस्थानानि वर्धापने न तव किमपि मूल्यं लगति।।२।। (पार्श्वजिनस्तवन-पत्राङ्क: १६९)

(३२) हे जिन! यस्तव गुणस्तबके न रज्यते स निश्चयेन निर्गुणी जडरुप:। यतस्तव गुणाज्ञानेन स मनुष्यरूपेणाऽपि पशुतुल्य:।।६।।

(गोडिपार्श्वनाथस्तवन-पत्राङ्क: १७५)

(३३) हे परमेश्वर! तव मूर्ति: सज्जननयनानां सुधाञ्जनमिव प्रतिभासते दुर्जनानानां च सूर्य इव दुष्प्रेक्ष्या भवति। अतो यस्तव मूर्तिदर्शनं निर्मलभावेन करोति स निश्चयेन सुखास्पदं भवति।।६।।

(शंखेश्वरपार्श्वनाथजिनस्तवन-पत्राङ्कः १७७)

३४) हे स्वामिन्! अहं तव पल्लवं न मोचयिष्यामि, यावन् शिवसुखं न लप्स्ये। अहं तु भवभ्रमणेनातीव क्षुधितोऽस्मि, तेन पूर्णभोजनं विना न तृप्तिं प्राप्नोमि ।।४।। (शंखेश्वरपार्श्वनाथजिनस्तवन पत्राङ्कः १७८)

(३५) हे प्रभो! यद्यपि तव सेवायां मम क्षतिं त्वं दर्शयसि, तथाऽपि स्वजनं ज्ञात्वा यादृशतादृशेऽपि ममोपरि हितं कर्तव्यम् ।।७।।

बालस्य रुदितं विना माताऽपि न भोजनं दापयति, अतोऽहमपि तव पुरतो यथा तथाऽपि विज्ञप्तिं कुर्वे। कथञ्चिदपि तां पूरय देव! ।।१२।।

(सुरजमंडनश्रीपार्श्वनाथजिनस्तवन-पत्राङ्कः १८०)

(३६) हे गुणनिधे! यथा मातरं विना बालो न स्थातुं शक्नोति तथाऽहमपि तव विरहे न जीवितुं शक्ष्यामि।

अतस्तव गुणसमुदायमेव स्मारं स्मारं दिनानि वाहयामि ।।२।।

हे नाथ! यदि त्वमेकदाऽपि प्रेम धृत्वा मम मनोमन्दिरं समागच्छेस्तर्हि तत्र मम भक्तिभावं दृष्ट्वा पुनर्निर्गन्तुं न शक्नुयाः।।९।।

(राजनगरमंडनश्रीवीरजिन स्तवन-पत्राङ्कः १८४)

(३७) हे स्वामिन्! कस्मिंश्चित् तीर्थे प्रस्तरोऽपि तरति, एवमहमपि तव चरणे विलग्नः सन् निश्चयेन तरिष्यामि। तर्हि कथङ्कारं त्वं मां दूरं स्थापयसि।।३।।

(वीरजिनस्तवन-पत्राङ्कः १८९)

(३८) हे प्रभो! यदाऽहं तव दर्शनं प्राप्नोमि तदाऽहं सुखी भवामि, एवं त्वमवधारय। यदा चाऽहं तव दर्शनाद् दूरं भवामि, तदाऽहं दुःखी भविष्ये, एवमपि त्वं जानीहि।।३।। (वीरविनंति-पत्राङ्कः १९२)

(३९) यथा यथा मुनिर्बहुश्रुतो बहुजनमान्यो बहुशिष्यपरिवारयुक्तो भवति, किन्तु नाऽनुभवज्ञानं प्राप्नोति तर्हि स तथा तथा जिनशासनस्य प्रत्यनिको जायते।।९।।

मम तु सद्गुरुचरणकृपयाऽनुभवज्ञानं हृदये प्रकटितम्। आत्मरतिप्राप्त्याऽहं मन्ये यदुत ममान्तःकरणे सर्वर्द्धिवृद्धिः प्रादुर्भूता ।।१०।।

अनुभवज्ञानप्रकाशेन मम समक्त्वादित्यः प्रबल उदितोऽस्ति, मिथ्याध्वान्तमपि सर्वं नष्टम्, तथा दुर्नयरुपतारकाणामपि सर्वं बलं

विनष्टमस्ति।।११।।

अनुभवज्ञानप्राप्त्या मम हीनस्वरुपमपि निष्फेडितं। यतस्तदवस्थायां परमात्मा स्वयं मम संमुखं दृष्टिं कुर्वन्नास्ते, अतो नाऽहं हीनो भवेयम् ।।१४।।

(सीमंधरजिनस्तवन-पत्राङ्कः १९६)

(४०) जिननामोच्चारणेन सर्ववाञ्छितं फलति, निजजिह्वाऽपि सफला भवति, जिनगुणस्मरणेन च जन्म दिनं च द्वयमपि सफले भवतः।।५।।

(मौनैकादशीस्तवन,ढाळ-२, पत्राङ्कः १९८)

(४१) जगत्यमृतादपि श्रीजिननामस्मरणं मधुरतरं भवति। न तत्समानं किमप्यमृतम्। यतः श्रीजिननामप्रभावेण सुजसमहोदयानि सर्वत्र प्राप्यन्ते।।५।। (मौनैकादशीस्तवन-ढाळ-४,पत्राङ्कः १९९)

(४२) यदि परमात्मा ध्यानेषु प्राप्यते तर्ह्यहं मन्येऽनायासेनाऽपि मम सुरनदी प्राप्ता। प्रभुध्यानेनैव मम जनुः सफलं भवति, सुजसविलासं च प्राप्यते।।५।।

(मौनैकादशीस्तवन, ढाळ-६, पत्राङ्कः २०१)

**(क्रमशः)**

# यशोविजयानां नयोपदेशः

-* मुनिश्रीतीर्थबोधिविजयः

नमो महोपाध्यायप्रवरेभ्यो यशोविजयमुनिवरेभ्यः।

पूज्यपादैर्यदा गङ्गोपकण्ठं विद्यादेवतामुद्दिश्य जापः कृतस्तदा सा वीणावादिनी प्रकटीभूता प्रसन्नीभूता वरदहस्ता च गदितवती 'रे मुने! वरं वृणीष्व'इति। अथैषा किंवदन्ती श्रूयते यदुत- तदा पूज्यपादैर्वरो याचितो भगवति! देहि मे वरद्वितयं एकं वित्त्वमन्यच्च कवित्वमिति।

अयि सकर्णावतंसाः! उत्कर्णीभूय श्रूयताम्, नैतत्सम्भविपदं यदुतैकस्मिन्नेव जने विद्वत्ताऽपि स्यात्, काव्यशक्तिरपि च स्यादिति। विद्वत्तापेक्षते बौद्धिकप्रतिभाम्, काव्यसर्जनशक्तिस्त्वाश्रयेद्धार्दिकप्रतिभाम्। विद्वत्तायै कुटिलतर्ककर्कशा बुद्धिरावश्यकी, कवितायै सरसरसालपेशला हृदयोर्मय आवश्यकाः। विद्वत्तावलम्बते वास्तविकताम्, कवित्वमालम्बते कल्पनामुपमाञ्च। विद्वत्ता वास्तविकं पदार्थं साधयति, कविता त्वसिद्धमसेत्स्यमानमेव च पदार्थं काल्पनिकं साधयति।

१ एतत्तु तैः स्वयमेव स्वरचितगूर्जरसाहित्ये कुत्रचिल्लिखितम्। ''तूं तूठी मुझ उपरे, जाप करत उपगंग।''

* पू.आ.श्री भुवनभानुसूरिसमुदायवर्त्ती।

वास्तवपदार्थसिद्धिरेव विद्वत्ताया: प्रयोजनं परिणामश्च, हृदयोल्लासश्चित्त-चमत्कृतिरानन्दरसास्वादनश्चैव कविताया: प्रयोजनं परिणामश्च। अग्रे शुष्क तरुरस्तीति साधयितुं प्रवर्तते यावता विद्वान्, तावताग्रे विरसतरुर्विलसतीति शुष्कतरुणा सहाभेदं प्रतिसन्धाय तेन सहैव विलसितुं प्रवर्तते कवि:। कविमनसि सदैव रसानन्दसागरस्य विलासवेलावृद्धौ निमग्नता, मुखे चानन्दभावो गतचिन्तता च। विद्वन्मनसि गौरवलाघवविचारणा, तर्कापादितकाठिन्यकर्कशता क्लिष्टता मुखे च व्यग्रता सचिन्तता गम्भीरता च।

कल्पनां कुर्म:, कीदृशा उपाध्यायप्रवरा अभविष्यन्निति। किमेते विद्वांस इवाभविष्यन् यदुत कवय इव?, तेषां मुखे विद्वज्जनसदृश्यौ गभीरताप्रौढते स्याताम्, यदुत कविजनसदृङ्नर्ममधुरता? तेषां मनो विदुष इव कर्कशमभविष्यत्, कवेरिव कोमलं वा?

किमपि स्यान्नाम, एतावत्तु सत्यमेव यत्तेषां कवित्वमपि सिद्धं, वित्त्वमपि च। तै र्विरचितास्तर्ककर्कशा अपि कृतय:, सम्पादिता रसास्वादकमनीयापि कृतय:। घोघानगरे सागरतीरमुपाश्रयमावसत: पूज्यपादस्य दृशोरग्रे नैकान् प्रवहणान् स्वपीठ मिवोद्यतो उल्लालयन् ब्रह्माण्डं स्वोदरे गलयितुमिव रत्नाकर: परिदृश्यते स्म। तं दृष्ट्वैतेषां रसानुभूतिरुच्छलिता, प्रवहिता च प्रतिभा। अमुद्रामन्दोल्लासमुद्रामुद्रितं समुद्रं तत्पीठोल्ललन्तं जनक्रयाणकवाहकं प्रवहणञ्च दृष्टवद्भि: महोपाध्यायै: कविहृदयैर्निर्मित एक: पद्यग्रन्थ: गूर्जरभाषया तच्च **समुद्रवहाणसंवाद** इति सार्थकनाम्ना भूवलये प्रसिद्धिमगात्। चतुर्विंशतिजिनानां स्तवनानि तैर्नैकश: शतश: सहस्रशश्च निर्मितानि। संस्कृतभाषायां स्तुतिचतुर्विंशतिकापि चैका तेषामुपलभ्यते।

स्ववयसोऽन्तिमेषु वत्सरेषु पूज्यपादा विशेषतो जिनभक्तियोगे निमग्ना अभवन्निति तेषां तत्कालीना: कृतय: ख्यापयन्ति । तथाहि-

**सारमेतन्मया लब्धं, श्रुताब्धेरवगाहनात्।**

**भक्तिर्भागवती बीजं, परमानन्दसम्पदाम् ।।**

तथा च गूर्जरभाषायामपि तैरेवं गीतम्-

**मुक्तिथी अधिक तुज भक्ति मुज मन वसी,**

**जेहसुं सबल प्रतिबन्ध लागो ।**

**चमक पाषाण जिम लोहने खींचशे,**

**मुक्तिने सहज तुज भक्तिरागो ।।**

जीवनसन्ध्यायां पूज्यपादा भक्तियोगनैर्भर्यं तदेवं प्राप्तवन्तः, किन्तु जीवनमध्याह्ने ज्ञानयोगे निमग्नास्तमाम्, तत्फलतश्च ज्ञानसाराध्यात्मसार... इत्यादयः कृतयो निश्चयनयाध्यात्मनयौ पुरस्कुर्वन्त्यो जिनशासनाविष्कृतिं कारयन्त्यः रचिताः।

जीवनोद्गमादामध्याह्नं तु पूज्यानां नितरामभिरुचिः कर्मयोगे-"**प्रवचनराग एव तरणोपायः**" इत्येवमुद्गायन्त एते पूज्या जिनशासनप्रत्यनीकान् प्रति बद्धवैरा इव बद्धकटयो धृतलेखनीकरवाला धारितपत्रवर्माणः साक्षाद्युद्धमेव प्रवर्तितवन्त इव। लौकिकं लोकोत्तरं च कुशासनं समुच्छेत्तुं धृतैकलक्ष्यास्ते समर्पितजिनशासनैकजीवनाः कर्मयोगं धरन्तो भृशमभासन्त।

कर्मयोगकाले च मन्ये तेषां व्यक्तित्वस्यांशीभूतः कविः कुत्रचित् प्रच्छन्नीभूतः, शूरो विद्वान् जिनशासनप्रवचनावहेलनाया नितरामसहिष्णुश्च प्रवचनानुरागी कश्चन समर्पितक्षत्रिय एव प्रकटीभूतः।

तैस्तत्काले येऽनेके ग्रन्थाः रचिताः, तांस्तर्ककर्कशान् ग्रन्थान् वयं पठितुमपि न समर्थाः, अत्रैकः प्रश्न उदेति यत् ते लिखितुं कथं समर्थीभूताः? कृतयस्ता नितरां क्लिष्टतमा आसन्। लब्धतर्कविभूषणादिख्यातयोऽपि पण्डितास्तेषां तान् ग्रन्थान् पठन्तः पाठयन्तश्च मुह्यन्ति, क्लिश्यन्ति, भ्रश्यन्ति, संदिह्यन्ति, नितरां विमृशन्ति, सुदीर्घं विचार्यान्ततोऽपि '**अत्रैवं कथनाशयः स्यात्**' इत्येवं स्यात्काराश्रितमेव निर्णयं श्रावयन्ति, ग्रन्थगम्भीरतावशात् लाघववशात् प्रतिपादनशैलीक्लिष्टता-वशाच्चासंदिग्धं निश्चयं कर्तुं न पारयन्त्यद्यापि विपश्चितोऽनेके। इतरग्रन्थानां नैकपत्राणि दिनमध्येऽधीतवन्तो विद्वांसः पूज्यपादग्रथितग्रन्थानां कियत्योऽपि पङ्क्तय एव कृच्छ्रेण ज्ञातुं पारयन्ति। गंभीरता लाघवता तर्ककर्कशता च पूज्यपाद-ग्रथिततर्कग्रन्थानां लक्षणम्।

परन्तु क्लिष्टतरक्लिष्टतमेषु तेषां ग्रन्थेषु यः प्रवचननिष्यन्दोऽन्तर्निहितो भवति, स प्रायश इतरलेखकग्रथितग्रन्थेषु दुर्लभ्य एव। न चैते केवलं शुष्कवादरसिका एव, किन्तु जिनवचनानुसारि मौलिकतत्त्वं सतर्कमुपस्थापयन्तस्ते पदार्थसार्थ-सिद्धिकरणप्रवणाः। अतः पाठकेभ्यस्तेषां ग्रन्थास्तर्कप्रचुरा अपि विशिष्टं मौलिकं प्रवचननिष्यन्दमास्वादयमाना भृशं रोचन्ते। प्रमेयान्ते यदा ज्ञानं किञ्चनार्जितमिति च योऽन्तस्तोषोऽनुभूयते पाठकैः, स हि तर्कप्रचुरगंभीरदुरधिगमग्रन्थाधिगमक्लेशश्रमौ विस्मारयति, ज्ञानसमाधौ मग्नतानुभूयते पाठकैः।

महोपाध्यायानां बहुरेव कालस्तावता प्रवचनरक्षणकरणानां श्रीमद्धरिभद्रसूरि वरादिपूर्वपुरुषगन्थानुसारिप्रकरणानामागमिकपदार्थानुगप्रकरणीभूतानां च तर्कग्रन्थानां निष्टङ्कन एव व्यतीयाय। स कालो यदा महोपाध्याया धरित्रीमपावयन् स सङ्क्रान्तिक एवासीत्, पूज्याचार्यजगद्गुरुहीरसूरीणां पूज्याचार्यसवाईहीरलाश्रीसेनसूरिवराणां शासनं सद्य एव व्यतिक्रान्तमासीत्। तदा तिग्मरोचिःप्रकाशे खद्योता इवैतत्सूरिद्वयसाम्राज्येऽलब्धप्रसराः, प्रवचनापलापिनो, विपरीततया प्रवचन-सूत्रार्थप्ररूपिण, एकान्तवादिनोऽनेके मनागस्थिरीभूते गच्छसाम्राज्ये बहिरुद्गतवन्तः स्वतुच्छप्रभया च जनाकर्षणाय प्रचलिताःस्तानरुध्नन् महोपाध्याय-प्रवरज्योतिरालयः।

जिनप्रवचनस्यानेकान्तवादस्य च निजपवित्रे हृदयेऽस्ताघ एव सागरो यदुच्छलन्नासीत्, तेन प्रेरितोऽयं पूज्यपादो महान्तमेकं ग्रंथशिरोमणिं प्रवचनचूडामणिं, तर्कमलयाद्रिं, ग्रन्थगजेन्द्रशास्त्रं व्यरचयत्, तन्नाम '**नयोपदेश**' इति।

तर्ककर्कशा अपि पूज्यपादीयग्रन्था यदि पङ्क्तिशः कक्षातश्च स्थापयेरंस्तदा प्रथमकक्षायां प्रथमपङ्क्तौ सर्वप्रथमं स्थानं सम्प्राप्तवदेतद् ग्रन्थरत्नमेव नितरां शोभेततमां षण्णां दर्शनानां वैशिष्ट्येन च नैयायिकदर्शनस्याऽऽन्तं निष्कृतं खण्डनं कृतमत्र, स्याद्वादस्थापना च कृता। जैनेन्द्रप्रवचने दिग्गजतर्कग्रन्थतया येऽग्रगण्या ग्रन्था उल्लिख्यन्ते, तथाहि-द्वादशारनयचक्रः, सम्मतितर्कः, अनेकान्तजयपताका, शास्त्रवार्तासमुच्चयः, प्रमाणनयतत्वालोकालङ्कारः, स्याद्वारत्नाकरः, रत्नाकरा-

वतारिकानाम्न्यौ टीके, स्याद्वादमञ्जरीत्यादयः। तेषु सर्वेषु चूडामणिसमान मस्त्येतच्छास्त्रम्। पूज्यपादैस्स्वयमपि स्याद्वादग्रन्था लिखिता अनेकान्तव्यवस्था, स्याद्वादरहस्यम्, शास्त्रवार्तासमुच्चयोपरि स्याद्वादकल्पलताख्यटीका, तेभ्योऽपि सर्वेभ्यो गंभीतरमं गहनतमञ्च सविस्तरं विवेचनं ग्रन्थे समावेशितं वर्तते।

षड्दर्शनानां तलस्पर्शिकमभ्यासं कृत्वा यदा ते पारङ्गता अभिवष्यन्, नैकशो रहस्यान्तान्, नैकांश्च शतकान्तान् ग्रन्थान् ग्रथित्वा, यदैते ग्रन्थरचनानिपुणा अभविष्यन्, सर्वषड्दर्शनतर्कसर्वस्वसारं निष्पीड्य यदैते लब्धसारत्त्वमगमिष्यन्, तदा तेषां मनीषोज्जाताभविष्यन्निर्भरतया विस्तृततया च जैनागमरहस्यं स्याद्वादश्चो-ल्लिखितुम्। तदैतैर्विनियोगकुशलैरेषो नयोपदेशो ग्रन्थो लिखितोऽभविष्यदिति मन्ये।

नयानामेतेषां त्रयो ग्रन्थाः नयप्रदीपः, नयरहस्यम्, नयोपदेशश्च। त्रयोऽपि क्रमशः प्राथमिकमाध्यमिकोच्चतरकक्षाकाः। नयोपदेशं पठितवान्न नयज्ञाने मनागप्यज्ञो भवितेति मन्तव्यं मम।

अस्त्यत्र नयोपदेशे स्वोपज्ञनयामृततरङ्गिणीनामक्लिष्टकर्कशतर्कपेशल टीकोपरि तरङ्गिणीतरणीनाम्नी टीका लावण्यसूरिभी रचितपूर्वा, अन्या तु मयाऽधुना देवगुरुकृपाप्रसादेनाऽऽलिख्यमाना वर्तते। यथासरलतरं रचने मया प्रयतितमास्ते, नयोपदेशरसास्वादनमाह्लादयति, क्लेशं श्रमं तु कारयत्येव। एतादृग्ग्रन्थग्रथितवद्भ्यः महोपाध्यायेभ्यश्चित्तं नम्रीभवति नमस्तेभ्यो नमस्तेभ्यो न्यायाचार्यवरेण्येभ्यः।

अत्र ग्रन्थे तावताऽभाववादाऽपेक्षाबुद्धिवादचित्ररुपवादविशिष्ट वैशिष्ट्य-बुद्धिवादेत्यादयो दीर्घाः प्रमेयास्तलस्पर्शितया प्रासङ्गिकानुप्रासङ्गिकपुरस्सरं च नितरां लाघवेन प्रदर्शितास्सन्ति।

विद्वान्कविर्विजयते महोपाध्यायपुङ्गवः ।

**योऽस्मादृगनुकम्पैकप्ररितो मुनिपुङ्गवः ।**

**नैकान् ग्रन्थानग्रथ्नात् स, जीयाद् वाचकसत्तमः ।।**

न्यायाचार्याणां सुविहितशिरोमणीनां सुविशुद्धसच्चारित्रपरिपालकानां तेषामुपाध्यायप्रवराणामाशीर्वादानामधिकारी को भवेदित्याहुस्ते स्वयमेव

स्वकृतन्यायालोकग्रन्थप्रशस्त्यां, तथाहि-

**तेभ्यः कृताञ्जलिरयं, तेषामेषा च मम विशेषकाशीः।**

**ये जिनवचोऽनुरक्ता, ग्रथ्नन्ति पठन्ति शास्त्राणि ।।५।।**

तेषामाशीरभिलाषुकैः क्रियतां प्रयत्नः शास्त्राभ्यासे ग्रन्थग्रथने च। अन्ते तेषामतीव प्रिय एकः श्लोक उल्लिख्यतेऽत्र मया-

**अस्मादृशां प्रमादग्रस्तानां, चरणकरणहीनानाम्।**

**अब्धौ पोत इवेह, प्रवचनरागः शुभोपायः ।।६।।**

मामप्यालिङ्गतु स महोपाध्यायीयः प्रवचनराग इत्यभिलाषया...

# महोपाध्यायानां माहात्म्यम्

## महोपाध्यायश्रीमद्यशोविजयानां जीवनवृत्तम्

**- *मुनिश्रीरत्नबोधिविजयः**

गुजरातराज्यमनेकेषां सत्पुरुषाणां जन्मभूमिः पुण्यभूमिश्च, तत्रोत्तरस्मिन् विभागेऽणहिलपुरपत्तनाख्यं नगरवरं पृथ्वीमण्डनभूतं शोभते स्म, एकदा तन्नगरं गूर्जरदेशस्य राजधान्यासीत्। तन्नगरं मन्दिर-महात्म-श्रीमद्भिर्मण्डितम्। पत्तनसमीपे धीणोजाख्यो ग्रामः। धीणोजसमीपे कनोडुनामा लघुग्रामः। तत्र नारायणसञ्ज्ञो धर्मनिष्ठो व्यवहार्यवसत्। सौभाग्यदेव्यभिधाना तस्य भार्या। सा सुयोग्यसमये एकं महान्तं तेजस्विनं पुत्ररत्नं प्रसूतवती। पितृभ्यां तस्य नाम स्थापितं जसवंतकुमार इति। जसवंतकुमारस्य जन्मतिथिजन्ममास-जन्मसंवत्सरादिकं तु साम्प्रतं नोपलभ्यते, किन्तु महोपाध्याय**यशोविजय**सम्बन्धि-साहित्यावलोकनेनेदमनुमीयते वैक्रमीय १६४० वर्षस्य पश्चाद् वैक्रमीय १६५० वर्षात् पूर्वं जातः स्यात्। अयं जसवंतकुमार एवैष्यत्कालीना महोपाध्याय**श्रीयशोविजय**गणिवराः। सौभाग्यदेवी कतिभिर्वर्षैरपरं पुत्रं प्रसूतवती। पितृभ्यां तस्य नाम स्थापितं पद्मसिंह इति।

* श्रीप्रेम-भुवनभानुसमुदायवर्त्तिपरमपूज्यवैराग्यदेशनादक्षाचार्यदेवेशश्रीमद्विजयहेमचन्द्रसूरीश्वराणां शिष्यः।

जसवंतकुमार आबाल्यादतीव प्रज्ञावानभवत्। अन्यदा भोजनसमये सम्प्राप्तेऽपि सौभाग्यदेवी न भुक्तवती । अतो जसवंतकुमारोऽपृच्छत्, ''मातः! त्वं किमर्थं न भुङ्क्षे?'' माताऽब्रवीत्, ''भक्तामरस्तोत्रश्रवणादनन्तरमेव भोक्तव्यमिति मम नियमोऽस्ति। प्रतिदिनं गुरुमुखेन भक्तामरस्तोत्रं शृणोमि। तत एव भुञ्जे। अद्य प्रातःकालादेव प्रचण्डा जलवृष्टिर्निरन्तरं प्रवर्तते।

अतोऽहं गुरूपाश्रयं गन्तुं नाशक्नवम्। ततो भक्तामरस्तोत्रश्रवणाभावेन मया न भुक्तम्। जननीवचः श्रुत्वा जसवंतकुमार उक्तवान्, 'मातः! अहं प्रतिदिनं त्वया सार्धमुपाश्रयमागच्छम्। ततो भक्तामरस्तोत्रश्रवणेन भक्तामरस्तोत्रं मम कण्ठस्थ्यभवत्। अद्याहमेव त्वां भक्तामरस्तोत्रं श्रावयामि।' इत्युक्त्वा जसवंतकुमारोऽस्खलिताऽतिविशुद्धस्पष्टोच्चारपूर्वकं भक्तामरस्तोत्रं मातरं श्रावितवान्। ईदृश्यासीत् तस्य स्मरणशक्तिः।

अकबरनृपप्रतिबोधकाचार्यश्रीहीरसूरीश्वराः पुराऽभवन्। तच्छिष्याः सञ्जाता महोपाध्यायश्रीकल्याणविजयगणिवराः। तच्छिष्याः सञ्जाता महोपाध्याय-श्रीलाभविजयगणिवराः। तेषां शिष्या अभवन्महोपाध्यायश्री जितविजयगणिवराः। तेषां गुरुभ्रातर आसन् महोपाध्यायश्रीनयविजयगणिवराः। ते वैक्रमीय १६८७ वर्षे वर्षावासार्थं कुणघेरग्रामे स्थिताः। वर्षावाससमाप्त्यनन्तरं ते कनोडुग्रामं प्राप्ताः। तत्र ते कतिचिद्दिनान्यवसन्। पुत्रयोर्धार्मिकसंस्काराधानार्थं सौभाग्यदेवी प्रतिदिनमुभावपि पुत्रौ जिनदर्शनपूजनार्थं स्वेन सह नीतवती, तत उपाश्रये ते त्रयोऽपि गुरुवर्यान् वन्दितवन्तः। ततस्ते गुरुवर्यान् सुखसातं पृष्ट्वा तान् स्वगृहे भिक्षाग्रहणार्थं विज्ञप्तिमकुर्वन्। उभावपि भ्रातरौ प्रतिदिनं गुरुदेवमुखेन सूत्राणि लब्ध्वा कण्ठस्थीकृतवन्तः। गुरुदेवाः कथा-प्रेरणाभिस्तयोस्त्यागवैराग्यादिगुणानसिञ्चन्। परिणामतो जसवंतकुमारहृदये प्रव्रज्याग्रहण-भावना प्रादुर्भूता। यथा सुवर्णकारः शुद्धं सुवर्णं प्रत्यभिजानाति तथा महोपाध्यायश्रीनय-विजयगणिवर्या जसवंतकुमारस्य तेजस्विमुखविनयविवेकान्वितव्यवहारप्रज्ञाप्रागल्भ्य-धर्मप्रेमप्रमुखगुणान् दृष्ट्वा तस्मिन्नेष्यत्कालीनशासनप्रभावकमहानररत्नं प्रत्यभिज्ञातवन्तः। गुरुभिर्जसवंतकुमारः पृष्टः, 'त्वं कथं पालयिष्यसि?' तेनोक्तं, यथा भवद्भिः संयमजीवनं परिपाल्यते तथा भवत्प्रसादेनैवाहमपि संयमजीवनं पालयिष्यामि।' इत्थं परीक्ष्य गुरुभिस्तद्हृदयवर्त्ति ''वैराग्यं निश्चलं'' इति ज्ञातम्।

ततोन्यदा गुरुभिर्जसवंतकुमारस्य पितरौ प्रोक्तौ, 'पुण्यशालिनौ! युवयोर्बालको जसवंतकुमारः प्रव्रज्य महाशासनप्रभावको भविष्यति, ततो युवाभ्यां स जिनशासनाय

समर्पणीय:। तस्मिन्प्रव्रजिते युवयोरपि ख्यातिर्भविष्यति, ततो युवाभ्यां जसवंतकुमाराय दीक्षाग्रहणानुमति: सहर्षं देया। जिनशासनपरमभक्तौ पितरौ चिन्तितवन्तौ, 'यद्यस्मत्पुत्रो गृहे स्थास्यति तर्हि कदाचित् स धनवान् भविष्यति कतिचिद्ग्रामेषु वा ख्यातिमान् भविष्यति, कुटुम्बपरिपालको वा भविष्यति दीपकवदस्मद्गृहं प्रकाशिष्यते। किन्तु यदि स प्रव्रजिष्यति तर्हि स गुणवान् भविष्यति सर्वत्र च ख्यातिमान् भविष्यति जिनशासनपालकश्च भविष्यति सूर्यवच्च भव्यजनमनोगृहसहस्राणि प्रकाशिष्यते, बहूँश्च भव्यान् शिवमार्गं प्रदर्शयिष्यति स्वात्मकल्याणं च करिष्यति। यद्यस्मत्पुत्र: प्रव्रजिष्यति तर्हि तदस्माकमेव गौरवम्।' इत्थं विचिन्त्य हर्षान्वितहृदयाभ्यां पितृभ्यां जसवंतकुमाराय प्रव्रज्याग्रहणानुमतिर्दत्ता।

श्रीसङ्घेन महाशासनप्रभावनानिमित्तं जसवंतकुमारस्य प्रव्रज्याग्रहण-महोत्सवोऽणहिलपुरपत्तने कार्य इति निर्णीतम्। स्वज्येष्ठभ्रातरं संयमस्वीकारप्रह्वं विलोक्य पद्मसिंहोऽपि वैराग्यवासितान्त:करण: प्रव्रज्याग्रहणोत्कोऽभवत्। पितृभ्यां तस्मायपि सानन्दं व्रतग्रहणानुज्ञा दत्ता, वैक्रमीये १६८८ तमे अब्देऽणहिलपुरपत्तने समहोत्सवं सानन्दं सोल्लासं जसवंतकुमारपद्मसिंहयोर्दीक्षा सञ्जाता महोपाध्यायश्रीनयविजयकरकमलाभ्याम्। तदा जनै: प्रचण्डजयनादघोषणा कृता। नूतनदीक्षितमुन्योर्मस्तकोपरि चतुर्विधेन श्रीसङ्घेन सुरभ्यक्षतप्रक्षेपेणाशीर्वृष्टि: कृता:। पितृभ्यामपि पुत्रमुनिभ्यामन्त:करणाशिषो दत्ता:। स्वपुत्रौ प्रव्रजितौ प्रेक्ष्य पित्रोर्नेत्राणि हर्षाश्रुपरिपूर्णानि सञ्जातानि। 'अस्मद्गृहे प्रादुर्भूत: प्रकाशोऽधुना विश्वविश्वप्रकाशनमार्गं प्रस्थास्यति।' इति विचार्य पित्रोर्हृदये प्रमोदभरनिर्भरे सञ्जाते। तदा जसवंतकुमार आसन्नदशाब्दवयस्क आसीत्। पद्मसिंहस्तु ततोपि लघुवयस्क आसीत्। प्रव्रज्यासमये जसवंतकुमारस्य नाम स्थापितं **मुनिर्यशोविजय** इति तथा पद्मसिंहस्य च नाम स्थापितं मुनि: पद्मविजय इति।

प्रव्रज्याप्रदानावसरे गुरुभिस्ताभ्यां सर्वसावद्ययोगत्यागरूपा लघुदीक्षा दत्ता। आवश्यकसूत्रदशवैकालिकसूत्रयोगोद्वहनानन्तरं गुरुभिस्ताभ्यां पञ्चमहाव्रतस्वीकाररूपा बृहद्दीक्षा दत्ता। ततो महोपाध्यायश्रीनयविजया: शिष्यपरिवारेण सह पत्तनाद् विहृत्य राजनगरं प्राप्ता:। नूतनदीक्षिताभ्यां संयमस्वाध्यायसमर्पणादिसाधना: प्रारब्धा:, कुशाग्रधीस्वामिनौ तौ झटित्येव शास्त्राणि पठितवन्तौ, मुनियशोविजयानां प्रज्ञापाटवं पठनैकाग्र्यमासन्नलब्धप्रतिभत्वं, प्रत्युत्तरप्रदाननिपुणतां, धारणाशक्तिं च विलोक्य श्रीसङ्घाग्रण्यस्तान् प्रति भक्तिबहुमानवन्त: सञ्जाता:, ते तेष्वेष्यत्कालीन-महाशासनप्रभावकश्रमणं विलोकितवन्त: । दीक्षादिनादनन्तरं दशवर्षपर्यन्तं

मुनियशोविजयैर्गूर्जरमध्ये शास्त्राभ्यासः कृतः। वैक्रमीय १६९९ वर्षे तैः श्रीसङ्घसमक्षमष्टौ महावधानानि कृतानि। ततो मुनियशोविजयानामसाधारणविद्वत्तया प्रभावितो 'धनजी सुरा' इत्यभिधः सङ्घाग्रणीः महोपाध्यायश्रीनयविजयान् विज्ञपितवान्, 'गुरुदेवाः! मुनियशोविजया आयतौ कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यतुल्या भविष्यन्ति। सम्प्रति गूर्जरमध्ये महापण्डिता न सन्ति। काशी तु विद्याधाम, तत्र दिग्गजपण्डिताः सन्ति। ततो भवद्भिः षड्दर्शनादिशास्त्राभ्यासार्थं मुनियशोविजयाः काशीं नेतव्याः। द्रव्यसमर्पणेनाहमपि तेषामभ्यासे सहायको भविष्यामि।' ततो गुरुदेवाः काशीं प्रति विहृतवन्तः। महापरिश्रमेण ते काशीं प्राप्ताः। तत्र मुनियशोविजयैर्दर्शनशास्त्राणामन्यसाहित्यस्य चाभ्यासः प्रारब्धः। कल्पनातीतधारणाशक्तिग्रहणशक्त्यतितीव्रस्मृत्यद्वितीयकण्ठस्थीकरणशक्त्यादिप्रभावेण तैः संस्कृतभाषा-व्याकरण-काव्य-प्राचीनन्याय-नव्यन्याय-साङ्ख्यमत-वेदान्तमत-मीमांसकमत-बौद्धमत-वैशेषिकमत-नैयायिकमत-चार्वाकमतादीनामभ्यासः कृतः, तैर्दार्शनिकशास्त्राणां प्रचुरोऽभ्यासः कृतः, षड्दर्शनवेत्तृत्वेन तेषां ख्यातिः प्रसृता। नव्यन्याये तु तेषां विद्वत्त्वमद्वितीयमासीत्। स्वबुद्धिप्रतिभया तैरनेकशास्त्रार्थवादेषु विजयः प्राप्तः। तदाध्यापकपण्डिताय प्रतिदिनमेकं रूप्यकं वेतनरूपेण दाप्यते स्म। तत्राभ्यासे द्विसहस्ररूप्यकव्ययो जातः महोपाध्याय**श्रीयशोविजयैः** स्वरचित**द्वात्रिंशद्द्वात्रिंशिका**-प्रशस्त्यामुक्तम्-

> **'प्रकाशार्थं पृथ्व्यास्तरणिरुदयाद्रेरिह यथा,**
> **यथा वा पाथोभृत् सकलजगदर्थं जलनिधेः।**
> **तथा वाराणस्याः सविधमभजन् ते मम कृते,**
> **सतीर्थ्यास्ते तेषां नयविजयविज्ञा विजयिनः।।**

काशीमध्ये पवित्रगङ्गातट उपविश्य तैर्वचःशक्तिविकासकारकं **'ऐँ'** इति बीजमन्त्रं सरस्वतीमन्त्राणि च जप्त्वा शारदा प्रत्यक्षीकृता। तैः शारदासकाशाद् वरो लब्धः। यदुक्तं **तैर्न्यायखण्डनखाद्ये-**

> **'ऐँकारजापवरमाप्य कवित्ववित्त्वं, वाञ्छासुरद्रुमुपगङ्गमभङ्गरङ्गम्।**
> **सूक्तैर्विकाशकुसुमैस्तव वीरशम्भोरम्भोजयोश्चरणयोर्वितनोमि पूजाम्।।'**

लब्धवरप्रभावेण मुनियशोविजयानां प्रज्ञा काव्य-तर्क-दर्शनशास्त्र-भाषासु कल्पवृक्षवत् कल्पनातीतानि फलानि दत्तवत्ती। अत एव तैः स्वरचितग्रन्था **'ऐँ'** इति पदेन प्रारब्धाः।

अन्यदा काशीनरेशसदस्येको महासमर्थो दिग्गजपण्डित उपस्थित:, तदानेकविद्वदधिकारिणां समक्षं मुनियशोविजयैस्तेन सह वाद: कृत:। वादे तै: पण्डित: पराभूत:। तत: काशीनृपेण ते **'न्यायविशारद'** इत्युपाधिना विभूषिता: कृता:। तदानीं मुनियशोविजयैर्जिनशासनस्य महती प्रभावना कृता। तदानीं तैर्नव्यन्यायशैल्या न्यायविषयकं ग्रन्थशतं रचितम्। तदा तद्ग्रन्थरचनकौशल्यं दृष्ट्वा प्रसन्नै: पण्डितवर्यै: सम्मील्य तेभ्यो **'न्यायाचार्य'** इत्युपाधिरर्पिता।

काश्यध्ययनावसरेऽध्यापकाचार्येण सह वार्तालापे जायमाने मुनियशोविजयैर्ज्ञातमध्यापकाचार्यसमीपे न्यायसम्बन्ध्येकोऽतीव महत्त्वपूर्णो ग्रन्थो विद्यते, तं ते विद्यार्थिभ्यो नापाठयदिति। मुनियशोविजयैरभ्यासकृते तद्ग्रन्थप्रदानार्थं तेऽनेकशो विज्ञप्ता:। तथापि ते तद्ग्रन्थं नायच्छन्। अन्यदाचार्ये परग्रामं प्रोषिते मुनियशोविजयैराचार्यभार्यासकाशाद् मृदूक्तिभि: स ग्रन्थ एकमहोरात्रं यावल्लब्ध:। ततो दशसहस्रवृत्तप्रमितस्य तस्य ग्रन्थस्यार्धो भागो मुनियशोविजयै: कण्ठस्थीकृतोऽपरश्चार्धो भागस्तत्सहाध्यायिभिर्मुनिविनयविजयै: कण्ठस्थीकृत:। द्वितीयदिने प्रात:काले ते तं ग्रन्थमाचार्यजायायै प्रत्यर्पयन्, तत उभयमुनिवरै: कण्ठस्थीकृत: स ग्रन्थो लिपीकृत:। ईदृश्यासीत् तेषां तीव्रा स्मरणशक्ति:।

त्रीणि वर्षाणि यावत् तै: काश्यां पठितम्, ततोऽधिकाभ्यासार्थं ते स्वगुरुभि: सहाग्रानगरं प्राप्ता:, तत्र तैर्जैनेतरन्यायाचार्यपण्डितसकाशात् षड्दर्शनादिशास्त्राणां साङ्गोपाङ्गं ज्ञानं प्राप्तम्। तर्कसिद्धान्त-नव्यन्याय-शास्त्राणां परिशीलन-मनन-निदिध्यासनैस्तेऽधिका: पारङ्गता: सञ्जाता: बौद्धिकतर्कतटस्थयुक्तिभिस्ते शास्त्रवचनतत्त्वानि सुष्ठु विज्ञाय विदुष: प्रजाश्च प्रत्यबोधयन्। आग्रानगरे ते चत्वारि हायनानि स्थिता:। तत्राभ्यासार्थं सप्तशतरूप्यकव्ययो जात:। स लाभ आग्राजैनसङ्घेन लब्ध:।

ज्ञानाभ्याससमाप्त्यनन्तरं गूर्जरदेशं प्रति प्रस्थिता: मार्गे तैरनेके वादिन: पराजिता:। गूर्जरराजधानीं राजनगरं प्राप्ता:। तदा राजनगरस्थसङ्घैस् तेषां भव्यं स्वागतं कृतम्। सर्वे जना अहमहमिकया तद्दर्शनकृते आगच्छन्, राजनगरे ते नागपुरीधर्मशालायां स्थिता:। तदा गूर्जरस्य नियोगी (सूबो) महोबतखानो राजनगरे राज्यकार्याणि कृतवान्। मुनियशोविजयानां विद्वत्तया प्रशंसया च रञ्जितान्त:करणेन तेन ते राज्यसदसि निमन्त्रिता:। तद्विज्ञप्त्या तैस्तत्र धारणाशक्त्याष्टादशावधानानि कृतानि। तेषां विद्वत्तया स्मृतिशक्त्या च प्रसन्नीभूय तेन तेषां बहुमानं कृतम्, प्रशंसा कृता। राजाडम्बरेण सह तेन ते तन्निवासस्थाने प्रेषिता:।

वैक्रमीय १७१८ संवत्सरे श्रीसङ्घेन तत्कालीनतपागच्छश्रमण-

सङ्घनायकाचार्य**विजयदेवसूरीश्वरा** विज्ञप्ताः, '**मुनियशोविजया** बहुश्रुता विद्वांसश्च। अतस्ते उपाध्यायपदयोग्याः। ततस्त उपाध्यायपदेन विभूषितव्या इत्यस्माकं विज्ञप्तिः 'देवसूरीश्वरैः श्रीसङ्घस्य विज्ञप्तिः स्वीकृता। इतो मुनियशोविजयैर्विंशति-स्थानकतपआराधना प्रारब्धा। तत्र तपसि मुनिजयसोमविजयादिभिस्तेषां वैयावृत्त्यं कृतम्। सविधितपआराधनापूर्णाहुतौ सत्यां शोभने दिवसे देवसूरीश्वरै र्मुनियशोविजया उपाध्यायपदे प्रतिष्ठिताः। तदानीं श्रीसङ्घमध्ये आचार्य एक एव इति प्रथा आसीत्। ततो महोपाध्याययशोविजयगणिवरा आचार्यपदेन न विभूषिताः। तथाप्यपारज्ञानवैभवबलेन ते सूरिपदयोग्यत्वं तु धृतवन्त एव, सामान्येन जना व्यक्तिं विशेषनाम्ना जानन्ति। परन्तु महोपाध्याययशोविजयगणिवरा 'महोपाध्याया' इति विशेषणेन ख्यातिमन्तोऽभवन्। जनास्तान् 'महोपाध्याया' इति विशेषणेनैव ज्ञातवन्तो, जानन्ति च तेषां विशेषणमपि विशेष्यस्यानर्थान्तरमभवत्। विरलानां जीवन एवेदृशं भवति। इदं तेषां गौरवावहम्।

महोपाध्यायश्रीयशोविजयानां वचनानि टङ्कशालिनीति जने प्रसिद्धानि। विवादनिराकरणार्थं तेषां वचनानि प्रमाणभूतानि मन्यन्ते। तेषां निर्णयः सर्वज्ञनिर्णयतुल्यो गण्यते। अत एव तत्समकालीनमुनिप्रवरैस्ते 'श्रुतकेवलिन' इति विशेषणेन सम्मानिताः। ते श्रुतबलेन केवलितुल्या आसन्। ते तत्त्वस्वरूपं केवलिवदवर्णयन्।

महोपाध्यायश्रीयशोविजयैः प्राकृतसंस्कृतहिन्दीगूर्जरीति चतुर्भाषासु साहित्यं विरचितम्। तैरल्पज्ञविशेषज्ञबालपण्डितसाक्षरनिरक्षरसंयमिसंसार्यादिसर्वजनसुलभं साहित्यं ग्रथितम्। तेषां वचनानि सर्वनयसम्मतानि। तेषां वचनान्यनेकान्तपूतानि सर्वतर्कसिद्धानि च।

तैरागमतर्कन्यायानेकान्तवादतत्त्वज्ञानसाहित्यालङ्कारयोगाध्यात्माचारचरित्रोपदेशकर्माद्यनेकविषयेषु मार्मिकं महत्त्वपूर्णश्च लिखितम्।

तैर्ग्रन्थशतानि विरचितानि, प्राप्यन्ते च तेषां कतिचिद्ग्रन्थाः पूर्णाः कतिचिच्चापूर्णाः। तेषां प्रभूता ग्रन्थाः सम्प्रति नोपलभ्यन्ते। श्वेताम्बराम्नायदीक्षितैरपि तैर्दिगम्बराचार्यकृतमहत्त्वपूर्णग्रन्थानां टीका विरचिताः। जैनमुनिभिरपि तैर्जैनेतरग्रन्थानां टीका गुम्फिताः। इत्थं तेषां पाण्डित्यं सर्वग्राह्यभवत्।

तेषां कृतयः खण्डनस्वरूपाः प्रतिपादनस्वरूपाः समन्वयस्वरूपाश्च। पूर्णपात्रतां प्राप्य यस्तत्कृतीरधीते स जैनागमानां जैनन्यायस्य च प्रायः सम्पूर्णो ज्ञाता भवति।

सद्गुरुकृपापूर्वजन्मतेजोवज्ज्ञानसंस्कारसरस्वतीप्रदत्तवरेतितित्रितयसङ्गमलभ्याऽ-द्वितीयाशक्तिस्तेष्वासीत्।

ते जिनशासने नव्यन्यायस्याद्या विद्वांस आसन्। जैनसिद्धान्तत्याग-वैराग्यप्रधानाचारविषयकग्रन्थानां नव्यन्यायशैल्या रचयितारस्त एव आसन्।

तदानीं जिनशासने चतुरशीतिर्गच्छा आसन्। तेषु सर्वेषु महोपाध्याययशोविजया असाधारणविद्वत्तया प्रसिद्धा आसन्। लघुहरिभद्र-न्यायाचार्य-न्यायविशारद-कूर्चालसरस्वती-सुरगुरु-तार्किकशिरोमणि-इत्याद्यनेकोपाधिभिस्तेऽलङ्कृता अभवन्।

तैः स्वरचित**जैनतर्कभाषा**प्रशस्तावुक्तम्-

''पूर्वं **न्यायविशारद**त्वबिरूदं काश्यां प्रदत्तं बुधैर्-

**न्यायाचार्य**पदं ततः कृतशतग्रन्थस्य यस्यार्पितम्।

शिष्यप्रार्थनया नयादिविजयप्राज्ञोत्तमानां शिशुः,

तत्त्वं किञ्चिदिदं **यशोविजय** इत्याख्याभृदाख्यातवान् ।।१।।

अपरञ्च-तैः स्वरचित**प्रतिमाशतक**स्वोपज्ञवृत्तिप्रस्तावनायामुक्तम्-

'पूर्वं न्यायविशारदत्वबिरुदं काश्यां प्रदत्तं बुधैर्

न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम्।

भव्यप्रार्थनया नयादिविजयप्राज्ञोत्तमानां शिशुः,

सोऽयं ग्रन्थमिमं **यशोविजय** इत्याख्याभृदाख्यातवान् ।।२।।

ततो ज्ञायते तैर्न्यायविषयकं ग्रन्थशतं विरचितम्।

'रहस्य' शब्दाङ्किता अष्टाधिकशतग्रन्थास्तैर्विरचिता इति कथितं तैः स्वरचित**भाषारहस्य**प्रस्तावनायाम्। तथाहि-

'भाषाविशुद्ध्यर्थं रहस्यपदाङ्कितत्तया चिकीर्षिताष्टोत्तरशतग्रन्थान्तर्गत-प्रमारहस्य-स्याद्वादरहस्यादिसजातीयं भाषारहस्यप्रकरणमिदमारभ्यते।' तैरनेकप्राकृत-संस्कृतभाषायां ग्रन्था विरचिताः। तैः स्वरचितानेकग्रन्थानां टीका अपि दृब्धाः। तैरन्यकृतप्राकृतसंस्कृतग्रन्थानां टीका अपि कृताः। तद्विरचिताः स्वल्पा एव ग्रन्थाः साम्प्रतमुपलभ्यन्ते। तेऽपि बहूपकारकाः।

तद्विरचितसर्वग्रन्थेषु तेषामद्भुतं पाण्डित्यं दृश्यते, तेषां तर्कशक्ति-समाधानशक्ती अपूर्वे आस्ताम्। पूर्वाचार्यप्रणीतग्रन्थगतानेकविलक्षणपदार्थांस्ते युक्तिभिः समाहितवन्तः। यद्यपि नव्यन्यायप्रयोगान्विततद्ग्रन्थाः सामान्यजीवैर्दुर्बोधास्तथापि रम्य-पदार्थान्वितत्वेन ते विदुषामानन्ददायकाः, अतस्तेषामध्ययनं विना जिनशासनस्य यथार्थं ज्ञानं साम्प्रतं दुःशकम्। यदि विद्वांसस्तद्ग्रन्थानां सरलभावानुवादं विरचयेयुस्तर्हि

तत्साहाय्येन सामान्यजीवानामपि ज्ञानवृद्धिः स्यात्।

सूत्रनिर्युक्तिभाष्यचूर्णिटीकेति पञ्चाङ्ग्यात्मकश्रीजिनप्रवचनाद् विपरीतं प्ररूपयन्तः प्रवादिनः तैर्दृढं निराकृताः। स्थानकवासिसम्प्रदायस्य दिगम्बरसम्प्रदायस्य चोत्सूत्रमतानि तैर्युक्तिभि र्खण्डितानि। एकान्तनिश्चयवादिन एकान्तव्यवहारवादिनश्च तैरपास्ताः। स्थाने स्थाने तैर्निश्चयव्यवहारावुभौ समर्थितौ। श्रमणसङ्घे प्रविष्टां शिथिलतामपि ते प्रतिकृतवन्तः। कुमतानां युक्तियुक्तखण्डनेन तेषामनेके रिपवः प्रादुर्भूताः। तथापि ते निर्भया धीराः सहनशीला निरपेक्षाश्चाभवन्। यतो **भीरवो मानापेक्षिणश्च सत्यं समर्थयितुं न शक्नुवन्ति।**

महोपाध्यायश्रीयशोविजयैरसत्यस्योन्मूलनेन सत्यस्य च समर्थनेन जिनशासन-स्याद्वितीया भक्तिः कृता।

महोपाध्याय**श्रीयशोविजय**गणिवरसमकालीनमहोपाध्याय**श्रीमानविजय**गणिवरैः स्वरचित**धर्मसङ्ग्रहे** ग्रन्थप्रशस्तौ महोपाध्याय**श्रीयशोविजया** इत्थं प्रशंसिताः-

'सत्तर्ककर्कशधियाखिलदर्शनेषु, मूर्धन्यतामधिगतास्तपगच्छधुर्याः।
काश्यां विजित्य परयूथिकपर्षदोऽग्र्या, विस्तारितप्रवरजैनमतप्रभावाः ।।१०।।
तर्कप्रमाणनयमुख्यविवेचनेन, प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः।
चक्रु**र्यशोविजय**वाचकराजिमुख्या, ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः ।।११।।
बाल इव मन्दगतिरपि सामाचारीविचारदुर्गम्ये,
अत्राभूवं गतिमांस्तेषां हस्तावलम्बेन ।।१२।।'

महोपाध्याय**श्रीयशोविजया**नां षट्शिष्या आसन् । तेऽनेकस्थलेषु विहृतवन्तः। उत्तरप्रदेशगूर्जरराजस्थानराज्येषु तेऽधिकं विहृतवन्तः।

वैक्रमीय १७४३ वर्षे तेषामन्तिमश्चातुर्मासो दर्भावतीनगर्यामभवत्। वैक्रमीय १७४४ वर्षे दर्भावत्यामेव ते स्वर्लोकं प्रति प्रस्थिताः। तेषामग्निसंस्कारस्थले एकं स्मारकं निर्मितम्। तत्र वैक्रमीय १७४५ वर्षे तेषां चरणपादुकयोः प्रतिष्ठा जाता। इत्थं दर्भावतीनगरी पुण्यभूमिरभवत्। (इत्थं जिनशासनगगने प्रकाशमान एको महातेजस्वी सूर्योऽस्तङ्गतः। कोटिशो वन्दना महोपाध्यायश्रीयशोविजयानां पादपद्मयोः।)

## न्यायविशारद-न्यायाचार्य-महोपाध्याय-श्रीमद् यशोविजयकृतग्रन्थानां सूचिः

### * महोपाध्यायश्री यशोविजयविरचितस्वोपज्ञटीकायुक्तग्रन्थानां सूचिः-

१) अध्यात्ममतपरीक्षा स्वोपज्ञटीकायुता।

२) अस्पृशद्गतिवादः (आध्यात्मिकमतखण्डनम्) स्वोपज्ञटीकायुतः।

३) आराधकविराधकचतुर्भङ्गी स्वोपज्ञटीकायुता।

४) उपदेशरहस्यं स्वोपज्ञटीकायुतम्।

५) ऐन्द्रस्तुतिचतुर्विंशतिका स्वोपज्ञटीकायुता।

६) कूपदृष्टान्तविशदीकरणं स्वोपज्ञटीकायुतम्।

७) गुरुतत्त्वविनिश्चयः स्वोपज्ञटीकायुतः।

८) ज्ञानार्णवः स्वोपज्ञटीकायुतः।

९) द्वात्रिंशद्द्वात्रिंशिकाः स्वोपज्ञटीकायुताः।

१०) धर्मपरीक्षा स्वोपज्ञटीकायुता।

११) नयोपदेशः स्वोपज्ञटीकायुतः।

१२) महावीरस्तवः स्वोपज्ञन्यायखण्डनखाद्यटीकायुतः।

१३) प्रतिमाशतकं स्वोपज्ञटीकायुतम्।

१४) भाषारहस्यं स्वोपज्ञटीकायुतम्।

१५) सामाचारीप्रकरणं स्वोपज्ञटीकायुतम्।

### * अन्यकर्तृकग्रन्थविषयकमहोपाध्यायश्रीयशोविजयविरचितटीकानां सूचि :-

**i) श्वेताम्बरग्रन्थटीकाः ।**

१) श्रीशिवशर्मसूरिकृत-कर्मप्रकृतिबृहट्टीका ।

२) श्रीशिवशर्मसूरिकृत-कर्मप्रकृतिलघुटीका (प्रारम्भमात्रप्राप्ता)।

३) श्रीमदुमास्वातिवाचककृततत्त्वार्थाधिगमसूत्रप्रथमाध्यायटीका ।

५) श्रीहरिभद्रसूरिकृतयोगविंशिकाटीका।

६) स्तवपरिज्ञावचूरिः।

७) श्रीहेमचन्द्रसूरिकृतवीतरागस्तोत्राष्टमप्रकाशस्य स्याद्वादरहस्यलघुटीका।

८) स्याद्वादरहस्यमध्यमटीका।

९) स्याद्वादरहस्यबृहट्टीका।

१०) श्रीहरिभद्रसूरिकृतशास्त्रवार्तासमुच्चयस्य स्याद्वादकल्पलताटीका।

११) श्रीहरिभद्रसूरिकृतषोडशकप्रकरणटीका।

१२) स्याद्वादमञ्जरीटीका।

ii) **दिगम्बरग्रन्थटीकाः -**

१) अष्टसहस्री टीका।

iii) **जैनेतरग्रन्थटीकाः -**

१) काव्यप्रकाशटीका।

२) न्यायसिद्धान्तमञ्जरीशब्दखण्डटीका।

३) पातञ्जलयोगसूत्रटीका।

*** महोपाध्यायश्रीयशोविजयविरचितप्राकृतसंस्कृतमूलग्रन्थानां सूचिः -**

१) अध्यात्मसारः।

२) अध्यात्मोपनिषद्।

३) अनेकान्तव्यवस्था (जैनतर्कः) ।

४) आत्मख्यातिः।

५) आर्षभीयचरित्रमहाकाव्यम्।

६) जैनतर्कभाषा।

७) ज्ञानबिन्दुः।

८) ज्ञानसारः।

९) चक्षुःप्राप्यकारितावादः।

१०) तिङन्वयोक्तिः।

११) देवधर्म परीक्षा।

१२) सप्तभङ्गीनयप्रदीपः।

१३) नयरहस्यम्।

१४) न्यायालोकः।

१५) निशाभक्तदुष्टत्वविचारप्रकरणम्।

१६) परमज्योतिःपञ्चविंशतिका।

१७) परमात्मपञ्चविंशतिका।
१८) प्रतिमास्थापनन्यायः।
१९) प्रमेयमाला।
२०) मार्गपरिशुद्धिः।
२१) यतिदिनचर्या।
२२) यतिलक्षणसमुच्चयः।
२३) वादमाला १।
२४) वादमाला २।
२५) वादमाला ३।
२६) विजयप्रभसूरिक्षामणकविज्ञप्तिपत्रम्।
२७) विजयप्रभसूरिस्वाध्यायः।
२८) विजयोल्लासमहाकाव्यम्।
२९) विषयतावादः।
३०) वैराग्यकल्पलता।
३१) वैराग्यरतिः।
३२) सिद्धसहस्रनामकोशः।
३३) स्याद्वादरहस्यपत्रम्।
३४) स्तोत्रावली।
३५) आदिजिनस्तोत्रम्।
३६) गोडिपार्श्वनाथस्तोत्रम्। (काव्यसङ्ख्या १०८)
३७) महावीरस्तवस्तोत्रम्।
३८) वाराणसीपार्श्वनाथस्तोत्रम्। (का.स.२१)
३९) शङ्खेश्वरपार्श्वनाथस्तोत्रम्। (का.स.११३)
४०) शङ्खेश्वरपार्श्वनाथस्तोत्रम्। (का.स.३८)
४१) शङ्खेश्वरपार्श्वनाथस्तोत्रम्। (का.स.३३)
४२) शमीनपार्श्वनाथस्तोत्रम्। (का.स.९)
४३) श्रद्धानजल्पपट्टकः।
४४) समाधिसाम्यद्वात्रिंशिका।

४५) बन्धहेतुभङ्गप्रकरणम्।

* **महोपाध्यायश्रीयशोविजयकृतानामनुपलब्धग्रन्थानां टीकानाञ्च सूचिः -**

१) अध्यात्मबिन्दुः।
२) अध्यात्मोपदेशः।
३) अनेकान्तवादप्रवेशः।
४) आलोकहेतुवादः।
५) हैमछन्दोनुशासनस्वोपज्ञछन्दश्चूडामणिटीकायाष्टीका।
६) हैमकाव्यानुशासनस्वोपज्ञालङ्कारचूडामणिटीकायाष्टीका।
७) ज्ञानसारावचूर्णिः।
८) तत्त्वालोकविवरणम्।
९) त्रिसूत्र्यालोकविवरणम्।
१०) द्रव्यालोकः स्वोपज्ञटीकायुतः।
११) न्यायबिन्दुः।
१२) न्यायवादार्थः।
१३) प्रमारहस्यम्।
१४) मङ्गलवादः।
१५) वादरहस्यम्।
१६) वादार्णवः।
१७) विधिवादः।
१८) वेदान्तनिर्णयः।
१९) वेदान्तविवेकसर्वस्वम्।
२०) शठप्रकरणम्।
२१) श्रीपूज्यलेखः।
२२) सप्तभङ्गीतरङ्गिणी।
२३) सिद्धान्ततर्कपरिष्कारः।
२४) चित्ररूपप्रकाशः।
२५) ज्ञानकर्मसमुच्चयवादः।

*** अन्यकर्तृकमहोपाध्यायश्रीयशोविजयसंशोधितग्रन्थानां सूचिः -**

१) धर्मसङ्ग्रहः सटीको महो०यशोविजयकृतटीप्पनसहितश्च।

२) उपदेशमालाबालावबोधः।

*** महोपाध्यायश्रीयशोविजयसम्पादितग्रन्थानां सूचिः -**

१) द्वादशारनयचक्रोद्धारटीकालेखनादिकम्।

*** महोपाध्यायश्री यशोविजयकृतोपलब्धगूर्जर-हिन्दी-मिश्रकृतयः -**

१) एकादशाङ्गस्वाध्यायः।

२) एकादशगणधरस्वाध्यायः।

३) अष्टादशपापस्थानकस्वाध्यायः।

४) अध्यात्ममतपरीक्षाबालावबोधः।

५) अमृतवल्लिस्वाध्यायौ।

६) आदेशपट्टकः।

७) आनन्दघनाष्टपदी।

८) अष्टदृष्टिस्वाध्यायः।

९) अष्टाधिकशतवचनसङ्ग्रहः।

१०) कायस्थितिस्तवनम्।

११) आरूढपतितस्वाध्यायः।

१२) तिस्रश्चतुर्विंशतिकाः। (पद्यसङ्ख्या ३३६)

१३) यशोविलासः (आध्यात्मिकपदानि) (पद्यसङ्ख्या२४२)

१४) जम्बूस्वाममिरासः (प.स.९९८)

१५) जिनप्रतिमास्थापनस्वाध्यायास्त्रयः।

१६) जेसलमेरपत्रे।

१७) ज्ञानसारबालावबोधः।

१८) तत्त्वार्थाधिगमसूत्रबालावबोधः।

१९) त्रयोदशकाष्ठिकनिबन्धः।

२०) दिक्पटचतुरशीतिवचनानि।
२१) द्रव्यगुणपर्यायरासः स्वोपज्ञस्तबकार्थसहितः।
२२) नवपदपूजा। (श्रीपालरासादुद्धृता:)
२३) नवनिधानस्तवनम्।
२४) नयरहस्यगर्भश्रीसीमन्धरस्वामिविज्ञप्तिस्तवनं सस्तबकम्,(प.स.१२५)
२५) निश्चयव्यवहारगर्भश्रीसीमन्धरजिनस्तवनम्।
२६) नेमिराजीमतिगीतम्।
२७) निश्चयव्यवहारगर्भशान्तिजिनस्तवनम्।
२८) पञ्चपरमेष्ठिगीता। (प.स.१३१)
२९) पञ्चमगणधरभाष्यम्।
३०) प्रतिक्रमणहेतुगर्भस्वाध्यायः।
३१) पञ्चनिर्ग्रन्थिबालावबोधः।
३२) पञ्चकुगुरुस्वाध्यायः।
३३) पञ्चचत्वारिंशदागमस्वाध्यायः।
३४) ब्रह्मगीता।
३५) मौनैकादशीस्तवनम्।
३६) यतिधर्मद्वात्रिंशिका।
३७) विचारबिन्दुः (धर्मपरीक्षावार्त्तिकम्)।
३८) विहरमानजिनविंशतिका। (प.स.१२३)
३९) वीरस्तुतिरूपहुण्डिस्तवनं बालावबोधसहितम्। (प.स.१५०)
४०) श्रीपालरासः (उत्तरार्धः)।
४१) समाधिशतकम्।
४२) समुद्रयानपात्रसंवादः।
४३) संयमश्रेणिविचारस्वाध्यायः स्वोपज्ञस्तबकार्थसहितः।
४४) सम्यकत्वसप्तषष्टिस्थानस्वाध्यायः। (प.स.६५)
४५) सम्यक्त्वचतुष्पदीषट्स्थानकस्वाध्यायः स्वोपज्ञटीकासहितः।
४६) साधुवन्दनारासः। (प.स.१०८)
४७) साम्यशतकम्।

४८) स्थापनाचार्यकल्पस्वाध्यायः।

४९) सिद्धसहस्रनामछन्दः। (प.स.२१)

५०) सिद्धान्तविचारगर्भश्रीसीमन्धरजिनस्तवनं स्तबकार्थसहितम्। (प.स.३५०)

५१) सुगुरुस्वाध्यायः।

५२) तर्कसङ्ग्रहबालावबोधः।

**※ अन्यकर्तृकग्रन्थविषयक-महो०यशोविजयानुवादितानुपलब्धकृतयः**

१) आनन्दघनद्वाविंशतिकाबालावबोधः।

२) अपभ्रंशप्रबन्धः।

**महोपाध्यायश्रीयशोविजयानां गुरुपरम्परा शिष्यपरम्परा च**

- **श्री हीरसूरीश्वराः**
  - **महो. कल्याणवि.**
    - **महो. लाभविजयः**
      - **महो.जीतविजयः**
      - **महो.नयविजयः**
        - **महो.पद्मविजयः**
        - **महो. यशोविजयः**
          - **पंडित गुणविजयः**
            - **पंडित केशरविजयः**
              - **पंडित विनीतविजयः**
                - उक्तश्च-
                - **गणिदेवविजयः**
  - **श्री सेनसूरयः**
    - **विजयदेवसूरीः**
      - **विजयसिंहसूरिः**
        - **क्रियोद्धारकश्रीसत्यविजयः**
      - **विजयप्रभसूरिः**
  - **महो. सोमविजयः**
  - **महो.कीर्त्तिविजयः**
    - **महो. विनयविजयः**

**प्रतिमाशतक**स्वोपज्ञवृत्तिप्रशस्तौ–

लुम्पाकैर्दनुजैरिवाप्तिदुरितैर्दूरे निलीय स्थितं,
शम्भोर्दाम्भिकजृम्भदम्भदलने दम्भोलिराज्ञा धृता।
पक्षोऽवादि शिलोच्चयैः किल निजः कुत्रापि नो दर्शितः,
सुत्रामाधिकधाम्नि **हीरविजये** सूरीश्वरे जाग्रति ।।१०।।

तत्पदाभ्युदयकारिणोऽभवन् सूरयो **विजयसेन**नामकाः।
यैर्विजित्य नृपपर्षदि द्विजान् निर्मितं द्विजपतेर्द्विषद्यशः ।।११।।

तत्पट्टालङ्करणा आसन् **श्रीविजयदेव**सूरिवराः ।
यैः कीर्त्तिमौक्तिकौघैरलङ्कृतं दिग्वधूवृन्दम् ।।१२।।

**श्रीविजयसिंह**सूरिः श्रीमान् **विजयप्रभश्च** सूरिवरः।
तत्पट्टपुष्पदन्तावुभावभूतां महाभागौ ।।१३।।

इतश्च–

श्री**हीरा**न्वयदिनकृत्कृतिप्रकृष्टोपाध्यायास्त्रिभुवनगीतकीर्त्तिवृन्दाः।
षट्तर्कीयदृढपरिरम्भभाग्यभाजः **कल्याणोत्तरविजया**भिधा बभूवुः ।।१४।।

तच्छिष्याः प्रतिगुणधाम **हेमसूरेः श्रीलाभोत्तरविजया**भिधा बभूवुः।
श्री**जीतो**त्तरविजयाभिधानश्री**मन्नयविजयौ** तदीयशिष्यौ ।।१५।।

तदीयचरणाम्बुजश्रयणविस्फुरद्भारतीप्रसादसुपरीक्षितप्रवरशास्त्ररत्नोच्चयैः।
जिनागमविवेचने शिवसुखार्थिनां श्रेयसे यशोविजयवाचकैरयमकारि तत्त्वश्रमः ।।१६।।

उक्तञ्च–

**शान्तसुधारस**प्रशस्तौ महोपाध्याय**श्रीविनयविजयैः–**

श्रीहीरविजयसूरीश्वरशिष्यौ सोदरावभूतां द्वौ।
श्री**सोमविजय**वाचक–वाचकवर**कीर्त्तिविजया**ख्यौ ।।३।।

तत्र च **कीर्त्तिविजय**वाचकशिष्योपाध्याय**विनयविजयेन।**
शान्तसुधारसनामा सन्दृब्धो भावनाप्रबन्धोऽयम् ।।४।।

उक्तञ्च–

योगदृष्टिस्वाध्यायस्तबकान्ते–

'लिखीतं सकलतार्किकचक्रचूडामणी–महोपाध्यायश्री**यशोविजय**गणितत्‌शिष्य सकलपण्डितोत्तमपण्डित**श्रीगुणविजयगणि**तत्‌शिष्यपं.श्री**केसरविजयगणि**तत्‌शिष्यपं.श्री **विनीतविजयगणि**शिष्य**देवविजय**लिपीकृतं श्रीघोघाबंदिरेश्रीनवखण्डापार्श्वनाथप्रसादात्‌ श्रीरस्तु।

# वदन्ति के किम्

**(उपा.यशोविजयः)**

**※ मुनिश्री प्रियङ्करप्रभविजयः**

परमकरुणासागरस्य त्रिशलानन्दनस्यापश्चिमतीर्थपशासननायकस्य श्री वर्धमानस्वामिनो देदीप्यमानपट्टपरम्परायां प्रचण्डपुण्यस्वामिनोऽनेके युगप्रधानाः सूरयो महापुरुषाश्च सार्धद्विसहस्त्र्यामभवन्।

परन्तु तेषां सर्वेषां स्वकीयाद्वितीयप्रतिभयाद्भुतशासनप्रभावनया विपुल-साहित्यरचनया चानेके महापुरुषा मूर्धन्यस्थानं प्राप्तवन्तः।

यथा ते-

१, श्री भद्रबाहुस्वामी

२, श्री वज्रस्वामी

३, श्री सिद्धसेनदिवाकरसूरिः

४, श्री हरिभद्रसूरिः

५, श्री हेमचन्द्राचार्यः

६, श्री विजयहीरसूरिः

इत्यादयोऽनेके महापुरुषा अभवन्। तेषु यस्य नाम सादरं गृह्यते, स

※ मुनिराजोऽयं पू.आ.श्रीकेशरसूरिवरसमुदायवर्त्यस्ति।

न्यायविशारदो न्यायाचार्यो महोपाध्याय: **श्रीयशोविजय**महाराजोऽपि मूर्धन्य आसीत्। अस्मिन् भारतवर्षे तेषां जन्म वैक्रमीयसप्तदशतम्यां शताब्द्यां भूतमासीत्।

तस्य जीवनविषयेऽनेका दन्तकथा: किंवन्दन्त्यश्च सन्ति। तत्र काश्चन कथा:।

## अथ–कथा प्रथमा

**(अध्ययनम्, मतिप्रकर्ष:, द्वादशार-नयचक्रग्रन्थप्राप्ति:, तस्य कण्ठस्थीकरणम् ग्रन्थरचना च)**

उत्तरभारते (प्राय: काश्यां) मुनि: यशोविजयोऽध्ययनार्थमगमत्। तत्र पूज्यपादेन ज्ञातम्– ''द्वादशारनयचक्रनामको ग्रन्थस्तस्याध्यापकस्य द्विजस्य गृहेऽस्ति। किन्तु सोऽध्यापकस्तं ग्रन्थं कस्मा अपि नायच्छत्। अमूल्यस्याद्भुतस्य तस्य ग्रन्थस्य दर्शनस्य पठनस्य चेच्छाभवत्। अथ किं कार्यम्? इति श्रावका: पृष्टा:।

एकदा स द्विजपण्डित: किमपि कार्यवशाद् ग्रामान्तरं जगाम। प्रातस्तु स पण्डित: समागन्तास्ति। महोपाध्याय: श्रावकांस्तद्गृहे प्रेषितवान्। भक्तिमन्तस्ते श्रावका अपि सहर्षं ससामग्र्या तत्र जग्मु:। तत्र गत्वा ते श्रावकास्तद्भार्यायै वस्त्राच्छादितं शोभनं स्थालं ददु:।

द्विजभार्यापि तं स्थालं दृष्ट्वा चकिता जाता। यत: संपूर्णमपि स्थालं रत्नै: पूर्णमासीत्। स्थालं स्वीकृत्य सा श्रावकानप्राक्षीत्– ''किमपि कार्यं स्यात् तर्हि कथ्यताम्।'' तच्छ्रुत्वा विज्ञातवृत्तान्त: श्रावकोऽविलम्बेन पीठस्थप्रतिं प्रत्यङ्गुलिं कुर्वन् प्राह–''अस्य ग्रन्थस्य पठनस्येच्छा वर्तते।''

ब्राह्मणी – गृह्यतामियम् प्रति: शीघ्रं परावर्तनीया च।

श्रावका: – आम्।

इत्युदित्वोपमहोपाध्यायमागमन्। अशेषो वृत्तान्त: कथित: श्रावकै:।

तस्यामेव निशायां रजनीकरस्य ज्योत्स्नायां प्रति विभज्य तौ कल्याणसुहृदौ (पू.महोपाध्यायो यशोविजय:, श्रीविनयविजयश्च) उपविष्टौ ब्रह्ममुहूर्तं यावत् कण्ठस्थीकृतम्। सूर्योदये सति तु तत्प्रति: ब्राह्मणपण्डितवर्यस्य गृहे प्रेषिता।

कण्ठस्था सा प्रति: कतिपयैर्दिनैर्ग्रन्थस्थापि कृता।

वर्तमानकालेऽस्य ग्रन्थस्य सम्पादनं मुनि श्री जम्बूविजयेन कृतमस्ति। तस्य प्रकाशनं च भावनगरस्थात्मानन्दसभया कृतं वर्तते।

खल्वेकस्यां रजन्यामष्टादसहस्रश्लोकप्रमितग्रन्थं कण्ठस्थीकृत्याल्पैर्दिनैः स्तं ग्रन्थं लिपिस्थं कृत्वा पूज्यमहोपाध्यायैरस्मभ्यमद्भूतः सन्देशो दत्तः।

## कथा-द्वितीया

**(द्विजागमनम्, तन्मानगलनम्, अपवर्गवादः, शासनप्रभावना)**

पूज्यमहोपाध्यायस्य विद्वत्तायाः ख्यातिर्भारतवर्षस्य प्रतिस्थानं प्रासरत्। केचिज्जनाः पूज्यमहोपाध्यायं द्रष्टुं वन्दितुं ज्ञातुं तैः सह विवदितुं च, देशविदेशत आगच्छन्ति। किन्तु महोपाध्यायं सम्प्राप्य सर्वेऽपि सहर्षं परावर्तन्ते।

वार्तास्ति कस्यचिद्दिनस्य। पूज्यमहोपाध्यायजिदुपाश्रये समुपविशन् आसीत्। यावत्प्रवचनस्य प्रारम्भ एव संजातस्तावदेव त्रिचतुराः प्राज्ञा द्विजपण्डिता वादार्थं समायाताः। तान् दृष्ट्वा सभा क्षुब्धा। किन्तु महोपाध्यायजितः प्रवचनधारा तादृश्येवास्खलिताभवत्। कस्मिंश्चित्स्थानेऽपि न खण्डिता।

पूज्यमहोपाध्यायस्य प्रसन्नतापूर्णं वदनं दृष्ट्वा प्रायः सर्वेऽपि शान्ता जाताः। किन्तु स्वकीयां विद्वत्तां ज्ञापयितुमेको द्विजः कुङ्कुमम् जग्राह। स्वकीयोष्ठे च लिलेप। मुहूर्तं च यावत्संस्कृतगिरया सम्भाषणमदात्। किन्तु सम्पूर्णेऽपि सम्भाषणे तस्यौष्ठोऽधरं नाऽस्प्राक्षीत्। अतस्तद् दृष्ट्वा सर्वेऽपि श्रोतारो मन्त्रमुग्धा जाताः। पश्चात् सकटाक्षनिक्षेपं महोपाध्यायं प्रत्यद्राक्षीत्।

पूज्यमहोपाध्यायजिन्महाराजोऽपि तस्य अहङ्कारमज्ञासीत्। स्वयं निःस्पृहे सति जिनशासनस्य प्रभावनार्थं तस्याहङ्कारविषापहाराय पूज्यमहोपाध्यायेनापि श्रावकेभ्यः कुङ्कुमं याचितम्। अधरश्च रक्तः। पदोच्चारणविचारणे विना विलम्बम् महोपाध्यायेन मुहूर्त्तद्वयं यावत्प्रवचनं दत्तम्। तथाप्यौष्ठमधरो न पस्पर्श। तद् दृष्ट्वा सर्वेऽपि पण्डिताः सभाजनाश्च सविस्मया सञ्जाताः। जिनशासनस्य भूरि प्रभावना भूता। पूज्यमहोपाध्यायस्य कीर्तिर्दिगन्तरं गता।

अत्रैकः संशयो भवति। द्वयोरोष्ठाधरयोर्मिलनं विना पूज्य महोपाध्यायेन कया रीत्या प्रवचनं दत्तम्!

श्रूयतामत्रपूज्यमहोपाध्यायः स्वकीये प्रवचने ''प्, फ्, ब्, भ्, म्'' इति औष्ठ्यव्यञ्जनानां प्रयोगं नाकार्षीत्। अतस्तस्याधरेणोष्ठो नास्पर्शि।

खलु पूज्यमहोपाध्यायस्याद्वितीयां प्रतिभां दृष्ट्वा सर्वेषामपि मूर्धानो

नमन्त्येव।

कीदृशी प्रतिभा !!!

कीदृशी विद्वत्ता !!!

तथाऽपि

कीदृशी सरलता!!!

एतादृग्गुणानां संयोग: खलु तादृक्षु महात्मसु जन्मजात एव भवति।

धन्यास्ते महात्मान:।

धन्यास्तेषां जनन्य: !!!

## कथा–तृतीया

**(वृद्धा, मति-वृद्धा, महोपाध्यायमानगलनम्, योगिराजानन्दघनमिलनम्)**

पूज्यमहोपाध्याय: काश्यामपाठीत्। तत्रैव तत्रस्थैर्विद्वद्वर्यैस्तस्मै न्यायविशारदन्यायाचार्यादय: पदव्यो दत्ता:।

अन्यदा गूर्जरभक्तानामाग्रहपूर्णां विज्ञप्तिं स्वीकृत्य गूर्जरान् प्रत्यचालीत्। मार्गेऽनेके लघवो विशालाश्च ग्रामा आगता:।

अन्येद्युरेकस्मिँल्लघुग्रामे पूज्यमहोपाध्याय: स्थित:। अनेके भक्तजना: प्रात: प्रात: समुत्थाय दर्शनवन्दनार्थमागच्छन्ति गच्छन्ति च। तदा दण्डसहायेनैका वृद्धापि रथ्यारजोऽवगुण्ठिता शनै: शनै: समायाता। तस्या दृष्टिरपि क्षीणाभवत्, शरीरमपि जीर्णं जातमस्ति। तथापि तस्या मनो न जीर्णं जातमस्ति। अत: सापि वन्दनार्थं कथञ्चित्समायाता। महोपाध्यायश्च सविनयं वन्दित:। सुखशाता च पृष्टा।

तस्मिँल्लघुग्रामस्य लघुवसतौ तस्या: वृद्धाया दृष्टि: पट्टस्य समीपस्थिते पीठे गता। तस्मिन् पीठे पूज्यमहोपाध्यायस्य स्थापनाचार्य: स्थित आसीत्। उपाश्रयोऽपि लघु:। तस्मिन्नपि पूर्वस्मिन् काल उपाश्रयस्य विशेषद्वारवातायनाभावाद् दिवसेऽपि सामान्यतोऽन्धकारस्यैव साम्राज्यं प्रावर्त्तततराम्।

तदा सा जरती नेत्रयोरुपरि स्वकीयं दक्षिणहस्तं संस्थाप्य स्थापनाचार्ये स्फुरतश्चतुरो ध्वजानद्राक्षीत्। चकितीभूय सा महामहोपाध्यायमप्राक्षीत्–''रे गुरुदेव! स्थापनाचार्ये कथममी ध्वजा स्फुरन्त: सन्ति?''

हे मात:! मया चतुर्षु दिक्षु वादिनो जिता: जिनशासनस्य च प्रभावना

कृतास्ति। एतज्ज्ञापनार्थं स्थापनाचार्यस्योपरि लघुपताका: स्थापिता: सन्ति।

प्रौढा प्राह-"भो गुरुदेव! भवद्गुरुदेवा भवद्भ्यो विशेषेण विद्वानासन्न वा?"

महोपाध्यायजित्प्राह-"आम्"

जरती प्राह-"तर्हि भवतो गुरुदेवेभ्योऽपि विद्वांस: पूज्यश्रीहरिभद्रसूरि-कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यपूज्यश्रीहीरसूरीश्वरादय: कतिध्वजानस्थापयन्?"

महोपाध्यायजिदाह "ते महापुरुषा एकमपि ध्वजं नास्थापयन्।"

वृद्धा प्राह-"तर्हि किं भवानेभ्योऽप्यधिको विशेषो वर्तते? यतश्चतुरश्चतुर: ध्वजान् स्थापयति? यदि ज्ञानं ज्ञानिपुरुषं च द्रष्टुं भावना वर्त्तते तर्हि योगिराजमानन्दघनसमीपं गच्छतु भवान्। तेषामसीमा विद्वत्ता तथाप्यङ्हकारस्य लेशोऽपि न वर्तते।"

वृद्धाया मर्मवेधिकां वाचं श्रुत्वा महोपाध्यायस्तस्मिन्नेव समये तांश्चतुरोऽपि ध्वजान् दूरीचकार।

पश्चादातुरतापूर्वकं योगिनमानन्दघनं मीलनाय जगाम। प्रयत्ने प्रभूते सति गिरे: कस्याश्चिद् गुहायां स महापुरुषो मिलित:। वन्दनादिकं कृत्वा महोपाध्यायस्तस्य महापुरुषस्याशीर्वादं जग्राह। कोऽप्यलौकिका शास्त्रचर्चा बभूव। शास्त्रमन्त्रणामध्ये काशीगमनाध्ययनवादविवादशासनप्रभावनादिविषयको वार्तालापो बभूव। तदा महात्मानन्दघनोऽचीकथत्। "रे त्वं तु इयत्पठितवाँस्तर्हि "धम्मो मंगल" इति प्रथमाया गाथाया अर्थं कुरु।" आज्ञां गृहीत्वा महोपाध्यायस्तस्या गाथाया अनेकप्रकारैर्विविधानर्थांश्चकार।

तानर्थान् श्रुत्वा योगिराजानन्दघनो न चकित:। उवाच च "अस्त्यतोऽप्यधिक:?" महोपाध्याय: करौ संयोजितवान् कथितवाँश्च "महात्मन्! अहन्तु रिक्तोस्मि कृपया भवानेव कथयतु।"

पश्चाद् योगिराजानन्दघनो मुक्तमनसा पुष्करावर्तमेघ इव धारासारं ववर्ष, तानर्थान् श्रुत्वा महोपाध्यायो जहर्ष ननर्त च। किन्तु आनन्दघनस्तु स्थित एव। अकथयच्च-"वत्स! त्वयानेके पण्डिता जिता ग्रन्था लिखिता:, सरस्वती साधिता किन्त्वद्यापि, य: कश्चिन्मानलेशो वर्त्तते तं दूरीकुरु।"

एवं जिनशासनस्य वृद्धश्राविकयेमौ द्वौ महापुरुषो संयोजितौ, महोपाध्यायस्य

च गर्वो गालितः। वाचकपुङ्गवस्य एतादृश्यां विद्वत्तायां प्रसिद्धावपि, सत्यां कीदृशी सरलता नम्रता च?।

## कथा-चतुर्थी

**(माराऽऽगमनम्, तारकतीर्थप्राप्तिः, संवेदना च)**

तस्मिन् काले *श्रीपूजजतिनां चाऽधिकप्रभुत्वमासीत्। ते शुद्धसंयमिभ्यः साधुभ्य ईर्षालवो जाताः। अतः शुद्धसंयमिनां प्रवृत्तिं प्रगतिं च द्रष्टुमक्षमा जाताः। कदाचित्कोऽपि संविग्नसाधुः प्रगतिमञ्चति तर्हि तं साधुं मार्गस्थकण्टकमिव दूरीकुर्वन्ति। तस्यां प्रक्रियायां महोपाध्यायोऽप्यागतः। जतिनां स कण्टकवत् प्रतिभाति।

अद्वितीयप्रतिभाम्,
प्रकृष्टविद्वत्ताम्,
अप्रतिमसरलताम्,
नानाविधशासनप्रभावनाम्,
नृपप्रतिबोधनम्,
लोकप्रसिद्धिम्,
लघुवयः,
भक्तानाम् सामर्थ्यम्,
चतुर्दिक्षु प्रसृतं यशः,
महोपाध्यायस्यैतानि सर्वाणि दृष्ट्वा
स्वपक्षे तु
अल्पप्रतिभाम्,
अल्पक्षयोपशमम्,
अहङ्कारसमूहम्,
स्वदेशे पूजनीयताम्,
स्वजनेषु प्रतिबोधनम्,

---

१. तस्मिन् काले भ्रष्टसाधूनां पर्यायवाचकशब्दरूपेण 'जति' शब्दो लोके व्यवहृतोऽतः पारिभाषिकतां प्राप्तोऽयं 'जति' शब्द एव प्रयोक्तव्यः रूढिर्बलीयसी-यथा 'श्रीपूज्य' अपि मठाधिपार्थे वर्त्तते ''श्रीपूज'' इति प्रयोक्तव्यः-इति (अमृतपटेलः)

लोकप्रीत्यभावम्

एतानि सर्वाणि दृष्ट्वा

अधिकतरास्ते सर्वेऽपि महोपाध्यायस्य परपक्षा इवाभवन्। अत: स्वपक्षं संरक्षितुं तैर्मारा प्रेषिता:। संयोगवशान्महोपाध्यायेन ग्रामाद् ग्राममटितम्। पृष्टभागे समागच्छतो मारान् श्रुत्वा महोपाध्यायो ग्रामद्ग्रामं पलायितवान् नैके दिना जाता:, किन्त्वस्या घटनाया अन्तो न जात:।

भाग्यवशादटन्, भ्रमन्, स्वरक्षां कुर्वन् महोपाध्याय: पार्श्वजिनाधिष्ठितं शङ्खेश्वरपुरं प्राप। जिनालयं गत्वा प्रभो: पुर: स्ववेदनां स्वसंवेदनां च प्रकटीचकार । तस्मिन् समये काव्यमिषाद्वाचकवर्यस्य मुखात् संवेदनाशब्दा निर्गता:।

"अब मोहे ऐसी आय बनी,

श्री शङ्खेश्वर पार्श्व ! जिनेश्वर! मेरो तु एक धनी..."

एतत्स्तवनं रचितम्। एवं रीत्या पूज्यमहोपाध्याय: प्रभुं विज्ञप्तवान्। भक्तिं कृत्वा यदा बर्हिनिर्यातस्तदापि सशस्त्रा मारा आसन्। किन्तु ते किञ्चिदप्यनिष्टं कर्तुं न क्षमा:। पूज्यमहोपाध्याय: परमात्मकृपया, गुरुभक्त्या च सुरक्षितोऽभवत्।

**उपसंहार:**

हे महोपाध्याय यशोविजय !

नाहम् भवादृश:

न याचेऽहम् भवद्विद्वत्ताम्

न याचेऽहम् भवत्प्रतिभाम्

न याचेऽहम् भवदुन्नतिम्

याचेऽहं मोक्षाय भवत्छदृशीम् नि:स्पृहताम्

याचेऽहं मोक्षाय भवत्छदृशीम् सरलताम्

याचेऽहं मोक्षाय भवत्छदृशीम् निष्कपटताम्

अन्यत् तु याचेऽहं केवलम् भवदीया कृपा।

अतो ययैकयैव मम मोक्षो भविष्यत्यलमन्यै:।

जिनवाक् वल्लिपाथोद!, जिनमार्गरहस्यद!।

नमस्तुभ्यं...नमस्तुभ्यं...नमस्तुभ्यं नमो नम:।।

# यशोविजयस्य यशःकीर्त्तिः

स्तुत्यष्टकम्

* **मुनिश्रीज्ञानभूषणविजयः**

समग्रदर्शनानां यः, सत्तर्कसूक्ष्मप्रज्ञया ।
रहस्यं प्राप तं वन्दे, यशोविजयवाचकम् ॥१॥

श्रुतिमात्रेण कण्ठस्थीकृतभक्तामरस्तवात् ।
प्रतिज्ञा पूरिता मातु-र्मातृभक्तेन शैशवे ॥२॥

शैक्षत्वेऽपि श्रुतं कीदृग्, हतवान् वादिकुञ्जरः ।
सिंहार्भोऽपि यथा हन्ति, पुरःस्थं जयकुञ्जरम् ॥३॥

सा यशोविजयाभीरी, जीयादुद्धृत्य मन्थनात् ।
श्रुततक्रस्य योगादि-ग्रन्थात्मकं घृतं ददौ ॥४॥

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती। गच्छ-नायकाचार्यविजयहेमभूषणसूरीणां शिष्यः।

दन्तवैद्य:स मिथ्यात्वाऽयश्चणचर्वणाय नु।
द्वात्रिंशद् वज्रदन्तान् नो, ददौ द्वात्रिंशिकात्मकान् ।।५।।

श्री-देव्युपासकाकीर्णे कलौ भारत्यानाश्रया ।
श्री-यशोविजयं प्राप्य जाताश्रयवती क्षिति: ।।६।।

हुण्ड्यादिस्तवनाकल्पान् कुमतिध्वान्तनाशने।
दीपान् गुर्जरभाषायां प्राज्वालयत् स वाचक: ।।७।।

**श्रीयशोविजया**स्याऽहो -ऽद्यापि संगीयते बुधै:।
**यशोगीति: यशो**नामा-ऽकरोत् स सार्थकं खलु ।।८।।

# महातेजाः महाविभूतिः

**(उपा.यशोविजयः)**

**-* मुनी पुण्डरीक-पुनितप्रभविजयौ**

परमसुविहितो जनमनोऽभिनन्ददायी भवति। स यदि परोपकारी स्यात्तर्हि सुवर्णे सुगन्धसंयोगो भवति । यः परस्मिन्नुपकरोति स तत्त्वतस्तु स्वस्मिन्नेवोपकरोति। जिनशासनगगनमण्डले तीर्थङ्करा लोकोद्योतकरा आदित्या बभूवुः। गणधराः शशिनः संजज्ञिरे। पञ्चाचारभृतः प्रवचनरक्षणविचक्षणा आचार्यवर्यास्तारकसमूहा नितरां विरेजिरे।

अस्मिञ्जिनशासनेऽनेक आचार्या बभूवुः। कथ्यते च "बहुरत्ना वसुन्धरा"।

अस्मिन्नेव जिनशासने महाविभूतिरद्वितीयग्रन्थस्रष्टा महामहोपाध्याय-**यशोविजयो**ऽभूत्। तस्य चरितस्य मादृक्जनो वर्णनं कर्तुमक्षमः। तथापि देवगुरुकृपातः लोकोक्त्या यथामति विव्रियते। खलु महतामश्चरितं श्रोतुं को नोत्सहते?

इयम् गूर्जरधरा पवित्रीभूता महात्मनाम् चरणरजसा, अयं गूर्जरदेशः आर्यजनैः सदार्यः देशः। का च तस्य कथा? का च तद्भूतमहात्मनां कथा?

* मुनिराजाविमौ पू.आ.श्री केशरसूरीश्वरसमुदायवर्त्तिनौ स्तः।

अस्मिन्नेव देशे कनोडाख्यं रमणीयं शान्तं लध्वपि सुन्दरं नगरमस्ति। तस्मिन्नगरे जैनानां जैनधर्मस्य च प्रभुत्वमासीत्। नगरे च तस्मिन्नारायणनामा नीति-सम्पन्नो धर्मकर्मसु रत: श्रेष्ठी परिवसति। तस्य च सुगुणा सुशीला धर्मकर्मणि रता सौभाग्यदेवीनाम्नी साक्षाद् धर्मरूपिणी धर्मपत्न्यासीत्। संसारसुखमग्नयोस्तयो: कियान् काल: गत:। एकदा सुस्वप्नसूचित: प्रकृष्टपुण्यशाली पुत्रस्तया सुषुवे, पितृभ्याम् तस्य 'यशवन्त' इति नाम स्थापितम्। गच्छति काले तया पद्मसिंहनामापरोऽजन्यत सुत:। बालौ तौ ववृधाते मातृमनोरथेन सह। क्रमेण सप्ताष्टवार्षिकौ जातौ। सपुत्रमाता प्रतिदिनं जिनालयमुपाश्रयञ्च गच्छन्ती भक्तिं च कुर्वन्त्यासीत्।

अथ चातुर्मासार्थं **मुनिनयविजय:** समायात:। अनेके भव्यजीवा आराधनमग्ना भूता:। अनेके विविधान् नियमान् जगृहु:। अनेकविधा जिनभक्तिर्भूता। सौभाग्यदेव्या अपि प्रतिदिनं भक्तामरस्तोत्रश्रवणस्य नियम आसीत्।

अन्येद्युर्दैवयोगाद् दिनत्रयं यावज्जलवृष्टिर्भूता। तेन कारणेन सौभाग्यदेव्या भक्तामरस्तोत्रस्य पाठो न श्रुत:। अतस्तया किमपि न भक्षितम् खादितं पीतं च। एतत्सर्वम् बालयशवन्तेन दृष्टम्। अतस्तेन पृष्टमरे मातस्त्वया कथं किमपि प्रातर्मध्याह्नसायं च न भक्ष्यते पीयते च तदा मात्रा कथितम्। "भक्तामरस्तोत्रभणनात्, श्रवणाद्वाऽनन्तरमेव नमस्कारप्रत्याख्यानं पार्यम्" इति मे नियमो वर्तते। दिनत्रयान्मयाऽस्य पाठो न श्रुतोऽतो मयान्नजलं न गृहीतम्।

**'परोपकाराय सतां विभूतय:'** इत्युक्तिं स्मारयन् बालयशवन्तेन त्वरया कथितम्। 'हे मात:! स्वस्थीभव' अहं त्वां भक्तामरस्तोत्रं श्रावयिष्यामि। तत्पश्चाच्चास्खलित-गत्या श्री भक्तामरस्तोत्रं बालयशवन्तेन भणितम्। तदा तच्छ्रुत्वा सौभाग्यदेवी चकिता जाता। पृष्टश्च स बाल:। रे वत्स भक्तामरस्तोत्रं त्वया कदा कण्ठस्थीकृतम्? तदा बालयशवन्त उवाच।

रे मात:! नेदं स्तोत्रं कण्ठस्थीकृतम्। किन्तु त्वया सह जिनालयं आगच्छतो ममेदं तत्र पठ्यमानं स्तोत्रं श्रुत्वा कण्ठस्थीजातम्। इति पुत्रवचनं श्रुत्वा तस्या मनसि हर्षो जात:। खलु "महतां किं दुरासदम्"? द्वितीयेऽह्नि तयाष्टमभक्तस्य पारणकं कृतम्।

सप्तदिनेषु व्यतिक्रान्तेषु सत्स्वपि वारिदो न व्यरंसीत्, सर्वाण्यपि स्थलानि

जलमयानि बभुवुः। अष्टमे दिने वर्षा व्यरमत्। तदा सा पुत्रयुगलम् गृहीत्वा जिनालयं गता भक्तामरस्तोत्रस्य श्रवणार्थं। तत्पश्चादुपाश्रयं गत्वा मुनिनयविजयं ववन्दे।

गुरुः पप्रच्छ 'रे श्राविके! अमुष्मिन् वर्षाकाले भक्तामरस्तोत्रश्रवणस्य नियमः पालितो न वा? तदा सोत्तरमदात्- 'गुरुदेव! मम नियमो न खण्डितः'

गुरुरप्राक्षीत् कया रीत्या? तदा तया सम्पूर्णो वृत्तान्तः कथितः। तच्छ्रुत्वा मुनिराजोऽपि विस्मितलोचनोऽभूत्। अचिचिन्तच्च बालोऽयं महाशासनदीपको भावी, महत्यस्य प्रज्ञा? का च वाक्चातुरी?

लघुनि वयसि धारणाग्रहणाप्रतिमशक्तिरस्य बालस्य इति विचिन्त्य तन्मातुर्ययाचे तं बालं शासनाय। हर्षान्विता सापि पुत्ररत्नमदात्।

असौ को बालोऽस्ति?

असौ न्यायविशारदो न्यायाचार्यो महामहोपाध्यायः **श्रीयशोविजय** महाराजः। तस्य सम्बन्धि किञ्चिद् वक्तव्यमिदं प्रस्तूयते।

यथा सूर्ये सति तद्वर्णनं न शोभते। तथापि भक्तिबहुमानाभ्यामावां वर्णितवन्तौ। विक्रमसंवतसप्तदशशताब्द्यां भूतोऽयं महात्मा यशवन्तो ज्येष्ठसहोदरपद्मसिंहेन सह जगद्गुरुहीरसूरीश्वराणां पट्टपरम्परायां नयविजयमुनिसमीपे प्रव्रज्यां गृहीतवान्।

श्री धनजित्सुराख्यः श्रेष्ठिवर्यस्तस्य विशिष्टाध्ययनायार्थिकव्यवस्थां चकार।

त्रीणि वर्षाणि यावत्काश्यां, चत्वारि च काश्मीरेषु पठित्वा प्रकटीतया प्रतिभया काश्यां प्रभावं दर्शयित्वा पण्डितेभ्यो 'न्यायविशारद' 'न्यायाचार्य' इति पदवीद्वयं प्राप्तवान्।

पवित्रगङ्गायास्तीरे **'ऐँ'** पदजापेन सरस्वत्याः कृपा लब्धा। ऐन्द्र-पदेनाङ्कितशताधिकग्रन्थगणस्य रचना कृता। तया रचनया संस्कृतभाषातिसमृद्धा, गूर्जरभाषा च गौरववती भूता। शासनोपकारस्य यत्किञ्चिदृणं प्रत्यर्पितुमनेन महात्मना ज्ञानसाराध्यात्मसारगूर्जरस्तवनचतुर्विंशतिद्रव्यगुणपर्यायरासादयो बह्व्य रचनाः कृताः।

आचार्य-देवसूरेराज्ञया संवत् १७९७ तमेऽब्दे उपाध्यायपदवीमग्रहीत्। संवत्१७८३ तमेऽब्दे दर्भावत्यामनशनं कृत्वा समाधिमरणं प्राप।

# यशोविजयवन्दना

-*मुनिश्री प्रशमरक्षितविजयः

(१)

(तर्जः-अखीयां हरखन लागी...)

वन्दे यशोविजयं सादरं,
कनोडाग्रामे जन्म सुलब्धं, जसवन्तनाम यशोधरम् १
बाल्येऽबालमतिधनवन्तं, धीरतादिसुगुणाकरम् २
श्रीभक्तामरस्तोत्रपठनाद्, मातुर्भक्तौ कृतादरम् ३
श्रीसौभाग्यदेवीजनयित्रीनयनचकोरनिशाकरम् ४
सुविशदवदनं जनमनोहरणं, वचनं दिव्यसुधातिकरम् ५
**मुक्तिप्रभा**धवलितनिजहृदयं, नयनं **प्रशम**रसामृतभरम् ६

(२)

(तर्जः- संयम रंगलाग्यो)

चारित्रपदधरो यशोविजयवरो, जयतु गुणिगणसारो रे १
वैराग्यचित्तमहो
वैराग्यरङ्गतरङ्गितमानसः, संसारनैर्गुण्यधारो रे २

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

पाटणपत्तने जैनायतने, गृहीतः संयमभारो रे ३
**यशोविजयेति** नाम विहितं, विहितसाध्वाचारो रे ४
नयविजयपदपद्मप्रसेवने, भ्रमरायते शुभाकारो रे ५
व्रते रतिः प्रीति र्व्रतिषु, चरणाभरणाधारो रे ६
उपाध्यायश्रीशोभितदेहः, **प्रशमा**मृतावतारो रे ७

(३)

(तर्ज-ऋषभजिनराजमुज...)

न्यायमहासागरं नौम्यहं सादरं,
श्रीयशोविजयवाचकवरम् रे।
विदितजिनवचोनिधिं भव्यकरुणानिधिं,
ज्ञानकृतशासनोपकारतरम्। १
काशीदेशे श्रीवाराणसीनगर्यां,
न्यायशास्त्रमधीतं निपुणमत्या रे।
सर्वदर्शनविद् बहुवादिप्रजिद्,
वादी वादे जितो येन नीत्या । २
परमानन्दितै र्वादिवरजित्वराद्,
न्यायविशारदेति पदवरम् रे।
सर्वच्छात्रैः समं, विद्यागुरुणाऽर्पितम्,
सजयजयोच्चारैः यस्मै परम् रे। ३
श्रुतभक्तिरहो यस्य जीवनेऽद्भुता,
देहनिरपेक्षभावाद् बहुमता ।
न्यायशास्त्राण्यनेकानि विहितान्यहो!
सार्ववचनाविरुद्धानि सता । ४
विदुषां पर्षदि परमप्रतिभा सदा
बुधजनहृदयानन्ददायिनी।
मिथ्याभिमानितिमिरार्कवद् यस्य च
तीर्थकृत् शासनोन्नतिकारिणी । ५
मानसैकाग्रता न्यायशास्त्राच्च स्यात्।
सा क्षपकश्रेणिनिबन्धनं रे।
केवलचित् ततः सर्वलोकवित् ततो
**मुक्ति**सुखमनुपमं **शम**धनं रे । ६

# ग्रन्थकाठिन्याच्चित्तस्थैर्यं खलु

-*मुनिश्री प्रशमरक्षितविजयः

जैनशासनप्रसृताऽनन्ययशसः, स्वपरसमयकुशलाः, वादिमातङ्गपञ्चाननाः, न्यायविशारदपदविभूषिताः, न्यायाचार्यत्वप्रथितकीर्त्तयः, प्रकाण्डप्रज्ञाधारिणः, प्रचण्डप्रतिभासम्पन्नाः, गुरुचरणकमलसेविनो, जैनशासनोन्नतिकारकाः, पूज्यपादा, महामहोपाध्यायश्रीमद्यशोविजया विजयवन्तो भवन्तु।

पूज्योपाध्यायश्रीमद्यशोविजयानां समकालीना विद्वद्पदविभूषिता नैके साधुमहात्मानोऽभवन्, परं च तेषां सदृशः कोऽपि नासीत्। ततो जगज्जनप्रसिद्धानां तेषां प्रामाणिकपुरुषाणां गुणपुष्पावलिसौरभभरः सर्वत्र विस्फुरित एवास्ति, तथापि प्राकृतजनावबोधाय त्वेकस्य गुणपुष्पस्य सौरभं वितनितुं प्रयतते मया।

सर्वत्र प्रथितमेतदस्ति, यद् महोपाध्यायपदप्रतिष्ठितैः श्रीयशोविजयै नैंके ग्रन्था रचिताः, परं च ते न्यायप्राचुर्येण काठिन्यभावं भजमाना दृष्यन्ते। जायते चात्र शङ्का यत् केन कारणेन वाचकवर्यैरेतादृशाः काठिन्यसभरा ग्रन्था रचिताः? सर्वेषामपि ज्ञानार्थिनां चित्तस्थैर्यजननार्थमेव रचिता आसन्निति ज्ञायते विवेकबुद्ध्या।

*दीक्षायुगप्रवर्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

यथा कण्टकपङ्कादिद्रव्यव्याप्ते पथि पथिकश्चितैकाग्र्यं कृत्वा व्रजति, तथा सर्वेऽपि प्राणिनो ज्ञानावबोधेच्छवो ह्येतादृशान् न्यायप्रचुरान् ग्रन्थानाश्रित्य स्थिरैकचित्ता भवेयु:।

केनचिज्जिज्ञासुना पृष्टं यद् शास्त्राध्ययनं किमर्थं कर्त्तव्यम्?

श्रुतकेवलिश्रीशय्यंभवसूरिभि: श्रीदशवैकालिकाख्ये शास्त्रे नवमविनयाध्ययने प्रत्युक्तं यत् शास्त्राध्ययनाच्चत्वारि फलानि प्राप्यन्ते, तेन हेतुना तदध्येतव्यम्,

तद् यथा-चउव्विहा खलु सुयसमाही भवइ, तं जहा-

१. सुयं मे भविस्सइ त्ति अज्झाइयव्वं भवइ

२. एगग्गचित्तो भविस्सामि त्ति अज्झाइयव्वं भवइ

३. अप्पाणं ठावइस्सामि त्ति अज्झाइयव्वं भवइ

४. ठिओ परं ठावइस्सामि त्ति अज्झायइव्वं भवइ

एतेषु शास्त्रोक्तचतु:फलेषु श्रुतज्ञानप्राप्तित एव 'एगग्गचित्तो भविस्सामि त्ति' द्वितीयं फलं भवति, अत: श्रुतज्ञानमपि तदेवाध्येतव्यं, यतश्चित्तैकाग्रतां प्राप्नुयाद्, तत्तु न्यायप्रचुरकाठिन्यभावादियुतशास्त्राध्ययनकरणतो नियमाद् भवति। अहमपि न्यायप्रचुरगन्थसर्जकानां पूज्यश्रीमतां श्रद्धासंवेगादिभावजनकान् सिद्धान्तसमर्थकान् ग्रन्थानभ्यस्य चित्तस्थैर्यं विधातुं प्रभविष्यामीत्याशासे प्रभुं प्रार्थये च।

# भारति प्रत्यक्षम्।

-*मुनिश्री दिव्यदर्शन विजयः

**'ऐं'** इति मन्त्राक्षरः भारतिस्मृतिहेतुकः बीजमन्त्रश्च तस्याराधनकृते साधुप्रष्ठाः सततोद्यमशीला भवन्ति, अप्रमत्ततया च तमाराधयन्ति च, अहन्तु किञ्चिदन्यदेव मन्ये किम्? ऐँ मन्त्रपदम् स्मर्तुकामो यदा भवामि तदा मनसि भारती नायाति किन्तु भारत्यायाति कथम्? पूज्ययशोविजयवाचकावतंसेन स्वग्रन्थारम्भे 'ऐँ' इत्येवं सार्वत्रिकम् माङ्गल्यम् स्वप्रतिभया स्वप्रज्ञया च विन्यस्तम्।

यद्यपि तेषाम् समयसिन्ध्वावगाहनाय विदूरवर्त्यहम् तथाऽपि किञ्चिद् न्यायकोविदेन पूज्य **किर्तीन्द्र**विजयेन कारापितः भारतिकृपापात्रवाचककुलगरिष्ठानां भारतिपरिचयः,

भारतीति **शारदा** सा तु ऐं मन्त्रपदसाध्या।

भारतीति भा इति ज्ञानम् तेषु रति येषां ते पूज्य **यशोविजयवाचकाः** तेऽपि ऐं मन्त्र-पदसाध्या इत्येवं प्रकल्पयामि। अतो ये तु **'ऐं'** पदाराधनाय समुत्सुका भवन्ति तैः प्रणिधानाप्रणिधानेनाऽपि द्वे भारत्यावाराधिते भवत इति वस्तुस्थितिः, तैरेव रचिततर्कभाषागतानि किञ्चिद्रहस्यानि शाब्दबोधवाक्यानि च स्वमत्याऽविष्कुर्वन् दर्शयामि।

अस्मिन् ग्रन्थे प्रमाण-नय-निक्षेपसंयोजना विशदतया कृता वाचकवर्यैः, प्रथमं तावत् प्रमाणस्य लक्षणम् **''स्वपरव्यवसायि''** ज्ञानं इति व्यपादेशि। **'असत्यखण्डनेन विना न सत्यमण्डनम्'** इत्युक्तनीत्या **प्रमाकरणम् प्रमाणम्, अर्थोपलब्धिः प्रमाणम्** इत्येवं ये मन्यन्ते तेषाम् मतः स्वतर्कयुक्त्या खण्डितो लक्षणस्य च पदघटनाऽपि स्याद्वादरीत्या कृता तत्र चाऽद्यगाथाया किञ्चिद् रहस्यम्

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

**ऐन्द्रवृन्दनतं नत्वां जिनं तत्वार्थदेशिनम्।**

**प्रमाणनयनिक्षेपैस्तर्कभाषां तनोम्यहम् ।।१।।**

**टीका**- अहम् तर्कभाषां तनोमीत्यन्वय: । किम् कृत्वा? नत्वा। कम्? 'जिनं' रागादिजेतृत्वात् जिन इत्यनेनापायापगमातिशय: प्रकटित:। नमेति स्वापकर्ष-बोधानुकुलव्यापार इति यावत्, त्वा इति ध्वंसाधिकरणकालवत्त्वम् अनेन चाभिमतदेवतानमस्कारात्मकम् मङ्गलमपि प्रकटितम् ग्रन्थकृता।

ननु किमर्थम् मङ्गलम् इति चेत्? तत्वज्ञै: तन्त्रान्तरेषु निर्दिष्टं तस्य फलात्मकं कारणं नानारुपेण ग्रन्थसमाप्त्यर्थम् प्रेक्षावत: प्रवृत्त्यर्थं वेवमादि, अस्मदीयास्तु यथार्थावबोधरुपत्वेन प्राप्तज्ञानपरिणतिरुपतो व्याचक्षते गौणपक्षे च परिसमाप्तीष्टा इत्युह्यम्, -जिनवृत्तिविषयतानिरुपकस्वापकर्षबोधानुकुलव्यापारप्रतियोगिक-ध्वंसकालवृत्ति इत्येवं शाब्दबोध:, **अहमिति** विशिष्टवक्ता नैकग्रन्थशतरचयिता यो एतादृश तद्वचनादेयता इत्याशय:, **तर्कभाषा** इति-तर्क्यन्ते प्रमितिविषयीक्रियन्त इति तर्का जीवादिसप्तपदार्थास्त एव भाष्यन्तेऽनयेति। अथ कथम् सप्तेति चेत्? उच्यते किञ्चिद् नयवादान्तरेण सप्ततत्त्वविभागाङ्गीकारत्वेन वा, विभागो हि न्यूनाधिकसंख्याव्यवच्छेदफलक: मुमुक्षूणां प्रवृत्तिहेतुविषयत्वमेतावदेवोक्तश्च वाचकै: मोक्षार्थिन: खल्वत्र तत्त्वज्ञाने प्रवर्त्तितव्या: तत्र च हेयस्य संसारस्याश्रवबन्धलक्षणं कारणद्वयम्, उपादेयस्य च मोक्षस्य संवरनिर्झरालक्षणम् मोक्षश्च परमप्रयोजनतयाऽवश्यं वक्तव्य इति मोक्षार्थिनाऽवश्यं वक्तव्यानां सप्तानामपि तत्वानामुपपादनस्य न्याय्यत्वात्। कम् लक्षणम् जिनं? **'ऐन्द्रवृन्दनतं'** इन्द्रसम्बन्धिसमूहेन नतं शाब्दबोधश्चायम्-इन्द्रसम्बन्धिअभिन्नसमूहअविष्वक्भूत उत्साहजन्यभूतकालीनव्यापारजन्यस्वापकर्षबोधोऽनेन पूजातिशय निर्व्यूढ: । ऐं इत्यनेन इष्टबीजप्रणिधानमात्रम् स्वरुचिश्च सूचिता।

पुन: कम् -**'तत्वार्थदेशिनम्'**-तत्त्वेति परमार्थ: यथार्थज्ञानविषयत्वम् पूर्वोक्तसप्ततत्वानीति, अर्थ्यते प्रमितिविषय: क्रियते अनेन, अर्यमाणत्वाद् वा अर्था: तत्वाभिन्नार्थास्तत्वार्था: तान् देशितुं शीलमस्येति देशिनम् तत्वार्थदेशिनम् इति ननु भगवताम् स्वभाव: अस्मदादिवदुतान्यद् कश्चिद् इति चेत्? सत्यम्, भगवद्देशनाया: स्वभाव: मोहाजन्यत्वात् विना चिकीर्षा ही हेतु सर्वत्र इति ध्येयम् अनेन च

ज्ञानवचनातिशयावाविष्कृतौ ननु अतिशयचतुष्ट्यम् किमर्थम् शास्त्रस्यादौ प्रकाश्यते शास्त्रकारिभि: ?

काव्यस्यास्योत्तमत्वख्यापनार्थम् न्यासीकुर्वन्ति इत्याशय:

उक्तञ्च आर्हन्त्यमूलातिशयचतुष्टयोक्ते र्भगवद्विषयकरतिभावपरिपोषादस्य भावध्वनिरावेदितो भवति, त्रिविधम् हि काव्यम् ध्वनिगुणीभूतव्यङ्गचित्रञ्च तमुत्तममध्यमाधमभावै: वर्गीकृतम् काव्यज्ञै:।

प्रकृतमनुसराम: परमार्थाभिन्नार्थनिष्ठविषयतानिरुपकबोधानुकूलविशिष्ट व्यापारानुकूलस्वभाववानिति वचनबोध: प्रमाणमिति -अग्रे वक्ष्यमाणं- प्रमाणञ्च नयश्च निक्षेपश्च इति प्रमाणनयनिक्षेपा स्तै:। अत्र च **धनेन धनवानितिवद्** अभेदे तृतीया, प्रमाणशब्दस्याभ्यर्हितत्वात् सूत्रे पूर्वनिपात इति न नोद्यावकाश:। तर्क भाषाम् तनोमीति पदार्थ: ।

न तर्कभाषा तत्त्वाधिगमोपायरुपा सा चाभिन्ना प्रमाणेनेतिवाक्यै: कथम् पृथगुपादानम् इति वाच्यम् उद्देशवाक्याभिधायकत: साक्षात् सूत्रेऽवतारितम् ग्रन्थकृद्भि: उद्देशो नाम अविशिष्टपदार्थानामुद्देश:, **नाम्नावस्तुसंकीर्तनम्** वा तस्य चातिव्याप्त्यव्याप्तिदोषादिसमयान्तरेभ्य अवसेयम् नेह प्रतन्यते, प्रमाण-नय-निक्षेपाभिन्नतत्वाधिगमोपायनिष्ठविषयता इति शाब्दज्ञानम् **तनोमि** इति - विस्तारयामि नानाजनवृत्तिज्ञानानुकूलव्यापारवान् भवामीत्यर्थ: इयम् प्रतिज्ञा, सा च शिष्यानामवधानफलिका तस्य च शाब्दबोधोऽयम्-बहुजनवृत्तिज्ञानानुकूल-व्यापारानुकुलवर्तमानकालीनव्यापारानुकुलकृतिमान् एकत्वांश्च-(व्यवहार-नयाश्रितशाब्दबोध इति सर्वत्र ज्ञेयम्।

# वैराग्यत्रैविध्यम्

-*सा.श्री क्षमानिधिश्रीः

ऐन्द्रसुखमग्नाः, श्रीपरमेश्वरा आकीटशक्रं लोकं नश्वरसुखे धावन्तं, नश्वरसुखार्थं प्रतिभवं नानाकदर्थनाकदर्थितञ्च दृष्ट्वा निष्कारणकारुण्यपूर्णास्ते भगवन्तः चरमजन्मनि तीर्थं संस्थाप्य परमसुखपथं दर्शितवन्तः। यथाहि ''यत्सुखं शाश्वतं स्वाधीनं, दुःखरहितं तदेव परमसुखं'' तस्य मार्ग एकमात्रं वैराग्यं यतः परैप्युक्तम्- **'वैराग्यमेवाभयं....'**तद्वैराग्यं त्रिधा इति महोपाध्यायपुङ्गवैः- अध्यात्मसारे दुःखगर्भ-मोहगर्भ-ज्ञानगर्भवैराग्यलक्षणम्, वैरागिणोऽपि लक्षणं प्रदर्शितम् तथाहि-

यः कश्चिदपि जन्तु र्यदा पञ्चेन्द्रियविषयसुखं न लभते तदा तस्य **''इयं द्राक्षा आम्ला** इति न्यायेन भवजन्यसुखाद् वैराग्यमुत्पद्यते-तं वैराग्यं महोपाध्यायवर्या दुःखगर्भितं वैराग्यं वदन्ति। तथाहि-

**तद्वैराग्यं स्मृतं दुःखमोहाज्ञानान्वयात्त्रिधा।**
**तत्राद्यं विषयाप्राप्तेः, संसारोद्वेगलक्षणम्।।**

तद्वैराग्यवतां वर्णनं कुर्वद्भिः वाचकवर्यैः प्रोक्तं यद् दुःखगर्भितवैरागिणः

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

धृतमुनिवेषा अपि गृहस्था एव यतो गृहे उदरपूर्त्तिरपि दुर्लभा:, व्रते तु अन्न-पान-पात्र-शय्यादि सर्वं सुलभमिति भावनया गृहितव्रता: नतु सद्वैराग्येण, तेन ते पूर्वमपि न व्रतभावस्थिता: पश्चादपि न। एते सुखशीलतया खानपानादिकं कृत्वा समयपूर्त्यै शेरते न तु कष्टादिकं सहन्ते। एतद् वैरागिणां न कश्चिद् लाभो प्रत्युत आजीविकार्थमुपदेशदानेन ते वाङ्मनसो: दु:खं, भिक्षादिना च कायकष्टमेव प्राप्नुवन्ति। एते कदाचित् स्ववाञ्छितलाभेन व्रतजिहासवोऽपि भवन्ति एते भववृद्धिकारकं वैद्यक-ज्योतिंषशास्त्रादिकं पिपठिषवो भवन्ति, किन्तु शान्तसुधारसमयं सिद्धान्तं कदापि न जिज्ञासवो भवन्ति। तथाहि-

**वेषमात्रभृतोऽप्येते, गृहस्थान्नातिशेरते।**

**न पूर्वोत्थायिनो यस्मान्नापि पश्चान्निपातिन:।।**

**गृहेऽन्नमात्रदौर्लभ्यं, लभ्यन्ते मोदका व्रते।**

**वैराग्यस्यायमर्थो हि, दु:खगर्भस्य लक्षणम् ।।**

* संसारसारतां दृष्ट्वा पञ्चाग्निसहनकन्दमूलादिभक्षणं शीतेऽपि-नदीस्नानादिकायक्लेशकारिणां, मिथ्यादृष्टिनां ये कुशास्त्राऽध्ययनोद्भवं वैराग्यं तद् मोहगर्भम् । यथा-

**कुशास्त्राभ्याससम्भूतं, भवनैर्गुण्यदर्शनात् ।**

**मोहगर्भं तु वैराग्यं, मतं बालतपस्विनाम्।**

* मोहगर्भवैरागिणां शुभपरिणामोऽपि तात्त्विको न, यत आज्ञारुचिस्तेषु नोद्भूता तेषां क्षमाऽपि भस्मच्छन्नवहिनवद् हानिकरा एव, केवलं संसारवृद्ध्यर्थमेव। मिथ्यादृष्टिषु तेषु कुमतशास्त्ररहस्येषु निपुणता, सच्छास्त्ररहस्येषु मन्दता स्वाभिप्रायेण कुतर्कग्रहिलता, सज्जनगुणपरिचयत्याग:, स्वगुणप्रशंसनं, विश्वासघात:, तुच्छाभिप्रायेण संक्लिष्टाशय:, प्रवृत्यां कपटबाहुल्यं, स्वकृतपापाच्छादनं, शक्तिमतिक्रम्य क्रियाकरणाभिलाष:, गुणानुरागवैकल्यं परकृतोपकारविस्मृत्या कृतघ्नता, अदीर्घदर्शितादिदुर्गुणश्रेणि: प्रोल्लसतितराम् इति श्री वाचकपुङ्गवैरेव प्रोक्तम्-

**कुशास्त्रार्थेषु दक्षत्वं, शास्त्रार्थेषु विपर्यय: ।**

**स्वच्छन्दता कुतर्कश्च, गुणवत्संस्तवोज्झनम्।।**

**आत्मोत्कर्षः परद्रोहः, कलहो दम्भजीवनम्।**

**आश्रवाच्छादनं शक्त्युल्लङ्घनेन क्रियादरः ।।**

**गुणानुरागवैधुर्य-मुपकारस्य विस्मृतिः ।**

**अनुबन्धाद्यचिन्ता च, प्रणिधानस्य विच्युतिः ।।**

**श्रद्धामृदुत्वमौद्धत्य-मधैर्य्यमविवेकिता ।**

**वैराग्यस्य द्वितीयस्य, स्मृतेयं लक्षणावली।।**

स्याद्वादलाञ्छितसम्यक्तत्त्वावबुद्धानां, मोक्षोपायसमाचरतां, तत्त्वदर्शिनां, स्वपरागमरहस्यज्ञातॄणां यद् वैराग्यं तद् ज्ञानगर्भम्-तथाहि

**ज्ञानगर्भं तु वैराग्यं, सम्यक्तत्त्वपरिच्छिदः।**

**स्याद्वादिनः शिवोपाय-स्पर्शिनस्तत्त्वदर्शिनः।।**

* ज्ञानगर्भवैरागिणस्तु सर्वज्ञाज्ञयाऽऽगमिकार्थानां, युक्त्या तर्केण च यौक्तिकपदार्थानां स्थानविनियोगकारिणो भवन्ति-

तेषु सूक्ष्मदृष्टिः, मध्यस्थता, सर्वजीवहितचिन्ता, क्रियायां महादरः, लोकमानसे धर्मप्रीतिसमुत्पादनं, परदोषदर्शने आन्ध्यम्, कथने मूकत्वं, श्रवणे बाधिर्यम्, दरिद्रस्यार्थार्जने इव आत्मगुणार्जने महोत्साहः, कामव्यथाविच्छेदनं, मानमर्दनं, मात्सर्यादिदोषदहनं, प्रशमपियूषपाथोधिसमवगाहनं, परमानन्दस्थैर्यम्. इत्यादि सद्गुणसुमनःश्रेणिः सर्वदा विकसतितराम् इति सिद्धसारस्वतैः वाचकवर्यैस्तैः प्रोक्तं यत्-

* **गीतार्थस्यैव वैराग्यं, ज्ञानगर्भं ततः स्थितम्।**

**उपचारदगीतस्याप्यभीष्टं तस्य निश्रया ।**

* **सूक्ष्मेक्षिका च माध्यस्थ्यं, सर्वत्र हितचिन्तनम्।**

**क्रियायामादरो भूयान्, धर्मे लोकस्य योजनम्**

* **चेष्टा परस्य वृतान्ते, मूकान्धबधिरोपमा ।**

**उत्साहः स्वगुणाभ्यासे, दुःस्थस्येव धनार्जने।।**

* **मदनोन्मादवमनं, मदसम्मर्दमर्दनम् ।**
**असूयातन्तुविच्छेदः, समतामृतमज्जनम् ।।**
* **स्वाभावान्नैव चलनं, चिदानन्दमयात्सदा।**
**वैराग्यस्य तृतीयस्य, स्मृतेयं लक्षणावली।।**

एवं त्रिविधवैराग्यत्रिपथगां सन्दर्श्य परमपदपीयूषपिपासूनां प्राणिनां भवसुखपिपासां समुच्छिद्य परमहितवत्सलानां वाचकपुङ्गवानां पदकमले भ्रमरायमाणायाः ममाऽनन्तशः नुति-नति-ततयः ।

श्रेयोऽस्तु वाचकवर्यभक्तानामिति शम् ।

# प्रचंडप्रतिभापतिपुरुषोत्तमपरिचयांशः

-*सा.श्रीविरागदर्शनाश्रीः

विक्रमस्य सप्तदशतमे वर्षे जातो जैनधर्मस्य परमप्रभावको, जैनदर्शनस्य महादार्शनिको, जैन तर्कस्य महातार्किकः षड्दर्शनवेत्ता, गूर्जरस्य महाज्योतिर्धरः श्रीमद् यशोविजयमहाराजो जैनमुनिवर आसीत् । योग्यसमये अहमदाबादस्य जैनसङ्घेन समर्पितेन उपाध्यायपदव्या 'उपाध्यायजी' बभूव। सामान्यतः कोऽपि जनो 'विशेष' नाम्ना ज्ञायते, किन्त्वयं मुनिः जैनसङ्घे विशेषणनाम्ना विख्यातोऽस्ति। इदं ननु महदाश्चर्यमस्ति, तथाहि-"उपाध्याय इदं वदति", इदं तावदुपाध्याय वचनमस्ति। एवमुपाध्यायशब्देन श्रीमद्यशोविजयमहाराज एव गृह्यते । विशेष्यमपि विशेषणस्य पर्यायवाचकं भूतम्। ततः स विरलपुरुषोऽ भूत्। तेषां वचनानां विशिष्टा विरला चैका वार्ता विद्यते । तेषां वाणी 'टंकशालिनी' कथ्यते। तथा चोपाध्यायमहाराजवचनस्य साक्षी 'आगमसाक्षी' अर्थात् आगमवचनं गीयते ।

वर्तमानेऽपि श्रीसङ्घे कोऽपि विवाद उपस्थितः स्यात्, तदा उपाध्याय-महाराजविरचित शास्त्र-टीका वाऽन्तिमप्रमाणं गण्यते। उपाध्यायमहाराज-

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

शास्त्रप्रमाणं नाम सर्वज्ञशास्त्रप्रमाणं मन्यते । तत एव तेषां समकालिक मुनिवरैः स 'श्रुतकेवली' ति अर्थात् शास्त्रस्य सर्वज्ञः' इति विशेषितः । अर्थात् 'श्रुतेन केवली' विशेषितः इदमुक्तं भवति सर्वज्ञतुल्यं पदार्थस्वरुपं वर्णयितुं समर्थ इति विशेषितः ।।

स उपाध्यायभगवान् गुजरातराज्ये **कन्होडुं** ग्रामे **नारायण**व्यवहारिणः सौभाग्यदेवीभार्यायाः कुक्षौ **जशवंत**नाम्ना प्रसूतः । जशवंतः स्वबंधुपद्मसिंहेन सह नयविजयजीगुरुसमीपे दीक्षां गृहीत्वा यशोविजयो मुनिरभूत्। यशोविजयमुनिः राजनगरे वि.सं. १६९९ वर्षे जैन सङ्घसमक्षमष्टावधानानि चकार । अवधानं स्मरणशक्तेः तीव्रतां सूचयति । मुनि यशोविजयकृतावधानेन प्रभावितो धनजीसूरा मुनिश्रीनयविजयगणिनं विज्ञपय्याध्यापयितुं काशीनगरीं प्रहितवान्। तत्र स रजतमुद्राणां द्विसहस्रं व्ययं कृतवान् । तत्र यशोविजयो मुनिः षड्दर्शनं तथा विद्याज्ञानस्य विविधशाखाप्रशाखानामामूलचूलमभ्यासं त्रिवर्षमात्रकालेनाकरोत् । तस्मिन्नुपरि चाद्भुतं प्रभुत्वं तथा विद्वत्सु 'षड्दर्शनवेत्ते'ति प्रख्यातिं प्राप्तः । तत्र स न्यायस्यामूल्यग्रन्थं चिंतामणिग्रन्थमपि पठितवान्।

एकदा स महामुनिः काशीराजसभायां महासमर्थदिग्गजाऽजैन पंडितेन सह शास्त्रार्थं कृत्वा विजयं प्राप्तवान् । तेषामगाधपाण्डित्येन विस्मितकाशीनरेशः 'न्यायविशारदे'ति पदवीं दत्तवान्। तदा स जैनसंस्कृतिज्योतिर्धरः जैनधर्मस्य गूर्जरपुण्यभूमेश्च जयजयकारं कृत्वा जैनशासनशोभां वर्धयामास।

उपाध्यायभगवान् विशेषतः पंडितसाक्षर साधुसंसारिणां ज्ञानार्जनस्य सुलभतायै प्राकृतसंस्कृतभाषायां तथाल्पज्ञबालसामान्यप्रजायै हिन्दी-गूर्जरभाषायां विपुलं साहित्यं रचितवान् । तेषां वाणी सर्वनयसंमता गीयते । तैरागमतर्कन्यायाने-कान्तवादतत्त्वज्ञानसाहित्यालङ्कारछन्दःशास्त्रकाव्यशास्त्रनीतिशास्त्रयोगशास्त्र-चारित्रोपदेशाचारादिप्रभूतेषु विषयेषु मार्मिकं, महत्त्वपूर्णं च लिखितमस्ति। यद्यपि श्रीयशोविजयो मुनिः श्वेतांबर आसीत् तथापि स दिगम्बराचार्यकृतग्रन्थे तथा जैनेतरग्रन्थेष्वपि टीकां रचितवानस्ति। तेषां ग्रन्था: खण्डनात्मकप्रतिपादनात्मक-समन्वयात्मकाः सन्ति। यदि तेषामुपलब्धकृतीनां यथाशक्यप्रयत्नेनाध्ययनं क्रियेत

तर्हि जैनागमस्य, जैनतर्कस्य च ज्ञाता भवेत्। ईदृशी मेधाशक्तिः तथा प्रचंडपुण्यं कस्यचिदेव ललाटे लिखितं भवति। ईदृशी शक्तिः खलु सद्गुरुकृपा, जन्मान्तरस्य तेजस्वीज्ञानसंस्कारः. सरस्वत्याः साक्षात् वरदानमिति त्रिविधसङ्गमस्याधारितास्ति। सोऽनेकविषयानां तलस्पर्शिविद्वत्तया नव्यन्यायमात्मसादकरोत्, तत एव स 'नव्यन्यायस्यावतारेति' विशेषणेन विभूषितः । अत एव स तार्किकशिरोमणिरिति विख्यात आऽऽसीत्। जैनसंघेऽयं नव्यन्यायस्याद्य विद्वानासीत्। जैनसिद्धांतान् तत्त्यागवैराग्यप्रधानाचारांश्च नव्यन्यायस्य माध्यमेन तर्कबद्धकृतिकृदद्वितीयोपाध्याय एवाभूत् ।

काशीनगर्यां गङ्गानदीतटे श्रीयशोविजयगणी सरस्वतीदेव्या ऐंकार मंत्रजापेनोपासनामकृत । शारदादेवीं च तुष्टीकृत्या तर्ककाव्ययोर्वरदानं लब्धवान् । वि.सं. १७४३ वर्षे स डभोईनगरे चातुर्मासार्थमऽवसत् । तत्रैव सोऽनशनं कृत्वा स्वर्गं गतः । अद्य तत्र तस्य देहान्तभूमौ भव्यस्मारकं विद्यते। तत्र तस्य चरणपादुका प्रतिष्ठिताऽस्ति। ईदृगेको नैसर्गिकसर्वतोमुखीप्रतिभायाः तथाऽगाध विद्वत्तायाः स्वामिनो विरलमहापुरुषस्य संपूर्णगुणवर्णनं कर्तुं कुण्ठितबुद्धेः मम शक्तिः कीदृशी? तथापि तद्गुणांशं प्राप्तुकामाऽहं किञ्चिन्मात्रं परिचयांशलेखनेन प्रयासमात्रमकरवम्।

## स्तवनानुवादः

### श्री पार्श्वजिन स्तवनम्

**(मूलं गूर्जगिरायां महो०यशोविजयकृतम्)**

**-*सा.विरागदर्शनाश्रीः**

(१) जय जय जय जय पार्श्वजिनेश!
अंतरिक्षप्रभो! त्रिभुवनतारक! भव्यकमलविकाशदिनेश! ।। जय...

(२) त्वच्चरणशरणं मया कृतं, त्वां विना को भवभञ्जनेशः ।
त्वं भव्यपरमानन्ददाता, परमार्थदर्शी त्वं परमेशः ।। जय...

(३) त्वं ज्ञायकः शिवसुखदायकस्त्वं हितैषः विश्वविश्वेशः ।
त्वं मनोरञ्जनः भवभयभञ्जनः, त्वं केवलकमलाकमलेशः ।। जय...

(४) एकाङ्गुष्ठरुपमपि कर्तुं, कोटिसुरासुरसार्थोऽपि नेशः ।
मन्ये वर्षति सुधारसवृष्टिमीदृग् ते रुपगुणो विशेषः ।। जय...

(५) मम मनोमधुकरस्य मोहनः, त्वं प्रभो! विमलकमलं भुवनेश!
विलसन्ति नयनचकोराः सदैव, दृष्ट्वा तव मुखपूर्णनिशेशम् ।। जय...

(६) दूरे गतः प्रभो! त्वद्दर्शनेन, दुःखदारिद्रयपापौघलेशः ।
सहसा फलति तव गुणकीर्तनम्, वदति **वाचकयशो**मुनीशः ।। जय...

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

# श्री अभिनन्दनजिन स्तवनम्

(१) प्रभो! रे...तव नयनं, मम मनोहारि...प्रभो! रे तव नयनं...
यस्य शोभाविजितं कमलं, तपः करोति जलचारि।। प्रभो रे...
मुखरिपुविधोः शरणं गतो, मृगो गगने वनचारी ।। प्रभो रे...

(२) सहजाञ्जनमंजुले नयने, खञ्जनगर्वगिरिदारि!
मोषितचक्षुचंगिमाचकोरः, अग्निमत्ति दुःखधारी ।। प्रभो रे...

(३) तारा मधुपवत् तेऽतिकाली, मीनवत् चञ्चलतागुणधारी।
का कथनीया नयनशोभा ते, मोहिता सर्वसुरनारी।। प्रभो रे...

(४) उल्लसत्समतारससरसं, जाने गजवरमदभरवारि।
त्रिभुवने को नयनानंदन! जिनाभिनन्दनानुकारी ।। प्रभो रे...

(५) मम मनसि प्रभो! त्वं हि रुचितो, को भवेत् परसुरानुचारी।
**यशो** वदति तव नयनप्रतिकृतिः, मम नयने देहि विस्तारी।। प्रभो रे...

# उद्देशलक्षणविचारः

-*सा.श्री नम्रगिराश्रीः

**ऐन्द्रैर्नतं वीतरागं, संभवं वाचकं तथा।**

**स्मृत्वोद्देशस्य लक्षण-स्पष्टार्थमायते किञ्चिद् ।।**

त्रिविधा ह्यस्य शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेति न्यायभाष्यादौ, अस्मदीयप्रमाणमीमांसायां च दृश्यते।

पूर्वाङ्के लक्षणलक्षणं समाश्रित्य **'उपाध्यायप्रवराणां'** पथस्तत्र भवद्भिः विद्वद्भिः **सम्यग्दर्शनगणिभिः** प्रदर्शितः।

अथोद्देशलक्षणविचार उपाध्यायप्रवरमहोदयपथम् दर्शयितुमायते।

इह भाष्यकृद (**उमास्वातिर**) ध्वदर्शकोऽभूत्।

नयतनयो व्यतनोदकण्टकं तम्।

इति तत्र पदप्रचारमात्रात्

पथिकस्येव ममास्त्वभीष्ट सिद्धिः।।

अथ किं नाम उद्देशः? अत्र कीर्तनमुद्देश इति चेत् तदा कृत् कीर्तन इत्यनेन

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

कीर्तनं नाम शब्दः।

तथा च शङ्खध्वन्यादावतिव्याप्तिस्तस्यापि शब्दरुपत्वात्।

न च सङ्कीर्तनमुद्देशः शङ्खध्वनेः शब्दरुपत्वेऽपि प्रतिपादकत्वरुपेण सम्यक्त्वाभावान्नातिव्याप्तिः (नापि ज, ब, ग, द, शित्यादौ) इत्यत्रातिव्याप्तिः प्रतिपादकत्वस्य वर्णत्वव्याप्यत्वादिति वाच्यम्।

**तथापि-अयं वन्ध्यासुतो याति, खपुष्पकृतशेखरः,**

**शशशृङ्गं समादाय............इत्यादावतिव्याप्तिः।**

न च तद् वारणायादौ वस्त्विति निवेश्यते, तथा च 'वस्तु सङ्कीर्तनम्' इत्येवं लक्षणं संपन्नम्, एवं च शशशृङ्गादेः प्रतिपत्तिजनकशब्दत्वरुपप्रतिपादकशब्दत्व-सत्वेऽपि वस्तुशब्देन स्वरुपसत्तासमाविष्टस्यैवार्थस्य ग्रहणात्, शशशृङ्गपदस्य बौद्धसत्तासमन्वितस्यैवार्थस्य प्रतिपादकत्वान्नातिव्यातिरिति वाच्यम्।

तथापि '' उपयोगवान्'' इत्यत्रातिव्याप्तिस्तस्यापि जीवरुपवस्तु (स्वरुपसत्तासमाविष्ट) प्रतिपादकत्वात्।

न च तद् वारणाय नाम्नेति निवश्यते तथा च **'नाम्ना वस्तुसङ्कीर्तनमुद्देश'** इत्येवमागतम्।

नाम्नेत्यत्र **धनेन धनवानि**तिवदभेदे तृतीया तथा च नामाभिन्नो वस्तु-प्रतिपादकः शब्द इत्येवं पर्यवसति। यद्वा **सामान्यशब्दानां सन्निहितस्य विशेषपरत्वमिति** न्यायेन वस्तुप्रतिपादकशब्देत्यस्य वस्तुप्रतिपादकनामपरत्वम्।

न च 'नाम्ना' इति व्यर्थं, **'व्यर्थं सत् किञ्चित् द्योतयतीति** न्यायेन तात्पर्यग्राहकत्वान्न व्यर्थम् (यथा गम्भीरायाम् नद्याम् घोष इत्यत्र नदीपदस्यैव गम्भीरनदीतटे लक्षकत्वात्, गम्भीरशब्दस्यापाततो व्यर्थत्वेऽपि तात्पर्यग्राहकत्वान्न वैयर्थ्यं तथैवात्र) एवं च वस्तु प्रतिपादकमभिधानमित्येवं निर्गतम्।

तथा च **'उपयोगवान्'** इत्यत्र जीवरुपवस्तुप्रतिपादकशब्दत्व-वत्त्वेऽप्यभिधानत्ववत्त्वाभावान्नातिव्याप्तिरिति वाच्यम्।

तथाप्यु**पयोगवान् जीव** इति लक्षणवाक्येऽतिव्याप्तिर्यतस्तस्य

**'उपयोगवान्'** इति पदघटितत्वेऽपि **'अधिकं प्रविष्टं न तु तद् हानिकरमिति** न्यायेन वस्तुप्रतिपादकाभिधानत्वमक्षतमेव।

न च लक्षणवाक्यस्य वस्तुप्रतिपादकनामत्ववत्त्वेऽपि तेन वस्तुनो द्विधा भानम् भवति-जीवत्त्वेन उपयोगवत्वेन च, अत्र च जीवत्वं लक्ष्यतावच्छेदकम्, लक्ष्या-साधारणधर्मस्यैव लक्ष्यतावच्छेदकत्वादसाधारणधर्मरुपमपि, उपयोगस्त्वसाधारणधर्म एव, तथा च तस्य लक्ष्यतावच्छेदकातिरिक्ता(भिन्न) साधारणधर्मरुपत्वम्।

एवं च लक्षणवाक्यात् लक्ष्यतावच्छेदकरुपेणैव लक्ष्यतावच्छेदकातिरिक्ता साधारणरुपेणापि बोधो भवति किन्तु उद्देशवाक्ये केवललक्ष्यतावच्छेदकरुपेणैव बोध इष्टः, अतः लक्ष्यतावच्छेदकातिरिक्ताऽसाधारणधर्मनिष्ठप्रकारताअनिरुपकलक्ष्यनिष्ठ विशेष्यताशालिशाब्दबोधजनकं वचनमित्येव पर्यवसानान्नातिव्याप्तिः, अयमेव 'लक्ष्यतावच्छेदकातिरिक्ताऽसाधारणधर्मानुपरागेण वस्तुप्रतिपादकं वचनमुद्देश' इत्यस्याप्यर्थ इति वाच्यम्।

एवमपि लक्षणवाक्यस्य लक्ष्यभागे (**उपयोगवान् जीव** इति वाक्यस्य **जीव** इति भागे) ऽतिव्याप्तिः, तस्य लक्ष्यतावच्छेदकातिरिक्ताऽसाधारणधर्मानुपरागेणैव लक्ष्यनिष्ठविशेष्यताशालिशाब्धबोधजनकत्वात् (जीवत्वेनैव जीवबोधकत्वात्)

तद्वारणाय लक्षणवाक्याद्यसमभिव्याहृतत्वमित्यपि पदं निवेशनीयम्, तथा च लक्षणवाक्यस्य लक्ष्यभागे नातिव्याप्तिः, तस्य लक्षणवाक्यसमभिव्याहृतत्वादिति वाच्यम्।

एवमप्येकेन्द्रिय इत्यादिरुपविभागवाक्येऽतिव्याप्तिः, न च तद् लक्ष्यमेव विभागस्य विशेषोद्देशरुपत्वादिति वाच्यम्।

अत्र तु सामान्योद्देशस्यैवाभिप्रेतत्वादितिचेत् लक्षणवाक्याद्यसमभिव्याहृत सामान्यमभिधानमुद्देशः, तथा च विभागस्य विशेषाभिधानरुपत्वान्नातिव्याप्तिः, अत्र च किं सामान्यम्? को वा विशेषः? कतिविधाश्च ते? किंञ्च तल्लक्षणमित्यादि जिज्ञासावता नव्यन्यायपरिष्कृता उपाध्यायप्रवरविरचिता तृतीया वादमाला परिशीलनीया। सामान्यातिरिक्तत्वाभिमानीनां परेषाम् मते त्वेवम् परिष्करणीयम्। लक्षणवाक्याद्यसमभिव्याहृतलक्ष्यतावच्छेदकातिरिक्तासाधारणधर्मनिष्ठप्रकारता-

अनिरुपकलक्ष्यतावच्छेदकनिष्ठप्रकारतानिरुपकलक्ष्यनिष्ठविशेष्यताशालिशाब्द-बोधजनकं वचनमुद्देशः।

तथा च नातिव्याप्तिरेकेन्द्रियत्वस्य लक्ष्यताव्याप्यत्वेऽपि व्यापकत्वाभावात् (लक्ष्यतासमनियतस्यैव लक्ष्यतावच्छेदकत्वात्)।

ननु एवं सति घट इत्याकारक लौकिकवाक्यस्यापि घटोद्देशत्वापत्तिः तस्यापि तादृशघटसामान्याभिधानत्वात्।

न च तद् वारणाय सामान्यं लक्षणपरीक्षावाक्यविषयीभूतत्वं निवेश्यते। न च वाक्यस्य कथम् विषयत्वम्? ज्ञानादीनामेव सविषयकत्वादिति वाच्यम्।

**याचितमणिमण्डनन्यायेन** परेषाम् मते, अस्माकम् मते तू उपयोगपरिणत जीवव्यापारमात्रस्यैव सविषयत्वेन वाक्यस्यापि सविषयकत्वात् (उपाध्याय-प्रवरविरचितप्रमेयमालायाम् विषयतावादेऽष्टमे पत्रे दृष्टव्यमयमेव व्यापारानुबन्धी-विषयतेत्यप्युच्यते प्राचीनैः) इति वाच्यमन्योन्याश्रयात्।

**विशिष्टबुद्धौ विशेषणज्ञानं कारणमिति** न्यायेनोद्देशविशेषणीभूत-लक्षणपरीक्षाज्ञाने सति तद्घटितोद्देशज्ञानम्, उद्देशे कृते सति लक्षणपरीक्षा च क्रियत इति तदनु लक्षणपरीक्षाज्ञानं तथा चोद्देशज्ञाने लक्षणपरीक्षाज्ञानस्य लक्षणपरीक्षाज्ञाने चोद्देशज्ञानस्यापेक्षणात् (अयं च ज्ञप्तावन्योन्याश्रय इति बोध्यम्)।

न च भवत्वन्योन्याश्रयातिव्याप्त्यादिकं तु नास्त्येवेति वाच्यं यतोऽतिव्याप्त्यादिवत्-आत्माश्रयान्योन्याश्रयचक्रकानवस्थानामपि लक्षणदोषत्वं तत्र तत्रोक्तमितिचेन्न शास्त्रविषयीभूतत्वं सामान्ये निवेशनीयमेवं च नान्योन्याश्रय उद्देशज्ञानार्थं लक्षणपरीक्षाज्ञानस्यानपेक्षणात्।

तथा चायं निष्कर्षः = लक्षणवाक्याद्यसमभिव्याहृतशास्त्रविषयीभूत (लक्ष्यतावच्छेदकातिरिक्ताऽसाधारणधर्मानुपरागेण, लक्ष्यतावच्छेदकरुपेणेति स्थानीय) सामान्यनिष्ठविषयताशालिशाब्दबोधजनकं वचनमुद्देशः।

अयमेवोपाध्यायप्रवरैः परिशीलनेन निष्कण्टकीकृतो पन्था इति शम्।

उपजीव्यो ग्रन्थः (वाचकावतंस**श्रीमदुमास्वातिवाचक**विरचिततत्त्वार्थ-भाष्ये प्रथमसूत्रे) **शास्त्रानुपूर्वीविन्यासार्थं तूद्देशमात्रमिदमुच्यते।**

उपाध्यायप्रवरकृततत्त्वार्थटीकायाम् चतुरशीति-पञ्चाशीतिपत्रे-

शास्त्रस्यानुपूर्वी=परिपाटी, तस्या विन्यासो = रचना तत्प्रयोजनार्थम् **तु** शब्दो लाभक्रमप्रदर्शनार्थं, शुश्रूषूणामादरप्रतिपादनार्थं चेत्यूह्यम्। उद्देशमात्रम्-अविशिष्टपदार्थाभिधानमात्रम्, इदमुच्यते-उद्देशवाक्यलक्षणमेतावता यद्यपि विशेषाभिधानप्रयोजकजिज्ञासाजनकसामान्याभिधानत्वे पर्यवस्यति तथापि तत्र न तात्पर्यम्, लक्षितविभागोत्थापके लक्षणवाक्येऽतिप्रसक्तेः, नापि लक्ष्यतावच्छेदकातिरिक्तासाधारणधर्मानुपरागेण वस्तुप्रतिपादकं वचनमुद्देश इत्यपि सम्यक्, लक्षणवाक्यस्य लक्ष्यभागेऽतिव्याप्तेः, तथापि लक्षणवाक्याद्यसमभिव्याहृतं सामान्याभिधानमुद्देश इत्यत्र भाष्यकृतस्तात्पर्यम्, न च सामान्यं लक्षणपरीक्षावाक्य-विषयीभूतत्वं ग्राह्यम्, अन्यथा घट इत्यादिलौकिकवाक्येऽतिव्याप्तेरित्य-न्योन्याश्रयापत्तिरिति शङ्कनीयम्। शास्त्रविषयीभूतसामान्योपादाने तद्दोषाभावादिति दिक्।

# परमानन्दपयोनिधिवाचकवर्याः ।।

।। ऐं नमः ।।

-*सा.श्रीप्रशमनिधिश्रीः

: माङ्गल्यम् :

**ऐन्द्रै पूज्यं प्रशमसुखदं, वर्धमानं प्रणम्य ।**

**स्तोष्ये स्तुत्यां गुरुवरयशोवाचकस्याऽऽप्तवाचम् ।।१।।**

**श्रेयःबोधं समुपलभते, यस्य स्मृत्या जनौघः ।**

**तं वन्देऽहं परमपथदं, वाचकं दर्शनाप्त्यै ।।२।।**

ऐन्द्रवृन्दवन्दितानां, परार्थव्यसनिनां, सर्वजीवसुखदानभावनाफलितप्रकृष्ट-पुण्यशालिनां, परमप्रभूणां तीर्थकृतां शासनं कलिकालेऽपि विजयतेतराम्।

तेषां वचोऽनुरागसिक्तपरमप्रज्ञाप्रतिभापुण्यफलभारविनम्र**श्रीयशोविजय**-वाचकसाहित्यसुरतरुः साम्प्रतमपि तत्त्वबुभुक्षूणां क्षुधां विदारयति, सम्यग्दर्शन-ज्ञान-चरणात्मक-मनोवचःकायपुष्टिञ्च करोति।

श्री**यशोविजय**वाचकवरवाक्सुरसरिता काऽप्यपूर्वा यत्र विस्मयावह ललित-लक्षणालङ्कारगुणकलितकाव्यकमलवनखण्डो रात्रिन्दिवं विकासमान एव

*दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

दृश्यते।

यत्र निमग्ना: कुमतजलचरा: स्वमतप्राणान् द्रुतं विमुञ्चन्ति। यस्या विजयवारिपिपासव: कुवादिनो नैकधा सन्तापं प्राप्नुवन्ति । तेषां तत्त्वपिपासा च प्रतिदिनं वर्धतेतराम् ।

मिथ्यादृष्टिजनास्तत्र निमज्याऽपि कषायकर्मकलिमलं बिभ्रति। दुर्भव्य-भवाभिनन्दिनस्तु तस्या: सुधासमसुभाषितशीतलसीकरैरपि संसृतिसंसरणश्रमं नितरां वर्धयन्ते महोपाध्याययशोविजयवाचकवर्यै: प्रवाहितां तां सुरसरितां संप्राप्य सम्यग्दृष्टयस्तु सम्यग्दर्शनशरीरं पुष्यन्ति, विमलीकुर्वन्ति तत्र सज्जनसारससंदोहा: लीलां कुर्वन्ते।

सा वाक् सुरसरित्शासनानुरागीसूरिशिवशिर: संप्राप्य सुतरां सन्तुष्यति। आबालगोपाङ्गनाप्रायोग्यं तेषां वाक्कामधेनुक्षीरं पायं पायमपि सहृदयहृदयानि अतृप्तिमेवाप्नुवन्ति । नैकभाषायां तै: सर्जनं कृतम् मन्दो वा विद्वान् वा सर्वेऽपि तेषां वाक्चातुर्येण चित्तचमत्कारं दधते । तै र्काव्यात्मकं तत्त्वप्रतिपादकं, तार्किकं, आगमिकं, भक्तिसाहित्यं नैकविधं सर्जनं कृतं। सर्वत्र तेषां लेखिनीगति-रस्खलिताऽभवत् ।

तत्रभवन्तो महोपाध्यायवर्या यद्विषयकसर्जनमुपक्रमते तमाद्यन्तं विवेच्यैव विरमति। प्रतिपादन-समन्वय-खंडनात्मकप्रतिभाप्रभूणां तेषां ग्रन्थाऽभ्यासतो विद्वांस: स्वमताऽऽग्रहं द्रुतमेव विमुञ्चन्ति। सप्तभङ्गी-नय-स्याद्वादमार्गविशदीकरणं तेषां प्रतिपदेप्रतिवाक्येप्रतिग्रन्थे सहजं सरलतया समुपलभ्यते। ग्रन्थारम्भे, मुख्यतया ग्रन्थसमाप्तौ च महाकविवरा: प्रतिविशिष्टं मङ्गलशब्दं प्रयुञ्जते केचित् **'स्वस्ति'**, केचित् **'प्रीति'** रित्यादय: । तदेव महाकवीनां वैशिष्ट्यम्, विशिष्टाभिज्ञानञ्च। वाचकवर्यैस्तदपि स्वसर्जने प्रदर्शितम् यथा-प्रतिग्रन्थम् **'ऐं'** इति शब्द: प्रारम्भे, द्वात्रिंशद्द्वात्रिंशिकायाञ्च प्रतिद्वात्रिंशिकायाश्चरमे श्लोके **'परमानन्द'** शब्द: प्रयुक्त:। एवं सर्वतोमुखीप्रतिभाप्रकर्षेण ते महातार्किका अप्यभवन्महाकविवरा अपि । तै: सर्वजनसाधारणं सर्जनमपि कृतं विद्वद्भोग्यमपि सर्जनं कृतम्।

तेषां गुणगणप्रीत्याऽभिधानानुरागेण च मन्दप्रज्ञयाऽपि मया तेषां महदपि

वचनयशः किञ्चिदेव वर्णयितुं प्रयत्यते।

* यशोगुरोर्यशश्चन्द्रः, स्थितोऽपि शासनाम्बरे ।
नानामतनदीकूपद्रहेषु प्रतिबिम्बितः ।।१।।

* यशोवाणीयशोदीपे, दुर्नयशलभा ध्रुवम् ।
[1]स्वविग्रहं समुन्मुच्य, परमां शान्तिमुपागताः ।।२।।

* यशोवाग्वह्निकुण्डेऽत्र, सर्वे दुर्वादिनां मताः ।
भस्मसादभवत् तस्य, धूमो दिवि स्थितो घनः ।।३।।

* कलिकाले यशोवाणी-यशःस्तम्भो दृढः खलु।
स्थितः शासनप्रासादः, यस्याऽऽधारेण निश्चलः ।।४।।

* यशोवाचकसन्दृब्ध-वाक्यशोऽध्यननाय नु ।
शङ्के शतक्रतुः स्वर्गे, सहस्रनयनोऽभवत् ।।५।।

* यशोवाक्प्रीतिसम्बद्धं, यश आलेखितुं द्रुतम् ।
सहस्रकिरणेनाऽहो!, किं सहस्रकराः कृताः? ।।६।।

* मन्ये यस्याऽद्भुतं श्रुत्वा, वचोऽनन्तयशोऽहिराट् ।
दध्रे सहस्रवक्त्राणि, वन्देऽहं तं यशोगुरुम् ।।७।।

* यशोवाणीसमुद्भूतं, त्रिलोके प्रथितं यशः ।
शक्रज्योतिष्कनागेन्द्रैरेवं तमहं त्रिधा स्तुवे ।।८।। **इति शम्**

---

१-दुर्नयपक्षे स्वाऽऽग्रहकलहं, शलभपक्षे तु स्वशरीरमित्यर्थः।

# उपदेशरहस्यग्रन्थस्य व्याख्यासङ्ग्रहः

**-*श्रेयःशिशुः**

श्री जिनमुखजाह्नवीतः प्रसृतार्थवारिभिः श्रीगणधरभगवद्भिः निष्पादितं सूत्रोद्यानं परिरक्षितुमसमर्थभावि-जीवोपकाराय पूर्वाचार्यभगवद्भिः तदोद्यानसारपुष्पाणि संचित्य ग्रन्थमाला रचिता। परमद्यतना जीवाः तामपि परिधातुमलं न सन्ति, ते जीवा अपि सूत्रोद्यानसुरभिवञ्चिता न स्युरिति सञ्चिन्त्य न्यायविशारदवाचकवर्यश्री- **यशोविजयमुनीन्द्रैः** विशुद्धतरसरस्वतीवैभवबलेन तन्मालायाः स्याद्वाद-भाषाप्रमाणनयोपदेश-रहस्याद्याख्यानि बहूनि कुसुमानि गृहित्वा रक्षितानि तेभ्योऽस्मादृशाम्मन्दभाग्येन कानिचिद् निर्णष्टानि। परमुपदेशरहस्यादिकुसुमान्यद्याप्यम्लानानि तत्परिमलश्च प्रसरन् विद्यन्ते। तत्परिमलः कुतीर्थिकहस्तिमदम-पसारयिता, सज्जनेषु निःश्रेयस्पदपुरुषार्थसंपादकश्च वर्त्तते।

अतो **यदि पुष्पं नास्ति तर्हि पुष्पदलमपि** इत्युक्त्या तदुपदेशरहस्यपुष्पव्याख्यापर्णिकाः गुरुजनेच्छया कर्मक्षयाय च सञ्चिता निःश्रेयसाय समर्पणं क्रियते। तत्परिमलो मादृशां बालजीवानां ग्रन्थपठने किञ्चिद्साहाय्यको भविष्यतीत्यभिलाषा।

| | | | |
|---|---|---|---|
| (१) | नमिउण | - नत्वा, तत्वतः स्वाभेदेनान्तर्भूतध्यातृध्येयभावेन प्रणिधाय | (श्लो.-१) |
| (२) | उपदेशस्य | - हितप्रवृत्त्यनुकुलवाक्यस्य । | (श्लो.१) |
| (३) | रहस्यम् | - उपनिषद्भूतम्। | (श्लो.-१) |

---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्ती।

(४) उत्कृष्टम् - आगमैकाधिकारिकत्वेन मुमुक्षूपादेयत्वादितर ग्रन्थातिशायित्वम्। (श्लो.-१)

(५) बोधनार्थम् - सङ्कलितकतिपयोपादेयार्थपरिज्ञानार्थम्। (श्लो.-१)

(६) सम्यक् - सूत्रोक्तविधिना। (श्लो.-१)
स्वौचित्यानतिलङ्घनेन। (श्लो.-८८)

(७) गुरूभिः - अनुयोगवृद्धैः (श्लो.-१)

(८) लब्ध्वा - प्रकृतितनुकषायत्वादिगुणसमाजेनावाप्य। (श्लो.-२)

(९) सुदुर्लभम् - अतिदूरासादपुनरुत्पत्तिकम्। (श्लो.-२)

(१०) मनुजत्वम् - धर्मश्रवणादिसामग्र्युपहितं नरभवम्। (श्लो.-२)
प्रवर्त्तितव्यः - यथाशक्त्युद्यमो विधेयः। (श्लो.-२)

(११) धर्मे - तपश्चरणाद्यनुष्ठाने । (श्लो.-२)

(१२) निपुणैः - धर्मपरीक्षादक्षैः। (श्लो.-२)

(१३) विप्रतिषिद्धेषु - सर्वदर्शनिनां परस्परमसम्मतेषु । (श्लो.-३)

(१४) विश्वासः - प्रामाण्यप्रतिपत्तिः। (श्लो.-३)

(१५) परमरम्या - सूक्ष्माभोगपूर्विका। (श्लो.-३)

(१६) आज्ञाबाह्या - सूत्रविषयस्वतन्त्रविश्वासाप्रयोज्यप्रवृत्तिका। (श्लो.-३)

(१७) बहुमानम् - बहुः = स्वात्मापेक्षया बलीयान् मानं = नमनं।(श्लो.-५)

(१८) श्रुतोपयोगः - प्रवचनज्ञानं। (श्लो.-६)

(१९) स्वरसवाही - जीवपरिणतिविशेषः। (श्लो.-९)

(२०) मार्गानुसारित्वम् - चेतसोऽवक्रगमनं-भुजङ्गमनलिकायानतुल्यो विशिष्ट-गुणस्थानावाप्तिप्रगुणस्वरसवाही तदनुसरणशीलत्वम्। (श्लो.-६)

(२१) क्रियाजनितः - वितथक्रियाभ्यासमात्रोत्पादितः। (श्लो.-७)

(२२) मण्डूकचूर्णकल्पः- पुनर्भविष्यत्तथापरिणामभेकातिसूक्ष्मक्षोदतुल्यः।(श्लो.-७)

(२३) मोहकृता - मृगतृष्णायामुदकभ्रमवतां प्रवृत्तिरिव प्रबलमोहमूल-विपर्यासधीजनिता । (श्लो.-८)

(२४) खेदमात्रम् - फलानुपहितश्रमरुपमेव । (श्लो.-८)

(२५) सम्मोहस्वच्छता - रागद्वेषमोहसन्निपातलक्षणव्याधेरनुद्रेकावस्था।(श्लो.-८)

(२६) अवक्रगामी - स्वरसत ऋजुमार्गाभिमुखः। (श्लो.-९)

(२७) परिणामः - क्षयोपशमविशेषोपनतः। (श्लो.-९)

(२८) व्यवहाराद् - व्यवहारनयमाश्रित्य । (श्लो.-९)

(२९) बहुपतनं - बहुषु स्थलेषूत्सर्गापवादादिपर्यालोचनासम्भवेन विपर्यासोपपत्तेः पतनम्। (श्लो.-९)

| | | | |
|---|---|---|---|
| (३०) | नियमात् | - सर्वथैव। | (श्लो.-९) |
| (३१) | मार्गानुसारी | - निसर्गत: तत्त्वानुकूलप्रवृत्ति:। | (श्लो.-१०) |
| (३२) | श्राद्धः | - तत्त्वं प्रति श्रद्धावान्-स्वप्रत्यनीकक्लेश-ह्रासातिशयावाप्तव्यमहानिधानग्रहणविधानो-पदेशश्रद्धालुनरवत् विहितानुष्ठानरुचि:। | (श्लो.-१०) |
| (३३) | प्रज्ञापनीय: | - चारित्रमोहनीयकर्मक्षयोपशमजनितमुक्तिसाधना-नुष्ठानकरणपरायण:। | (श्लो.-१०) |
| (३४) | गुणरागी: | - मत्सरविरोधिपरिणामवान्। | (श्लो.-१०) |
| (३५) | एकाकिचारम् | - एकाकिविहारम्। | (श्लो.-११) |
| (३६) | विरुद्धम् | - असङ्गतार्थम् । | (श्लो.-१२) |
| (३७) | गीतान्यविहार: | - गीतार्थाऽनिश्रिताऽगीतार्थविहार:। | (श्लो.-१२) |
| (३८) | अर्थनिबद्धसूत्रं | - निर्युक्तिभाष्यादिव्याख्यानपरतन्त्रं सूत्रम्। (यथा छाया छायावत: परतन्त्रा) | (श्लो.-१४) |
| (३९) | शीलवान् | - उद्यतानुष्ठानसम्पन्न:। | (श्लो.-१५) |
| (४०) | अश्रुतवान् | - भावतोऽनधिगतश्रुतज्ञान:। | (श्लो.-१५) |
| (४१) | देशाराधक: | - चारित्ररुपदेशपालनपर:। | (श्लो.-१५) |
| (४२) | द्रव्याराधना | - बाह्यतपश्चरणाद्यनुष्ठानपालना। | (श्लो.-१६) |
| (४३) | आश्रित्य | - प्रतीत्य। | (श्लो.-१६) |
| (४४) | द्रव्यपदार्थ: | - १) मुख्यपदार्थाभावे अप्राधान्ये वर्त्तते य: स यथा आचार्यलक्षणाभाववत्तयाङ्गारमर्दको द्रव्याचार्य:।<br>२) भावयोग्यत्वे वर्त्तते य: स यथा मृत्पिंडो घटजननयोग्य: सन् द्रव्यघट: । | |
| (४५) | भावयोग्यत्वं | - फलजननयोग्यत्वम्। | (श्लो.-१७) |
| (४६) | ग्रन्थि: | - घनरागद्वेषपरिणाम:। | (श्लो.-१७) |
| (४७) | ग्रन्थिगता: | - ग्रन्थिं प्राप्ता:। | (श्लो.-१७) |
| (४८) | सकृद्बन्धका: | - यथाप्रवृत्तकरणेन ग्रन्थिप्रदेशमागता अप्यभिन्नग्रन्थय: सकृदेवोत्कृष्टां सागरोपमकोटाकोटीसप्ततिलक्षणां स्थितिं भ्रमिष्यन्ति ये ते। | (श्लो.-१८) |
| (४९) | मार्गाभिमुखा: | - क्षयोपशमविशेषमार्गरूपनगरनिकटस्था:। | (श्लो.-१८) |
| (५०) | मार्गपतिता: | - अव्यवधानतो बहिर्भूता:। | (श्लो.-१८) |
| (५१) | गुणराग: | - गुणबहुमान:। | (श्लो.-१९) |
| (५२) | आज्ञार्थालोचनम् | - आज्ञाविधायकसामायिकादिसूत्रार्थपर्यालोचनम्। | (श्लो.-१९) |
| (५३) | विधिभङ्ग: | - प्रमादतो विधिपरित्याग:। | (श्लो.-२०) |

(५४) संसारत्रासः - भवभयः। (श्लो.-२०)
(५५) गुरुनियोगः - गुरुपारतन्त्र्यः। (श्लो.-२१)
(५६) कुग्रहविरहाद् - असद्ग्रहपरित्यागात्। (श्लो.-२१)
(५७) पापम् - अशुद्धं कर्म। (श्लो.-२२)
(५८) तीव्रभावः - गाढसंक्लिष्टपरिणामः। (श्लो.-२२)
(५९) उचितस्थितिः - देशकालावस्थापेक्षया घटमानप्रतिपत्तिः। (श्लो.-२२)
(६०) शुश्रूषति - धर्मं श्रोतुमिच्छति। (श्लो.-२३)
(६१) धर्मः - कुशलानुष्ठानम्। (श्लो.-२३)
(६२) अनुरज्यति - सामग्रीवैकल्यात्तदकरणेऽपि तत्रैव चित्ताभिलाष-मनुबध्नाति। (श्लो.-२३)
(६३) यथाशक्ति - स्वयोगसमाधानमनतिक्रम्य। (श्लो.-२३)
(६४) गुरुदेवानाम् - धर्माचार्यपरमाराध्यानाम्। (श्लो.-२३)
(६५) भक्तिः - वैयावृत्त्यादिप्रतिपत्तिः।
(६६) नियमेन-नियोगेन- अवश्यं मया एतद् देवकार्यं गुरुकार्यं वा कर्त्तव्यमिति अविच्छिन्नाभिनिवेशलक्षणेन। (श्लो.-२३)
(६७) प्रत्याख्यानविधानं- भङ्गकदम्बकोपेतं प्रत्याख्यानप्रकारं। (श्लो.-२४)
(६८) जानन् - उपयुज्य परिच्छिन्दन्। (श्लो.-२४)
(६९) आज्ञाशुद्धयोगे - शुद्धाज्ञाबहुमानगर्भितावश्यकानुष्ठाने। (श्लो.-२४)
(७०) ज्ञात्वा - उपादेयशुद्धात्मस्वभावप्रतिपन्थ्यशुभोपयोगनिमित्त-तया हेयत्वेन विविच्य। (श्लो.-२५)
(७१) सर्वम् - स्थुलविषयत्वाद्व्यवच्छेदकवर्जितत्वेन निरवशेषम्। (श्लो.-२५)
(७२) सावद्ययोगः - प्राणातिपातादिपापव्यापारः। (श्लो.-२५)
(७३) परिहरन् - त्रिविधं त्रिविधेन प्रत्याचक्षाणः। (श्लो.-२५)
(७४) उद्युक्तः - मुक्तौ दृढानुरागितया तत्प्राप्तावन्तरालिकमुपस्थितं परिषहोपसर्गचक्रमगणयन् मुक्त्युपायानुसरणे दृढाभ्यासवान्। (श्लो.-२५)
(७५) द्रव्याज्ञा - भावाज्ञाजननयोग्यस्वस्वोचितबाह्यानुष्ठानरुपा। (श्लो.-२६)
(७६) पूर्णफलाज्ञा - उत्कृष्टाज्ञाजननी। (श्लो.-२६)
(७७) बहुमानम् - उपादेयत्वज्ञानरुपश्रद्धाजनितः प्रमोदः। अनुमोदना।
- भावप्रतिबन्धः। (श्लो.-२८)
- प्रशंसालक्षणम्। (श्लो.-३०)
(७८) द्रव्यस्तवः - पुष्पादिना भगवत्पूजादिलक्षणः। (श्लो.-२८)

(७९) कूपज्ञात: - कूपदृष्टान्त:। (श्लो.-३३)

(८०) अकृत्स्नप्रवर्त्तका:- अपरिपूर्णं संयमं प्रवर्त्तयन्ति, विदधति ये ते। (श्लो.-३३)

(८१) युक्त: - सङ्गत:। (श्लो.-३४)

(८२) निर्जरार्थी - कर्मक्षयकाम:। (श्लो.-३४)

(८३) फलभाषा - फलप्रतिपादिका गी:। (श्लो.-३६)

(८४) प्रज्ञापनीफलभाषा - फलमात्रज्ञापनपरा गी:। (श्लो.३६)

(८५) आज्ञापनीफलभाषा- कर्तव्यतादेशकतया साक्षात्प्रवर्त्तिका गी:। (श्लो.३६)

(८६) प्रसङ्ग: - आनुसङ्गिकविस्तरा: । (श्लो.३८)

(८७) कार्याकार्ये - इहलोकपरलोकयोर्हिताहिते नीतिव्यवहार-कुनीतिपरद्रव्यापहारादिरुपे । (श्लो.४०)

(८८) ज्ञात्वा - निश्चित्य । (श्लो.४०)

(८९) परपरिणाम: - लौकिककुप्रावचनिकवासनाजनितस्वाभेदस्वीयत्वादि ज्ञानरुप: । (श्लो.४१)

(९०) प्रतिबन्ध: - विसामग्रीकृतकालविलम्बरुप: । (श्लो.४३)

(९१) बुध: - मुक्तिमार्गप्रवृत्तिदक्ष: । (श्लो.४४)

(९२) अप्रमत्त: - सर्वातिचारपरिहारपरायण: । (श्लो.४४)

(९३) परिशुद्धाज्ञायोग: -दीर्घकालादरनैरन्तर्यासेवितविशुद्धाज्ञासंपत्ति:।(श्लो.४४)

(९४) फलति - स्वविपाकेन पच्यते । (श्लो.४४)

(९५) पुरुषकार: - आत्मव्यापार: । (श्लो.४६)

(९६) गतानुगतिक: - अन्धपरंपरानुपाती । (श्लो.४४)

(९७) अनियतस्वभावकर्म - फलदानं प्रत्यनियतरुपकर्म। (श्लो. ४४)

(९८) तुल्यबलत्वम्। - समप्राधान्येनैककार्यहेतुत्वम्। (श्लो.४४)

(९९) अन्योन्यसमनुविद्धौ- परस्परोपगृहीतौ । (श्लो. ४७)

(१००) दैवेन - कर्मणा । (श्लो. ४८)

(१०१) पुरुषकारमाक्षिपति -नियताभिसन्धिकप्रयत्नं नियतफल-जननाय व्यापारयति । (श्लो. ४९)

(१०२) कर्मसन्तति - स्वहेतोर्लब्धातिशया एकाश्रया कर्मपरिणामश्रेणी। (श्लो.५०)

(१०४) तथातथापरिणामिनी - स्वाश्रयाऽपृथग्भूतप्रतिनियतफलजननी (श्लो.५०)

(१०५) हेतू - फलजनकौ। (श्लो. ५१)

(१०६) अविशेषेण - समप्राधान्येन । (श्लो.५१)

(१०७) प्रविभक्तः - भिन्नविषयतया व्यवस्थितः । (श्लो. ५४)

(१०८) बुधः - मोक्षोपायानुसरणनिपुणः । (श्लो.५४)

(१०९) अनुबध्नाति - संतत्या सन्निधापयति । (श्लो.५४)

(११०) गंभीरा - अनुद्घाटमहानिधानमिवापरिकलनीयसारा ।(श्लो.५५)

(१११) योगसङ्ग्रहः - साधुजनानुष्ठानसङ्ग्राहकसिद्धांतालापकः। (द्वात्रिंशत्सङ्ख्यः) (श्लो.५५)

(११२) अध्यात्मतः - वचनानुसारिमैत्र्यादिभावसंयुक्तचित्तात्मकात् । (श्लो.५५)

(११३) बद्धमूला - सुघटितभूमिका। (श्लो.५५)

(११४) अभिन्नग्रन्थिः - अपूर्वकरणवज्रेणाकृतच्छिद्रघनरागद्वेषपरिणामः । (श्लो.५७)

(११५) ज्ञानफलाभावः - शब्दार्थमात्रगोचरश्रुतज्ञानसत्त्वेऽपि सूक्ष्मोहेन तत्वविचारणाभावः । (श्लो.५७)

(११६) वेधपरिणामरहितः- अपातितमध्यच्छिद्रः। (श्लो.५८)

(११७) सूत्राधानम् - पारगतोदितागमन्यासरुपम्। (श्लो.५८)

(११८) द्रव्येण - मनोरुचिविकलत्वलक्षणेनाप्रधानभावेन । (श्लो.६१)

(११९) असत्प्रवृत्या - प्रबलावश्यवेधचारित्रमोहोदयादिन्द्रियानुकूलाचरणरुपया । (श्लो.६१)

(१२०) प्रतिपदः - प्रतिपत्तिथिसम्बन्धी । (श्लो.६०)

(१२१) बालभावनाशः - अविकलतारुण्यप्राप्तिः। (श्लो.५९)

(१२२) आज्ञायत्नात् - भगवदाज्ञाया नैरन्तर्यादरसेवनात् । (श्लो.६३)

(१२३) घनं - महामेघावलुप्तसकलनक्षत्रादिप्रभाप्रसरभाद्रपदाद्यमावा-

स्यामध्यभागसमुद्भूतान्धकारवन्निबिडम् । (श्लो.६४)

(१२४) मिथ्यात्वम् - तत्त्वविपर्यासमुपचारात्तत्कालश्चरमपुद्गलपरावर्त्त-व्यतिरिक्तशेषपुद्गलपरावर्तलक्षणम् । (श्लो.६४)

(१२५) अकालप्रयोगे - तथाभव्यत्वापरिपाकलक्षणेऽकाले । (श्लो.६६)

(१२६) अकाले - आज्ञायोगोपक्रमलक्षणे । (श्लो.६६)

(१२७) शारदरविकिरणकृतं - शरत्कालीनकठोरतरणिकिरणतापाहितम् । (श्लो.६८)

(१२८) योगप्रभवं - क्रियौषधयोगमात्रजनितम् । (श्लो.६६)

(१२९) परिणामेन - आयतिकालशुभानुबन्धेन ।

(१३०) अन्तरङ्गम् - अभ्यन्तरपरिणामप्राप्तम्। (श्लो.६७)

(१३१) घनम् - बहुलम् । (श्लो.६७)

(१३२) सङ्गः - सर्वांगीणसम्बन्धः । (श्लो.६७)

(१३३) स्वाभाविकम् - अविकृताभ्यन्तरपरिणतिप्रादुर्भूतम् ।

(१३४) अपूर्वम् - प्रागप्राप्तजातीयम् । (श्लो.६९)

(१३५)आत्मस्वभावस्यदर्शने-निखिलपरद्रव्यव्यावृत्तस्वस्वरुपस्य विगलित-वेद्यान्तरानुभवे । (श्लो.६९)

(१३६) अनधीनम् सुखम् - अपरायत्तम्, निरन्तरस्वपरिणतिधारापतितत्वा-दित्थमपीतरकारणस्पृहौत्सुक्याभावादितरसुखाति-शायित्वमव्याहतम्। (श्लो.६९)

(१३७) अप्रतिपक्षम् - दुःखोपनिपातेऽपि स्वभावभावनाबलेनान्तरव्याहत त्वादित्थमप्यन्यातिशायित्वम् । (श्लो. ६९)

(१३८) प्रशमवतः - अनन्तानुबन्धिविलयप्रादुभूतप्रशमगुणभाजः।(श्लो.६९)

(१३९) तिमिरहरादृष्टिः - स्वत एवान्धकारनिकुरम्बप्रसरेऽप्यलुप्तशक्तिका दृष्टिः। (श्लो.७०)

(१४०) अन्तरधारालग्ने - मानसपरिणतिसन्ततिपतिते । (श्लो.७१)

(१४१) अनुपतति - एकसंतानगततया ऐक्यपरिणामं बिभर्त्ति ।(श्लो.७१)

(१४२) प्रवर्त्तते - प्रतिक्षणमप्रमादलक्षणेन प्रकर्षेण वर्त्तते (श्लो.७३)
(१४३) तीव्राभिग्रहधारी - क्षमाशरीराप्रतिकर्मत्वाद्युत्कटाभिग्रहधरणशील: । (श्लो.७३)
(१४४) सुपरिशुद्ध: - सर्वातिचारपरिहारेणातिनिर्मल: । (श्लो.७३)
(१४५) विषय: - इष्टार्थ: । (श्लो.७४)
(१४६) निजशक्तिस्फोरणम् -निजपराक्रमस्य नैरन्तर्येण प्रवर्त्तनम् । (श्लो.७४)
(१४७) फलसिद्धि: - विपुलनिर्जरालाभ: । (श्लो.७४)
(१४८) आहरणम् - निदर्शनम्। (श्लो.७४)
(१४९) गुरुकविकारम् - मरणादिप्रबलविक्रियाकारणम् । (श्लो.७५)
(१५०) बन्धस्थिति: - बन्धाद्यवस्थानकाल:। (श्लो.७४)
(१५१) आज्ञासहकारिकत्वम्-स्वसहायिभूताज्ञायुक्तत्वं। वह्निरिवाभि-मुखतृणवनदाहेऽनुकुलपवनसहकृतत्वमिति । (श्लो.७६)
(१५२) योगबुद्धि: - धर्मवासनापरिष्कृतमति: । (श्लो.७७)
(१५३) सज्जाक्ष: - भावतो निरुपहतलोचन: । (श्लो.७७)
(१५४) अन्ध: - नयनव्यापारविकल: । (श्लो.८६)
पश्चान्नष्टदृष्टिजन: । (श्लो.७७)
(१५५) जात्यन्ध: - जन्मप्रभृत्येव नयनव्यापारविकलजन: । (श्लो.७७)
(१५६) अभिन्नग्रन्थि: - कदाचनाप्यव्यावृत्तमिथ्यात्वतिमिरपटलो जीव: ।

(१५७) कुदृष्टि: - सम्यक्त्वभ्रंशानन्तरमिथ्यात्वमुपगत: (श्लो.७७)
(१५८) आरम्भ: - प्रथमप्रवृत्ति: । (श्लो.७८)
(१५९) उपयुक्त: - दत्तावधान: । (श्लो.८२)
(१६०) परिणामे - आयतिकालानुष्ठेयेऽर्थे। (श्लो.८२)
(१६१) अल्पबहुत्वम् - गुणदोषगतं गुरुलाघवम् । (श्लो.८२)
(१६२) विचारयन् - शास्त्रानुसारिण्या सूक्ष्मप्रज्ञया प्रतिसन्दधत् (श्लो.८२)
(१६३) दुश्चीर्णानां कर्मणां - निबिडाध्यवसायतो निकाचनावस्थां नीतानाम् कर्मणाम् (श्लो.८३)

(१६४) क्षमते - अदीनमनस्कतयानुभवति (श्लो.८३)

(१६५) मातृस्थानम् - मायादोषम्। (श्लो.८४)

(१६६) भाव: - परमार्थ:। (श्लो.८४)

प्रतिज्ञातव्यवसाय:। (श्लो.८८)

(१६७) पुष्टालम्बनसेवी - ज्ञानवैयावृत्त्यादिसमर्थालम्बनेनापवादपथप्रवृत्तिमान्। (श्लो.८४)

(१६८) गुणठाणपरिणामे - जीवदयादिगुणप्रकर्षपरिणामे । (श्लो.८५)

(१६९) बुद्धिमान् - युक्तायुक्तविवेचनचतुरशेमुषीपरिगत: । (श्लो.८५)

(१७०) असातरहित: - असद्वेद्यकर्मोदयविमुक्त: । (श्लो.८६)

(१७१) पुरानुसारी - नगरमार्गगामी । (श्लो.८६)

(१७२) सम्यगुत्थितानां - स्वौचित्यानतिलङ्घन उन्मीलिताध्यवसयानाम्। (श्लो.८८)

(१७३) महानुभावस्य - वीतरागाज्ञापालनेऽत्यन्तरसिकस्य । (श्लो.८८)

(१७४) शुभयोग: - स्वाध्यायध्यानविनयवैयावृत्त्यादिरुप:। (श्लो.८९)

(१७५) प्रज्ञापनीया: - कुतोऽप्यनाभोगात् सामाचारीत: स्खलनेऽपि संविज्ञै: गीतार्थैश्च प्रज्ञापयितुं शक्या:। (श्लो.९१)

(१७६) महासत्त्वा: - भगवदाज्ञातो दैवैरपि चालयितुमशक्या:। (श्लो.९१)

(१७७) स्वाध्यायादिनियोग:- पापश्रुतावज्ञाप्रधानजिनागमाध्ययनादिविशिष्ट प्रयत्न: । (श्लो.९३)

(१७८) उचितार्थ: - तत्तद्रव्यादिसामग्र्यनुरुपोत्सर्गापवादादिरुप: ।(श्लो.९३)

(१७९) चिन्ता - गुरुलाघवानुपातिनोपयोग: । (श्लो.९३)

(१८०) असद्ग्रहगृहीता:- मिथ्याभिनिवेशसंस्थुलीकृतात्मशक्तय: । (श्लो.९४)

(१८१) आत्मदोष: - स्वार्जितमिथ्यात्वमोहादिकठिनकर्मविपाक: । (श्लो.९४)

(१८२) उज्झितप्रधानयोग:- त्यक्तो विपुलतरनिर्जरानिबन्धनगुरुपारतंत्र्याधीन-स्वाध्यायाद्याराधनातात्मा। (श्लो.९४)

(१८३) बाह्ययोग: - यथावत् परमगुरुवचनोपयोगशून्यतया शरीर-

व्यापारमात्ररुप:। (श्लो.९४)

(१८४) स्थिता: - (स्वबुद्धिकल्पनया) प्रवृत्ता: । (श्लो.९४)

(१८५) अज्ञाना: - तत्त्वोपयोगशून्या: । (श्लो.९५)

(१८६) गुरुचरित्रयोगस्थम् - दुर्द्धरचारित्रानुष्ठानस्थितम् । (श्लो.९५)

(१८७) गतसत्त्वा: - निवृत्तधैर्या: । (श्लो.९५)

(१८८) महानुभावानां - बाह्याभ्यन्तरयोगे समुचितप्रवृत्तिनामागमानुसारिणां महर्षीणाम् । (श्लो.९६)

(१८९) उत्सूत्रं - स्वाभिप्रायिकाचारसमाधानाय सूत्रविरुद्धम्।(श्लो.९६)

(१९०) बाह्यदृष्टि: - बाह्यव्यापारमात्रप्रेक्षी । (श्लो.९७)

(१९१) तत्वार्थज्ञानपरिहीन:- आगमशुद्धोत्सर्गापवादादिप्रवृत्तिपरीक्षाक्षमसूक्ष्म-प्रेक्षारहित: । (श्लो.९७)

(१९२) सङ्ग्रहहेतो: - स्वायत्तीकरणार्थम्। (श्लो.९७)

(१९३) गर्हा - स्वोत्कर्षार्थकेतरगुणवन्निन्दा । (श्लो.९१)

(१९४) जीविका - जीवनवृत्ति: । (श्लो.९७)

(१९५) व्याख्यानयत: - स्वाभिप्रायानुसरणेनोपदिशत: । (श्लो.९८)

(१९६) नि:शङ्का: - सूत्राशातनाभीरव: । (श्लो.९८)

(१९७) महापापा: - पापेभ्योऽपि पापा: । (श्लो.९८)

(१९८) विभज्यवाद: - स्याद्वाद: । (श्लो.९८)

(१९९) समता - रागद्वेषरहितता । (श्लो.९८)

(२००) अनुगच्छत् - अनुसन्दधत् । (श्लो.९८)

(२०१) प्रतिपूर्णभाषी - निरवशेषनयादिगम्भीरार्थवादी । (श्लो.९८)

(२०२) शुद्ध: - पूर्वापराविरुद्ध:। (श्लो.९८)

(२०३) अदूषक: - अपसिद्धान्तव्याख्यानेन सर्वज्ञोक्तमदूषयन्।(श्लो.९८)

(२०४) शुद्धसूत्र: - अवदातप्रवचन:। (श्लो.-९८)

(२०५) उपधानम् - यद्यस्य सूत्रस्याभिहितं तपश्चरणम्। (श्लो.-९८)

(२०६) आदेयवाक्य: - ग्राह्यवचन:। (श्लो.-९८)

(२०७) अगीतार्थ: - गुरुविनियोगरहित: । (श्लो.-९८)

(२०८) आज्ञप्त: - सर्वत्रभाषितुमनुज्ञात:। (श्लो.-९९)

| | | |
|---|---|---|
| (२०९) सारं | - स्वजन्यफलोत्कर्षाङ्गम्। | (श्लो.-१०३) |
| (२१०) निश्चयशुद्धम् | - परमार्थदृष्ट्याऽवदातम्। | (श्लो.-१०३) |
| (२११) विशिष्य | - अन्योन्यव्याप्यव्यापकभावमवधार्य। | (श्लो.-१०४) |
| (२१२) हितहेतु: | - स्वहितार्थकारी। | (श्लो.-१०६) |
| (२१३) सुन्दर: | - स्वोचितफलदायी। | (श्लो.-१०७) |
| (२१४) नैमित्तिक: | - तथाविधनिमित्तोपनिपातसम्भविकर्त्तव्यताक:। | (श्लो.-१०७) |
| (२१५) गुरुलघुभावम् | - गुणदोषविषयम्। | (श्लो.-१०९) |
| (२१६) ज्ञात्वा | - शास्त्रनीत्या विमृश्य। | (श्लो.-१०९) |
| (२१७) निर्वेदत: | - तात्त्विकसंसारनैगुण्यावधारणात् | (श्लो.-१०९) |
| (२१८) अनाचारकारणम् | - नरकादिपातनिमित्तम्। | (श्लो.-१११) |
| (२१९) सत्क्रियात: | - प्राक्कर्मनिर्जरावदभिनवकर्मानागमस्याप्युपपत्ते:। | (श्लो.-१११) |
| (२२०) विशुद्ध्यमान: | - प्रतिदिनमात्मस्वरूपनिवेशावदातायमानमना। | (श्लो.-१११) |
| (२२१) परमपदम् | - चतुर्वर्गाभ्यर्हितं सिद्धिस्थानम्। | (श्लो.-१११) |
| (२२२) सुसंयतानाम् | - शास्त्राभ्यासभस्मपरामर्शविशदीभूतहृदयानां भावसाधूनाम्। | (श्लो.-११३) |
| (२२३) सुविशेष्य | - सपूर्वपक्षोत्तरपक्षं वितत्य। | (श्लो.-११६) |
| (२२४) उचितप्रवृत्तिप्रधानम् | - विध्याराधनया गर्हणीयभङ्गविरोधिप्रयत्नमुख्य व्यापारम्। | (श्लो.-१२०) |
| (२२५) सानुबन्धम् | - अव्यवच्छिन्नगुणप्रवाहनिमित्तम्। | (श्लो.-१२८) |
| (२२६) एषणीयज्ञानम् | - भक्तपानादिकल्प्यताज्ञानम्। | (श्लो.-१२९) |
| (२२७) उपयुक्त : | - यथावद्दत्तावधान:। | (श्लो.-१२९) |
| (२२८) अनुज्ञा | - शुद्धभक्तपानादिग्रहणविधि:। | (श्लो.-१३०) |
| (२२९) कृतयोगी | - तप:कर्मणि कृताभ्यास:। | (श्लो.-१३१) |
| (२३०) कल्पिकप्रतिसेवा | - दुर्भिक्षादौ कृतयोगिन: परिमिताशुद्धान्नादिग्रहणरुपा। | (श्लो.-१३०) |
| (२३१) दर्पिकाप्रतिसेवा | - स्वप्रवृत्तिमूलभूताभ्यां रागद्वेषाभ्यां सहिता या प्रतिसेवा सा। | (श्लो.-१३१) |
| (२३२) स्वयम्भू: | - नानादिसिद्धसर्वज्ञ:। | (श्लो.-१२२) |
| (२३३) यतनापेक्षया | - व्रतसापेक्षाल्पतरप्रतिसेवापेक्षया। (यतनापूर्वकसदोषानुष्ठानस्यापवादत्वात्।) | (श्लो.-१३५) |
| (२३४) उपपद्यते | - तन्त्रनीत्या घटते। | (श्लो.-१३५) |

(२३५) पूर्वाचार्याः - सङ्घदासगणि-क्षमाश्रमणप्रभृतयः। (श्लो.-१३५)
(२३६) कामम् - अनुमतम्। (श्लो.-१३२)
(२३७) निषेधसंविद्धा - आर्थिकनिषेधसंवलितविधिबोधजननी। (श्लो.-१३३)
(२३८) सत्त्वेन - सद्भावसारेण। (श्लो.-१३९)
(२३९) मुण्डाः - श्रमणगुणमुक्तयोगिनः। (श्लो.-१४६)
(२४०) दुःषमादोषवशतः - पञ्चमारकवैगुण्यबलात्। (श्लो.-१४६)
(२४१) अनुवर्त्तना - अनुकूलभावसम्पादकचेष्टा। (श्लो.-१४८)
(२४२) वन्दनादिभिः - अपवादविध्युक्तवाग्नमस्कारादिप्रकारैः। (श्लो.-१४८)
(२४३) उभयज्ञः - उत्सर्गापवाद-कल्प्याकल्प्य-निश्चयव्यवहारादि पदार्थद्वैतपरिच्छेदी। (श्लो.-१४९)
(२४४) क्रियापरः - मूलगुणोत्तरगुणाराधनायां बद्धकक्षः। (श्लो.-१५०)
(२४५) प्रवचनानुरागी - जिनवचनं प्रति बहुमानवान्। (श्लो.-१५०)
(२४६) प्ररुपकः - तैस्तैरुपायैरुपदेशकः। (श्लो.-१५०)
(२४७) प्राज्ञः - बहुबहुविधादिग्राहकबुद्धिमान् (श्लो.-१५०)
(२४८) हेतुवादपक्षे - जीवकर्मादौ युक्तिमार्गसहे वस्तुनि।
(२४९) हेतुकः - युक्तिप्रणयनप्रवीणः। (श्लो.-१५१)
(२५०) आगमे - देवलोकपृथ्वीसङ्ख्यादावर्थे आगममात्रगम्ये।(श्लो.-१५१)
(२५१) आगमिकाः - आगममात्रप्रज्ञापनाप्रवीणः। (श्लो.-१५१)
(२५२) सिद्धान्तविराधकः- जिनवचनानुयोगविनाशकः। (श्लो.-१५१)
(२५३) आगमगम्येषु - युक्तिपथातीतेषु। (श्लो.-१५१)
(२५४) पूर्णभावाङ्गम् - एकोपयोगाश्रययावत्पर्यायसिद्धिनिबन्धनम्। (श्लो.-१५७)
(२५५) शब्दम् - वाक्यार्थादिज्ञानम्। (श्लो.-१७३)
(२५६) दीर्घः - यथोचितबहुसमयावच्छिन्नः। (श्लो.-१७६)
(२५७) अपरिणते - समयग्ज्ञानाभावेन मोक्षोपायतयाऽनिष्टे। (धर्मे) (श्लो.-१८२)
(२५८) निकाचितम् - सकलकरणायोग्यत्वेन व्यवस्थापितम्। (कर्म) (श्लो.-१८२)
(२५९) अप्रमादसारः - पुरस्कृताप्रमादः। (श्लो.-१८३)
(२६०) विचित्ररुपः - नानातात्पर्यकः। (श्लो.-१८३)
(२६१) सर्वदाऽप्रमादपरिवृद्धिः - प्रव्रज्याप्रतिपत्तिकालादारभ्योत्तरोत्तरगुण-स्थानारोहक्रमेण प्रवर्द्धमानपरिणामरुपा। (श्लो.-१८४)
(२६२) आत्मतत्त्वम् - साकारानाकारोपयोगवज्जीवस्वभावभूतम्। (श्लो.-१८८)
(२६३) आक्षेपकस्वभावम्- सन्निहितताकारकस्वभावम्। (श्लो.-१८८)
(२६४) धीराः - मोहभटरणभङ्गक्षमधैर्यवन्तः। (श्लो.-१८९)

| | | | |
|---|---|---|---|
| (२६५) अतिचारः | - | चारित्रमालिन्यबीजभूतरागद्वेषलेशलक्षणः। | (श्लो.-१८९) |
| (२६६) समुदयवादम् | - | कालादिकलापस्य संमत्यादिसिद्धसामग्रीत्वप्रवादम्। | (श्लो.-१८९) |
| (२६७) अन्तरङ्गयत्नः | - | अध्यात्मध्यानयोगत आत्मन्येवैकाग्रचित्त व्यापाराद्द्रियमानक्लिष्टचित्तनिरोधलक्षणः। | (श्लो.-१९०) |
| (२६८) परिणमति | - | एकाङ्गीभावमागच्छति। | (श्लो.-१९१) |
| (२६९) आनन्दस्य | - | साम्यसुखस्य। | (श्लो.-१९१) |
| (२७०) श्रमणाः | - | तथाविधक्रमपरिणतिमदध्यात्मध्यानवन्तः। | (श्लो.-१९२) |
| (२७१) कल्याणहेतुमित्रैः | - | श्रेयोहेतुस्निग्धलोकैः। | (श्लो.-१९४) |
| (२७२) जिनवचनम् | - | वीतरागभाषितमङ्गप्रकीर्णकादिभेदभिन्नम्। | (श्लो.-१९४) |
| (२७३) उपकारः | - | आयतिहितानुकूलो व्यापारः। | (श्लो.-१९५) |
| (२७४) पूज्याः | - | लोकलोकोत्तरभावानुगता महान्तः। | (श्लो.-१९६) |
| (२७५) अनुवर्त्तितव्यः | - | स्वप्रवृत्यनुकूलतया सेवनीयः | (श्लो.-१९६) |
| (२७६) गुणरागः | - | औदार्यदाक्षिण्यादिगुणबहुमानः। | (श्लो.-१९६) |
| (२७७) शुद्धिः | - | स्वभावसमवस्थानलक्षणा। | (श्लो.-१९८) |
| (२७८) कूटस्थम् | - | स्वस्वभावलक्षणम्। | (श्लो.-१९८) |
| (२७९) सहजम् | - | अविकृतम्। | (श्लो.-१९८) |
| (२८०) मोक्षः | - | परमपुरुषार्थलाभलक्षणः। | (श्लो.-८३) |

# न्यायविशारदस्य स्याद्वादस्रोतः

**-*सा.श्री व्रतरक्षिताश्रीः**

जैनशासनीयदीप्तिमच्छ्रुतस्य सातत्येन सर्जकाः, श्रुतं येषां श्वासः, श्रुतं येषां विश्वासः, श्रुतं च येषां हृदयस्य प्रकाश आसीत्। अस्मिन् भारतवर्षे-न्यायसाहित्यसर्जकेषु ये प्रष्ठा अभवन्। ते "न्यायविशारदवाचकपुङ्गव-महामहोपाध्याया विजयन्ताम् विजयन्ताम्!!!"

महापुरुषाणां गुणवर्णनं तु राधावेधतुल्यं भासते। अपेक्षातः कष्टसाध्यां राधावेधविधिं शस्त्रशास्त्रकुशलोऽर्जुनवत् कश्चित् साधयेदपि। किन्त्वेतादृशां महानुभावानां गुणवर्णनं दुःशक्यं भासते। तथाप्यमीषां पूज्यानामेव कृपयास्य लेखस्य प्रथमप्रयासेन महापुरुषाणां गुणानामंशमात्रतः सिद्धिः प्राप्नुयामिति भावनया सह जिनशासनीयज्ञानगङ्गाया अद्वितीयप्रवाहसर्जकपूज्यपादोपाध्यायप्रवराणां गुणोपवनात् ज्ञानानन्यगुणपुष्पस्य यत्किञ्चिद् सौरभमनुभवामः।

बालोऽपि निजबाहुयुगं वितत्य सागरापारतायात्मभावं किं न दर्शयति? दर्शयत्येव।, तथैव ममाप्ययं प्रथमप्रयासो ज्ञेयः।

उपाध्यायवर्याणां श्रुतज्ञानगुणगरिमाऽज्ञातैरस्माकमपि वैक्रमीये २०६९ तमे

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

वर्षे साङ्गलीनगरे विद्वद्वर्यमुनिराजश्री**कीर्त्तीन्द्र**विजयानां समीपे न्यायाध्ययनस्य सुवर्णावसरः सम्प्राप्तः, मुनिवर्याणां प्रतिशब्दं वाचकवर्यान् प्रत्यान्तरो बहुमानभावस्तथासीत् यथा तेषां न्यायग्रन्थान् साक्षात् करोतीव । तं प्रेक्षमाणानामस्माकं हृदयेऽपि प्रादुर्भूतः तेषां प्रति सन्मानभावः! मत्परमोपकारि-पूज्यपादाचार्यदेवेशश्रीमद्**विजयमुक्तिप्रभसूरी**श्वराणामाशीर्भिः, गणिवर्य-पूज्यमुनिराज**श्रीसम्यग्दर्शन**विजयानाञ्च प्रेरणया तत्सन्मानभावस्याक्षरदेहमर्पयितु-मान्तरप्रीतिं चाविष्कर्त्तुमवसरोऽद्य लब्धः। स्ववदनात् स्वाभाविकशब्दा निसृता यत् पूज्यपादानामहो आन्तरवैभवः! अहो श्रुतवैभवः!

उपाध्यायभगवद्भिः स्वकृतजिनमहत्त्वद्वात्रिंशिकायां प्रोक्तमेव

**''सारमेतन्मया लब्धं, श्रुताब्धेरवगाहनात्।**

**भक्तिर्भागवती बीजं, परमानन्दसंपदाम् ।।''**

- असारे संसारे किमपि सारतत्त्वं स्यात् तर्हि सा चतुस्त्रिंशदतिशय-विभूषितपरमात्मनां भक्तिरेव।
- परमेश्वरं प्रति विनयं प्रादुष्कुर्वती या स्तवना सा **प्रेमलक्षणा**भक्तिः।
- तेषां सर्वज्ञानामेव मुखारविन्दात् निसृतश्रुतगङ्गायाः स्वात्मपरिणमनं तदर्थं पुरुषार्थश्च!, **ज्ञानलक्षणा** भक्तिः!
- तस्याः मूलस्रोतः स्याद्वादः।

सिद्धसारस्वतपूज्यपादमहोपाध्यायानां गूर्जरचतुर्विंशत्यादिरचनाः प्रभुं प्रति परमप्रणयमाविष्कुर्वन्त्यो, ग्रन्थरचनाश्च स्याद्वादभक्तिं प्रकटयन्ति। वाचकवर्याणां साहित्यन्यायग्रन्थाभ्यासः स्याद्वादप्रीतिं पुष्यति।

तदानन्दरसं तत्रभवन्तो भवन्तोऽप्यनुभवन्त्वित्याशया वाचकवर्यग्रन्थ-रसनिधिभ्यः समुद्धृत्य रसलेशं प्रदर्शयामि।

* जैनतर्कभाषायां वादिना पृष्टं यद्-मिथ्यादृष्टेः ज्ञानमप्रमा तथा सम्यग्दृष्टेश्च संशयः प्रमा किं कारणम्? उपाध्यायभगवद्भिः प्रत्युक्तं-सम्यग्दृष्टेः पदार्थबोधोऽनंतधर्मात्मकत्त्वात् प्रमा! वादिना प्रतिपृष्टं-किं स सम्यग्दृष्टिः सर्वपदार्थानन्तधर्मात्मकत्त्वेन अभ्युपगमिष्यत्युत घटादिरूपेण?

प्रत्युत्तर: ''आसत्तिपाटवाभ्यास-स्वकार्यादिभिराश्रयन्।

पर्यायभेदमप्यर्थं, वेत्ति भावाद् बुधोऽखिलम् ।।'' (अध्यात्मसार ६.३०)

उक्तेन प्रकारेण सम्यग्दृष्टि र्घटाद्येकपर्यायं जानाति। किन्तु *संस्कारेणानन्तधर्मान् स्वीकुर्वते, न तु मिथ्यादृष्टि:।*

* लौकिकदर्शने विषयभोगादिच्छानिवृत्ति र्मता। ततो विषयभोगाद्धी च्छानिवृत्तिरिष्टाऽजायत। लोकोत्तरदर्शने त्विच्छैव दाहस्ततस्तेन विरोध:? अध्यात्मसारस्य द्वितीयप्रबन्धे वैराग्यसंभवाधिकारे खण्डितोऽयं मतस्तै: प्रोक्तं तथाहि-

* सिद्ध्या विषयसौख्यस्य, वैराग्यं वर्णयन्ति ये।
मतं न युज्यते तेषां, यावदर्थाऽप्रसिद्धित: ।।२।।

* अप्राप्तभ्रमादुच्चैरवाप्तेष्वप्यनन्तश: ।
कामभोगेषु मूढानां, समीहा नोपशाम्यति ।।३।।

* विषयै: क्षीयते कामो नेन्धनैरिव पावक: ।
प्रत्युत प्रोल्लसच्छक्तिर्भूय एवापवर्धते ।।४।।

* सोमत्वमिव सिंहानां, पन्नगानामिव क्षमा ।
विषयेषु प्रवृत्तानां, वैराग्यं खलु दुर्लभम् ।।५।।

* भवहेतुषु तद्द्वेषाद्विषयेष्वप्रवृत्तित: ।
वैराग्यं स्यान्निराबाधं, भवनैर्गुण्यदर्शनात् ।।६।।

इत्यादि नानापदार्थानां स्पष्टतां यच्छती स्याद्वादवादिता।

अमुष्य स्याद्वादगुणसुमनस: रसमास्वाद्य धर्मसङ्ग्रहाख्यग्रन्थे पूज्यपाद-मानविजयवाचकैस्तेभ्योऽतीतसंस्मारितश्रुतकेवलिपदं प्रदत्तं।

* अष्टसहस्रीतात्पर्यविवरणवृत्यां न्यायविशारदा ऊचु:

**''स्याद्वादार्थ: क्वाऽपि कस्याऽपि शास्त्रे। य: स्यात् कश्चिद् दृष्टिवादार्णवोत्थ:।**

**तद्व्याख्याने भारती सस्पृहा मे। भक्तिव्यक्ते र्नाग्रहोऽणौ पृथौ वा।।''**

इमामेव पङ्क्तिं सफलीकुर्वन्तस्ते पातञ्जलिऋषिकृतयोगदर्शनस्य स्याद्वादि-भिरपि श्लाघमानां वृत्तिमरचयन्।

* तीर्थस्याव्युच्छित्त्यै कुमतभञ्जकान्, सुमतप्रस्थापकान्, वैराग्यवर्धकान्,

स्याद्वादप्रतिपादकान्, सर्वविषयदर्शकाननैकविधग्रन्थान् प्रादुष्कुर्वन्ती स्याद्वादप्रीतिः श्रीमदुपाध्यायानाम्।

* "पूज्यश्रीणां स्याद्वाद एव प्रिय आसीत्" मनसि, विचारे, स्मृतौ, चिन्तने, ध्याने च अनवरतं सैव रममाणत्वात् ततः स्वकृते ग्रंथे, स्तवने, प्रवचने पत्रे च सर्वत्र स्याद्वादस्यैव प्रतिपादनं दृष्टिगोचरतामाप्नोति।

* धन्याः स्याद्वादरसानन्दितजनाः! धन्या अपूर्वसाहित्यसर्जकाः! यै र्नव्यन्यायस्य ग्रन्थान् संदृब्ध्य न्यायशास्त्राम्भोधि र्जगद्धितायार्पितः। यत् स्वीकृतमहाव्रतान् गुर्वाज्ञानुसारतो रक्षित्त्वा संदेहभञ्जनस्य आत्मरञ्जनस्य च नव्यन्यायस्य ग्रन्थानामध्ययनेन बोधिबीजं प्राप्य, महापुरुषरचितग्रन्थानामध्ययने संयोगं शक्तिं साधनां साधनं च स्वीकृत्य कदाहं कृतपुण्या भविष्यामि, शाश्वतसुखस्य भोक्त्री च भविष्यामीत्याशासे।

* जगद्वन्द्यप्रभूणां तथा सम्यग्यत्नकर्तॄणां ज्ञानाद्यालम्बनदातॄणां पूज्यपादानां गुरुवर्याणां कृपा मां सम्यग्ज्ञानेन **सुरक्षितां** कृत्वा मे **व्रतरक्षाया** हेतुर्भवतु!, ज्ञानभ्यासप्रयत्नो मे ज्ञानपरिणतेः पाथेयमस्तु!

* मयाऽज्ञया भावयुक्तकृतेयं कृति र्विद्वद्वाचकवर्येषु नोपहास्या स्यादिति अपेक्षया सह क्षतीः क्षमयितुं प्रार्थये!

* हे न्यायाम्भोनिधयः! भवद्भ्य इयं विज्ञप्ति र्यद्वयमपि भवदुपज्ञन्यायग्रन्थाम्भोधा-ववगाहनां कुर्महे इति शुभकामना!!!

* वन्दे सदा शुभमतिं सुयशोगुरूणां,
वन्दे सदा वररुचिं सुयशोगुरूणाम्।
वन्दे सदा सुविनयं सुयशोगुरूणां
वन्दे सदा पदकजं सुयशोगुरूणाम्॥

* सिद्धान्तरक्षक! गुरोऽर्पय सद्धियं ते।
संवेगप्रापक! गुरोऽर्पय चिच्छ्रियं ते।
आक्षेपभञ्जक! गुरो! ददतां गिरं ते।
आह्लाददायक! गुरो! ददतां ह्रियं ते॥

# अमृतवेलद्वात्रिंशिका

## ऐँ नमः

**-पं.अमृतपटेलः**

सार्वसर्वज्ञशासनगगनभासनभास्करजिनवरवचनभासाऽऽकरनयकिरणगण-प्रसारणपरैः श्रीमद् यशोविजयवाचकवर्यै र्विरचितेयं 'अमृतवेल' नामक (सज्झाय) स्वाध्यायिका, या भव्यजनैः सुखास्वादिकायमाना चेतनस्यानादिकालाद् भवाटव्यामटतो मुक्तिनगरप्रापणप्रवणे पारमेश्वरे प्रबोधपथे परमं पाथेयम्- यतोऽस्यां सुखादिकामय्यां स्वाध्यायिकायामुपाध्यायवर्यैश्चतुर्धा मुक्तिनगराध्वा विभक्तः-तद् यथा (१) प्रथमं तु परमं चैतन्यमयमात्मस्वरुपं, तच्च कीदृशम्, कया च रीत्या प्राकट्यमानेतव्यम्, तत्र-ज्ञानोद्योतप्रदीपनम्, कषायविजयः, सम्यक्त्वस्य च प्राप्तिः, (२) द्वितीयं च आत्मस्वरुपाविर्भावनसाक्षात्करणव्यापृतानामर्हदादीनाम् शरणकरणं शरणगमनमिति परिभाषितम् (३) तृतीयं तु दुष्कृतगर्हा च सुकृतानुमोदना च, (४) चतुर्थं च 'आत्मस्वरुपभानम् ।

तत्र महाल्पतरधियाऽस्याः 'सुखादिकायाः मर्मोद्घाटनप्रयासलेशाय संस्कृतभाषायां गद्यविवरणम् स्रग्धरा छन्दसि च पद्यानुवादो विधाय श्रुताम्भोनिधिमध्यमध्यास्य स्याद्वादरत्नप्राप्तिमेदुरमनसां महोपाध्यायानां तदनुरूपां

श्रद्धामयीं प्राञ्जलिं प्रदास्येऽहम् ।

**पद्या०** - [१]ऐंमन्तं वाचकेन्द्रं जिनवचनगुणं, लब्धलक्ष्यावलीढं,

प्रौढं धीसाध्यभावादनुपमचरणं, चित्[२]-रचितावदातम्;

मौनीन्द्रेऽमौनभाजं प्रवरमधिगुणं, मौनभाजं स्वकीर्त्यां,

वन्दे नन्द्याभिधेयं नयविबुधशिशुं, तं यशोनामधेयम् ।।१।।

**पद्या०** - येनार्हद्दर्शनोक्तै : प्रचुरगुणकरै, गूढभावै: सुमत्या,

प्रौढाऽप्रौढाश्च ग्रन्था:, व्यरचि बहुमता, स्तस्य भक्त्या मयैष:;

स्वाध्यायस्तत्प्रणीतोऽमृत' पदमधुरो, 'वेल' नाम्ना तु देश्याम्,

पद्यैस् तस्यानुवादो व्यरचि सुरगिरा, स्तौति तं वाचकेन्द्रम् ।।२।।

**मूल:१- चेतन! ज्ञान अजुवालीए, टालीए मोहसंताप रे।**

**चित डमडोलतुं वारीए, पालीए सहजगुण आप रे ।।**

**ग.वि-** प्रथमं तु हे चेतन! त्वं तव सहजं स्वभावभूतं गुणं चैतन्यं, यत् सर्वथा प्रद्योतमयं लोकोद्योतकरणक्षमं विद्यते, यत् त्वद्यावधि मोहतिमिरेण सन्मार्गविलोकनेश्वरं विवेकनयनं समन्तादाच्छादितम्, अतोऽज्ञानसन्तापसन्तप्तो भवसि, तेनैव निदानेन तव चित्तं पौर्वापर्यपर्यालोचनविकलं भूत्वा पौद्गलिकेषु पदार्थेषु परमे वार्हतमतवर्त्मनि प्रान्दोलयदितस्ततो बम्भ्रमीति, तथा निजं च सहजं प्रकृतिभूतं ज्ञानादिगुणगणं, यज्जिनवचनलभ्यं, तद् विहायाऽन्यत्र सर्वत्र समावाप्तुं प्रयासं विधाय, विविधाऽऽयासमध्यास्य परिखिन्नो भूरिदु:खमनुभवति।

**पद्या०** - चञ्चच्चैतन्यचान्द्र्या शमकरशमितं, शान्तवृत्त्या शमेतं[३],

ज्ञात्वा संमोहदाहं व्यपनयति मन:, स्थैर्यमाप्तं जिनोक्त्या;

ज्ञातै र्धीरैर्गुणौघै र्विरतिरतिरिति, प्रोक्तवान् य: प्रशस्तं,

ज्ञानं चैतन्यतेज: सहजगुणधृति, स्तौमि तं वाचकेन्द्रम् ।।३।।

**मूल:-२ : उपशम अमृतरसपीजीए, कीजीए साधगुणगान रे ।**

**अधमवयणे नवि खीजीए, दीजीए सज्जनने मान रे ।।**

**ग.वि.-** मोहमदिरोन्मादोत्तापार्त्तस्त्वं सुधासमानमुपशमरसमाचाम, तेन

१. ऐं अस्ति यस्य स: तम् ऐंमन्तम् २. चित्-ज्ञानं, तेन राजते। ३. शम्+आ+इतम्।

सदसद्विभागमाकलय्य सद्भूतान् सम्यगनुभूय तद्गानपरो भविष्यसि, अपरञ्चाऽधमजनवचनविषमविषं त्वयि न प्रभविष्यति, सहजतयैव सज्जनजनं सन्मानसहितं स-हितं द्रक्ष्यसि।-

**पद्या०-** सर्वज्ञोपज्ञवृत्त्या प्रशमरससुधालीननिर्ग्रन्थसेवी,
सद्भूतज्ञानधाम्ना धृतिकवचधरो, नैव विद्धः खलोक्त्या;
नीर-क्षीरस्य भक्त्या शुभमनुजमनोराजहंसालिनन्दी,
सन्नध्वा यो बुधेभ्यो गदति करुणया, स्तौमि तं वाचकेन्द्रम् ।।४।।

**मूल-३ - क्रोध अनुबन्ध नवि राखीए, भाखीए वयण मुखसाच रे।**
**समकितरत्नरुचि जोडीए, छोडीए कुमतिमतिकाच रे ।।**

**ग.वि** -अमृतवल्ल्याः पोषणार्थं चतुर्दिग्बद्धालवालकल्पं, यद् हेतुचतुष्टयं महोपाध्यायवर्यैः प्रादर्शि तत्र ज्ञानोद्योत[१]-मोहसंतापनाश[२]-चित्तस्थैर्य[३]-सहजगुणावाप्ति[४]-पालनम्। तदर्थं तैरेव तत्फलभूतं मार्गाभिमुखताचरणं प्रोक्तम्, तत्राद्यं क्रोधादिकषायानुबन्धत्यागः, ये भवपरंपरानुबध्नन्ति 'अनन्तानुबन्धिनः' इति जैनदर्शने परिभाषिताः, त उग्राः सन्ति, तेषामुग्रत्वनाशात् नानुबध्यन्ते, कषायमन्दतायां सत्यां सत्यवचनभाषणं सत्यवचनपक्षपातित्वञ्च भवति, ततः सम्यक्त्वे रुचि र्भवति तत्प्रभावेण जिनमतादन्ये 'कुमता' भासन्ते, जीवस्तान् त्यजति।

**पद्या०-** कोपः संसारकारः कटुपरिणतिकृन्नाऽनुबन्ध्यस्तवार्हस्,
तेनैवाऽऽस्यं न शस्यं सदुदितिरहितं, सत्यवाक् सत्सु प्रेयान्;
सम्यक्त्वे सत्यश्रद्धांशुदलितकुमते, रत्नधीस्फूर्तिमाप्या,
दित्थं यो वक्ति शस्तं जिनमतमुदितं, स्तौमि तं वाचकेन्द्रम् ।।५।।

**मूल-४ - शुद्धपरिणामने कारणे, चारनां शरण धरे चित्त रे।**
**प्रथम तिहा शरण अरिहंतनुं जेह जगदीश जगमित्त रे ।।**

**मूल-५- जे समोसरणमां राजता, भांजता भविकसंदेह रे।**
**धर्मनां वचन वरसे सदा, पुष्करावर्त जिम मेह रे ।।**

**ग.वि-** जगज्जनजातजीवातुजिनवरशरणं, तदनुकूलताभाक् योग्यत्वं च

तदैवोपत्पद्यते यदा अनन्तानुबन्धिकषायविजयतो शुद्धमनःपरिणतिर्जायते, ततोऽधिकतरमनोविशुद्धिमाधातुमर्हदादिचतुष्कस्य शरणं प्रकृष्टभावेनाधेयम् तेऽत्रार्हन्तः सिद्धाः साधवो जिनधर्मश्च, तत्र पवित्रशरणचतुष्कपरिचायकलक्षणं, महोपाध्यायवर्यो दर्शयति प्रथम शरणमर्हताम्, ते जगदीशा जगन्मित्रभूताः धर्मोपदेशनपर्षदि 'समवसरणे' समुपविश्य, पुष्करावर्त्तमेघ इव नित्यं सत्यं सत्यप्रथया स्याद्वादनययुक्त्या धर्मवचनसुधां वर्षति,

**पद्या0** - श्रद्धाशुद्धे मते या विमलपरिणती, राध्यतत्वेषु रक्तिः,
प्राद्या राध्येषु सार्वास्त्रिभुवनगुरवः, सत्त्ववृत्त्याऽऽशरण्याः;
येषां सत्वेषु मैत्री सहजहितभृता, तेन विश्वैकनाथास्,
तेऽर्हन्तः स्युः शरण्या इति वदति यशः, स्तौमि तं वाचकेन्द्रम् ।।६।।

**पद्या0** तेऽर्हन्तो राजमानाः प्रवचनसमये, पुष्करावर्तमेघाः,
मिथ्यात्वाद्याऽग्निदग्धाः कलुषितमनसो, ये जनाः कर्मबद्धाः;
तान् सत्तत्वाऽऽप्तिशीतान् विदधति कुशलान्, नष्टशल्यान् विबुद्धान्,
नाथे यो मेघतीत्थं स्तुतिवचनवरः, स्तौमि तं वाचकेन्द्रम् ।।७।।

**मूल-६** **शरण बीजुं भजे सिद्धनुं, जे करे कर्म चकचूर रे।**
**भोगवे राज शिवनगरनुं, ज्ञान आनन्द भरपूर रे ।।**

**ग.वि** -द्वितीयं शरणं सिद्धानां, ये कर्माणि सर्वाणि समूलमुन्मूल्य शिवनगरराज्यं निष्कण्टकं, नित्यसौख्यं, ज्ञानमयं, चैकान्तिकानन्दमनुभवन्ति, अतः 'चिदानन्द' इति सर्वेषां सिद्धानामनर्थान्तरम्, सिद्धत्वं च मुक्तावस्थत्वं हि सकलभव्यजनानां परमं चरमं च ध्येयम्।

**पद्या0** - सिद्धाः मुक्ताः शरण्या गहनभववने, भव्यसत्त्वैर्हताघं,
ध्यायं ध्यायं सुधीभिर्वरशिवनगरं, प्राप्यते तैः पराऽऽप्तम्;
चिद्भि मुद्भिः सदा ये परमरतिमयाः, कृत्स्नकर्मांशनाशा,
दित्थं सिद्धान् प्रबुद्धो वदति वरसुखाँस्तौमि तं वाचकेन्द्रम् ।।८।।

**मूल-७** **साधुनुं शरण त्रीजुं धरे, जेह साधे शिवपन्थ रे।**
**मूल-उत्तरगुणे जे भर्या, भवतर्या भावनिर्ग्रन्थ रे।।**

**ग.वि-** तृतीयं शरणं साधूनाम्, ये निर्ग्रन्था बाह्याभ्यन्तरममत्वहठाग्रह-परिग्रहादिग्रन्थिविनिर्मुक्ताः श्रमणाः, संयमे संयमजीवितं सफलयन्तो, मूलोत्तरभेदभिन्नं जिनवचनमादृत्य श्राम्यन्ति, शिवपथं मोक्षैकलक्ष्यमुपजीवन्ति, ते संयताः तपोधनाः निर्ममाः देहेऽपि निरीहाः सन्ति, अत श्रमणगुणावाप्तिचिकीर्षया श्रमणानां हि शरणं कर्तव्यम्, यतस्तदवाप्तिस्तद्भाववतां हि हेतुमत्वं सफलतामाटीकते।

**पद्या0** मुक्त्यै नित्यावधानाः परहितनिरताः, संयतास्तत्त्वदक्षाः,
पञ्चाचारप्रवीणाः करणदमकलाऽभ्याससौख्यप्रधानाः;
निर्ग्रन्थास्तान् श्रयध्वं कुशलमतिभृता! मुक्तिमार्गे प्रयाता,
एवं येन प्रशस्ताः परमसुखजनाः, स्तौमि तं वाचकेन्द्रम् ।।९।।

**मूल-८ शरण चोथुं धरे धर्मनुं, जेहमां वरदयाभाव रे।**
**जेह सुखहेतु जिनवर कह्यो, पापजल तरवा नाव रे ।।**

**ग.वि.-** चतुर्थं शरणं धर्मस्य, धर्मेणैव हि धार्मिकजनमनोवाञ्छितविधानम्, ये जीवा अचलम्, अनन्तम्, अनुपमम्, आत्मनः सौख्यमिच्छन्ति, तत्सौख्यस्य निदानमपि तन्मयमेव युक्तियुक्तं सम्भवति, अत आत्मनो स्वाभाविके स्वरुपे गुणे चाविर्भूते हि तस्य स्वाभाविकं सौख्यं संपद्यते, तद्हेतु निर्धारणपूर्वकमेवार्हद्भिः प्रोक्तम्, यत् 'धर्मस्तु दयामय एव, नाऽन्यः स एव उत्कृष्टं मङ्गलं मङ्गलस्य कार्यं कारणं च **धम्मो मंगलमुक्किट्ठं, अहिंसा संजमो तवो**। तथा परस्मिन्नात्मनि यः स्वात्मवत् पश्यति स एव धीमान्, धर्मवान्, अन्यच्च सर्वेषां प्राणिनां स्वप्राणा प्रियतमा एव, अतः परजीवे दयाभाव एव योग्यः, स च धर्मो, योऽहिंसामयः स एव सुखस्य वरो हेतुरिति हेतु हेतुमद्भावज्ञैः, सर्वज्ञैः जिनवरैर्व्याख्यातः । सैष धर्मो हि भवार्णवतरणायालं तरीयति इति भवार्णवतीर्णाः परमतारकाः प्रवदन्ति।

**पद्या0** पापाऽकूपारपारं गमयति जनता, जैनतत्त्वावसक्ताः,
पोतः श्रीजैनधर्मः प्रवरवरदो, यत्र कूपो दयात्मा;
तीर्णाः श्रित्वा तमेकं शुभहितकरणव्यापृतैः प्रोक्तमीशैर्,
येन श्री जैनधर्मं श्रय गदितमिति, स्तौमि तं वाचकेन्द्रम् ।।१०।।

**मूल.९ चारनां शरण अे पडिवजे, वली भजे भावना शुद्धि रे ।**

**दुरित सवि आपणा निन्दीअे, जिम होए संवरवृद्धि रे ।।**

**ग.वि.** एवं जिनान्, जिनतत्त्वाराधनसिद्धान् सिद्धान्, जिनोक्त-मार्गाराधनपरायणान् श्रमणान्, जिनोक्तं च दयामयं धर्ममेवं शरण्यचतुष्टयं प्रतिपन्नानामेव चित्ताशयशुद्धिर्भावशुद्धिश्च भवति, अधुना शरणरहिते भवारण्ये परमाश्रयं शरण्यचतुष्टयमवाप्य भव्यानामाराधनाऽध्वानमग्रजिगमिषया यत् कर्तव्यम्, तत् वाचकवरा: समुपदिशन्ति यत् शरण्यानां शरणगतानां भवमुमुक्षूणां जिनादीनां गुणा उपादेयत्वेनाद्रियमाणास्तथा निजदोषा भवभ्रमणस्य परम्पराया हेतु-फलरुपा-वभासन्ते, शरण्यगुणोत्कीर्त्तनात्, तथा निजदोषदर्शनविकसनात्, संवरस्य शुभानुष्ठानस्य शुभानुबन्धस्य वृद्धिर्भवति।

**पद्या०** संसारे चारकेऽस्मिन् नहि तव शरणं, कोऽपि कुत्रापि तस्मा-

देतच्छ्रेयश्चतुष्कं शिवकरशरणं, हेतु यद् भावशुद्धेः;

आत्मन्! मुक्ते र्द्वितीयं तव चरणमिदं, यत् तवाऽघस्य गर्हा,

स्यादित्थं संवरर्द्धिः शुभमतिवचन:, स्तौमि तं वाचकेन्द्रम् ।।११।।

**मूल-१० इहभव परभव आचर्या, पाप अधिकरण मिथ्यात रे।**

**जे जिनाशातनादिक घणां, निंदीअे तेह गुणघात रे।।**

**ग.वि.** अथ दोषोन्माथकृते दोषा ज्ञातव्या भवन्ति, अतो यशोवाचका: यशोवाचकं वचन्ति यन्निरन्तरसंसृतिसंसरणमध्ये जन्मन्यत्र परत्र वा यानि दूष्कृतानि कृतानि तानि गर्हामर्हन्ति तत्र मुख्यतमं दुष्कृतं मिथ्यात्वं, येन जिनादीनामाशातना संभवति अन्यत् 'पापं न पापं मन्वाना अज्ञानतमोहता जना: पापं कुर्वन्ति, पापोपदेशं, पापोपकरणं, पापाधिकरणं समुपदिशन्ति समुपकुर्वन्ति संसेवन्ते च, मुक्तिमार्ग-प्रह्वान्त:करणकरणशीलानामाशातना तु संसारेऽनुसमयं सातविघातिन्यसात-विधायिनी च, पापं च हिंसया, हिंसा च भवतरोर्मूले मिथ्यात्वालवाले जलकुल्यातुल्या।

**पद्या०** यैर्घात: स्याद् गुणानां, जिनमुनिवचसां, निन्दया पापमूलं,

मिथ्यात्वं पाप्मनां चाऽधिकरणकरणं, प्राणिघातादिपापम्;

मिथ्यैतद् दुष्कृतं मे, प्रतिभवमपुनर्भावयोगेन नित्यम्,
येनैवं दर्शितोऽध्वा गुणशुचिकरणे,स्तौमि तं वाचकेन्द्रम् ।।१२।।

**मूल-११ गुरुतणां वचन ने अवगणी, गुंथिया आप मत जाल रे।**
**बहु परे लोक ते भोलव्यां, निंदीअे तेह जंजाल रे ।।**

**ग.वि** तथा सर्वत्र सर्वज्ञाऽऽज्ञाप्रधानविधानानां गुरुवराणां चारित्रसुमनसां वचांसि वराणि परमोपकारीणि सन्ति, तान्यवगणय्य निजमतिविलसितं मतमसितं समाय! त्वया निर्माय तत्र मुग्धा मार्गमजानाना जना वागुरायां मृगा इव विप्रलम्भं प्रापय्यापारासाताकूपारे संसारे भ्रान्तिवन्तो भ्रमणवन्तो विहितास्तं निजकुधीषणनिशितं निशायितं कुमतं, तस्य गर्हणा तवाऽधुना मुक्तिमार्गमापन्नस्य सर्वथैवौचित्यमञ्चति,

**पद्या०** मेधादर्पान्धकाराद् हतनयनमनोभ्रान्तिपाशप्रबद्धः,
स्वच्छन्दं वाक्प्रपञ्चैर्ग्रथितनिजमते, पाशयित्वाऽबुधांस्तान्;
दुष्पूरे जन्मगर्त्तेऽ सुखभरविकटेऽपातयं जाल्म! धिग् मा-
मित्थं यः पापपङ्के वचनजलदति, स्तौमि तं वाचकेन्द्रम् ।।१३।।

**मूल (१२) जेह हिंसा करी आकरी, जेह बोल्या मृषावाद रे।**
**जेह परधन हरी हरखिया, कीधलो कामउत्माद रे**

**ग.वि.** दुष्कृतगर्हाविधाने महोपाध्यायाः साम्प्रतं संसारजीवितेऽसंयतेन्द्रिये यान्यष्टादशपापानि जीवेनाचरितानि तानि वर्णयित्वा तत् त्यागोपदेशमादिशन्ति तत्र प्रथमं मिथ्यात्वादिमूलं यत् परमेश्वरै र्जिनश्वरै निकृष्टातिनिकृष्टं प्राऽघं प्रोक्तं तद् परप्राणव्यपरोपणपरं हिंसाकृत्यं विद्यते, तथा हिंसासाहाय्यकृतेऽसत्यवाक्यमुदितम्, येन प्रच्छन्नं हिंसैव पोषिता, तथा मन्मथनमदनमदिरादरात् कामोन्मादमथित-मनस्तनुत्वाद् ग्रहिलता विहिता, तेऽपि हिंसाकृत्यवर्धिष्णू भवताऽत्र भवत्राण-प्राण-भूत-सङ्घातहितविधातृवीतरागसर्वज्ञवचनानुसारिणा निन्दनीये, भावतोऽ पुनः करणीयत्वेन।

**पद्या०** क्रौर्याद् घोराद् व्यथा या तनु-वचन-मनोहिंसनात् प्राणभाजां,
मिथ्या वाचस्तथाऽऽर्त्तिः परधनहरणात्, प्राणिनस्ते प्रणष्टाः;
ओजः सर्वस्वहारी करणगुणबलोऽनङ्ग उन्मादभारी,

योऽवक्त्येषामघानामतिकटुकफलं, स्तौमि तं वाचकेन्द्रम् ।।१४।।

**मूल. (१३) जेह धन-धान्य मूर्च्छा धरी, सेविया चार कषाय रे।**

**रागने द्वेषने वश हुवा, जे कीया कलह उपाय रे।।**

**ग.वि. 'मूर्च्छा परिग्रह'** इति सूत्रोक्तनीत्या धन-धान्य-काय-कलत्र-पुत्रादिषु ममत्वमर्मवती जीवितवती या मूर्च्छा गृद्धिरासक्तिस्तया बाह्याभ्यन्तरपरिग्रहग्रहविहस्तचैतन्यगुणो भूत्वा त्वया प्रधानतया हिंसैव व्यधायि रे! जीव! धिग् धिग् त्वां धिग् धिग् धिग् धिग् ताञ्च मूर्च्छाम्....

तथा कषाया ये कषन्ति जीवं जीवगुणांश्च मतिमावृत्य, तत्र कोपो येनाऽनलायितमात्मगुणोपवने। मानश्चाऽधोगतिपतनायैव परजनसुजनस्वजनसाधुजन-गुणापकर्षणं दोषोत्कर्षणं, निजासद्भूतगुणोत्कर्षनिजदोषपोषणकरोत्कर्षण-परायणमनस्कत्वम्, माया च या परवञ्चनप्रवणमननचिन्तनवचनाऽऽचरणात्मिका, लोभश्च यादृशी चेतोवृत्तिर्याऽपारतया पारावारमपि गोष्पदीयति यया चाऽऽत्मा धनादि गृद्धिमहान्ध्याऽन्धितधिया निजं परं वा न वेत्ति किन्तु धनमेव जीवनं मन्यते भूरिणि पापानि विधत्ते, एवं ये क्रोध-मान-माया-लोभाः संसारपोषणपराः कषायास्तान् निन्द, तथा रागं संसारिकसुखासिकतृष्णामयं, द्वेषं च, येन हेतुभूतेन सुखासिकाऽऽस्वादनविघ्नजनकान् प्रति जीवो द्वेष्टि, तेषामनिष्टं निजेष्टमिवेच्छति, सन्तापोत्पादनप्रवृत्तिं यावत् मरण-मारणकरणव्यापारप्रवृत्तो भवति, ताभ्यामुभाभ्यां राग-द्वेषाभ्यां विवेकविलोचनविकलतया कलहः कलह-निमित्तोपायान्वेषणपरस्त्वं मनसा वचसा वपुषा यत् कृत्यमपकृत्यं' कर्तुं प्रवर्तसे, प्रवर्तयसि चापरान्, या आत्मगुणात्मिका कला 'ज्ञानं' तां हन्ति, अतो मनीषिमहात्मभिः 'कलह' इति सार्थकं निरुक्तम्, तत् त्वमात्मगुणघातकान् मूर्च्छाकषायरागद्वेषनिदानितकलहोपायान् दूरं निन्द ।

**पद्या०** योऽस्वीये स्वीयभावस्तदनु गतमले, मानसे धीर्ममेति,
प्रोक्ता मूर्च्छा धनादौ प्रतिपलकलुषा, यत् कषायास्तु जुष्टाः;
रागाद् द्वेषाच्च मोहाद् बहुकलहकृते, व्यापृता धीरनिष्टे,
व्यक्तं प्रोक्तं तु येनाऽऽर्हतवचनगतं, स्तौमि तं वाचकेन्द्रम्।।१५।।

**मूल-१४ जूठ जे आल परने दीया, जे कर्या पिशुनता पाप रे।**

**रति-अरति निंद मायामृषा, वली य मिथ्यात्व संताप रे ।।**

**ग.वि** कलहकरणप्रवर्त्तनव्यापृतान्तःकरणतया त्वया परस्मिन् यो दोषलेशो नास्ति,तमुद्भाव्य प्रकाशमानीतः, तं परापवादवदनं कलङ्कदोषाद्यारोपणम्, तदनुरुपमेव पैशुन्यं त्वयाऽकारि, तेन त्वं 'पिशुन' इति पिशुनितः स्वच्छसन्मतिभृतां सतां सन्तत्या, अतस्तां निन्दारुपां पिशुनतां दौर्जन्यापराभिधामपधेहि, विधेहि चात्मानं सज्जनजनप्रथाप्रथितपथि, तदर्थं च स्वजनसज्जनसाधुजननिन्दनीयं पैशुन्यं गर्हय,

पुद्गलनिकाये कायिके वाचिके मानसिके सांसारिके सुखे या रतिः तद्विपरीते च याऽरतिः ते रत्यरती, आत्मिकं सौख्यं, यत् पौद्गलिक-भावाऽभावस्वरुपं चिदानन्दमयं, तदवरोधके स्तः अतस्तयो र्जुगुप्सैव कार्या, त्वयात्मिकसुखाभिलाषाधीषणेन।

माया या परप्रतारणप्रवृत्तिः तया युक्ता, तस्यै वा प्रयुक्ता मृषाभाषा,तां मायामृषां निन्दित्वा, निजवचनपालनपरायणानां सज्जनानां मध्यमध्यास्स्व।

चरमं किन्तु परमं पापं पापौघनिदानं, पापलतामूलपानीयं मिथ्यात्वं, येन तव भवाम्भोनिधिमध्ये मज्जनोन्मज्जनं...

अतः सर्वज्ञवचनं सम्यगवगम्य, मिथ्याभावं निराकुरु तन्मूलांश्च सकलान् पापप्रकारप्रकरान् गर्हय, एवं च त्वं निष्पापोऽनर्घो भविष्यसि, तादृक् चाऽनर्घ्यता तव भाविनी या परमपदप्रापणप्रवणा पद्धतिर्विद्यते!

**पद्या०** दोषारोपः परस्मिन् कृतविकृतकृताऽऽविष्कृते कूटबुद्ध्या,
पैशुन्यं शून्यदोषे सरलशुचिमतावन्यदोषप्रकाशः;
देहाऽऽसक्ती रतिश्चाऽरतिरशुभ- खगाऽवर्णवादः परेषां,
मिथ्यात्वाद्याऽघमाख्यद् भ्रमणकृदिति यः, स्तौमि तं वाचकेन्द्रम् ।।१६।।

**मूल-(१५) पाप जे एहवां सेवियां,निंदीए तेह त्रिहु काल रे।**

**सुकृत अनुमोदना कीजीए, जिम होए कर्म विसराल रे ।।**

**ग.वि.** संसारकान्तारोद्गतानि कलुषानि कण्टकीभूय भूयोभूयश्चेतनां विध्यन्ति, इति सद्भावाऽऽभानेन त्रैकालिकानि तानि गर्हयित्वा, सुकृतमनुमोद

१. पापपङ्कस्य धवलनेनोज्ज्वलतोपादानक्रियया, जातेन नैर्मल्येन धौतं धवलीभूतमन्तःकरणं, तेन शुभ्रतां प्रकाशं विधायीनि शुभानि कृतान्याचरणानि भावे क्तप्रत्ययेन यस्मिन् सः, तथा तम् ।

स्वेत्थमधुना श्रीमान्नुपाध्यायवर्याः [1]पापपङ्कधवलनजातनैर्मल्यधौतान्तःकरण-शुभ्रताविधायि शुभकृतं सुकृतवातमुपदिशन्ति, यत् समयभाषया सुकृतानुमोदनेति परिभाव्यते जिनसमयकोविदैः, स्वहितचिकीर्षयाऽऽविर्भूत-भूतहितधवलमनीषया सुकृतिर्भिर्यतिभिर्यतिचरणोपासकैश्च, त्वया च यदा कदाचिदाचरितानि तानि सर्वाणि प्रमोदभरं प्रसारविशदचेतसाऽनुमोदस्व तत्फलं तु आत्मगुणगगनाभोगे घनायमानानि घनानि कर्माणि विध्वंसमाप्नुयुः।

**पद्या०** अद्याऽवद्यानि यानि [1]स्वविहितहितान्यत्र वात्र प्रदोषाद्,

गर्हा तेषां तवाऽऽत्मन्! परमहितप्रदा, मा कृथास्तानि भूयः;

एवं सर्वस्व सौम्याऽऽर्हतवचनपरः, कृत्यमित्याऽऽघलोपं,

यो [2]वेद स्वात्मविद्यां जनहितधिषणः, स्तौमि तं वाचकेन्द्रम् ।।१७।।

**मूलः१६. विश्व उपकार जे जिन करे, सार जिननामसंयोग रे।**

**तेह गुण तास अनुमोदीअे, पुण्यअनुबन्ध शुभ योग रे ।।**

**ग.वि.** इत आरभ्य पूज्या उपाध्यायमहोदया यदुपदिशन्ति, तत् शुभाराधन-जीवितव्ये सुधासमानं सुधीभिः सम्यगवधार्यमेव सुकृतानुमोदनम्,

तत्र सर्वतः प्रथमं प्रशमितानादिकर्मारातिगणा अर्हन्तः संस्मर्तव्याः 'सत्' तया ध्येयाः ये स्याद्वादोक्तिप्रयुक्त्या विश्वमुपकुर्वन्ति, तेषां नामापि पापसंतापोपशमनाय प्रभवत्यलम्, तेषां विश्ववन्द्याभिनन्द्यानवद्यगुणानामानन्त्यं सङ्ख्यातुं सङ्कीर्तयितुं स्तोतुं वा केवलज्ञानाविर्भूतसकलविश्वभावानां केवलज्ञानिनामपि न पार्यते, यथा द्रष्टुं शक्यते कदाचन प्रलयकालप्रवातोद्धुतपयोराशेः पयोराशेरार्विभूतमहार्घरत्नानि, न च गणयितुं पारयति सहस्रवदनीभूय सहस्रनयनोऽपि, अतस्तेषामर्हतां सर्वज्ञानां वीतरागानां एकमपि गुणं जीवनोपजीव्यं भवेदेव, तर्हि त्वयाऽनिवर्त्तिपुण्यानुबन्धि पुण्यामृतपानाय सुकृतमनुपलमनुमोदितव्यमेव।

**पद्या०** सत् कृत्यं तेऽधुनात्मञ्जगदुपकृतिकृद्, यो वचोऽवक् शुभाग्रं,

नामाऽप्यस्यास्ति पाप्माऽचलचलकुलिशं, योगिभिः ध्येयमेतत्;

स्याद्वादित्वाऽऽद्यमेया गुणगणसरितो, मुक्तिपाथोधिगम्याः,

१. सु-अविहित = स्वविहित... २. सुष्ठु आत्मविद्यामिति अर्थः।

ध्येया अर्हन्त एवं सुहितदमवदत्, स्तौमि तं वाचकेन्द्रम् ।।१४।।

**मूल-१७ सिद्धनी सिद्धता कर्मना, क्षय थकी उपनी जेह रे ।**

**जेह आचार आचार्यनो, चरणवनसिंचवा मेह रे।।**

**ग.वि.** द्वितीयं सुकृतं सिद्धपरमात्मनां सिद्धत्वम्, यत्त्वर्हनिशमेव ध्यानविषयतामञ्चति योगीश्वराणां योगमार्गे जिगमीषूणां च, सिद्धा हि सर्वकर्म-विनाशावाप्तसिद्धत्वावस्थाः, सिद्धस्वरुपावस्था वस्तुतस्तु सर्वेषामात्मनां स्वरुपत्वाविर्भूतावस्था, ततो न सिद्धानामस्माकं च कोऽपि भेदः, ते सिद्धा भगवन्तः कर्मावरणरहिता अनभ्र इवादित्यः, वयं च कर्मावरणाच्छिन्नतिरोहितमूलस्वभावाः, अतो निजस्वरुपावाप्तये स्वरुपाविर्भवनाय ते सिद्धा एव ध्येयाः, तदेव परमं सुकृतं, तदेव सदैवानुमोदनभाजनम्....!

तृतीयं सुकृतानुमोदनं...आचार्यवर्याणामाचारगुणानुमोदनम्, ते हि जिनोक्ततत्वपथप्रदर्शने प्रदीपाः तेषाञ्चोपदेशपीयूषाभिषेकपोषमवाप्य चरणवनं प्रफुल्लितं विकसितं सुवासितं सुफलं भवति।

**पद्या०** दृष्टं कर्माष्टकं यैर्भवधरणिधरे, दिग्गजस्फारवीर्यं,

तष्टं तप्त्वा तपो येऽविचलपदमिताः, केवलज्ञानमाप्त्वा;

आचार्या जैनसङ्घे चरणवनघनाः[१], सर्वदा सार्वसंज्ञाः,

ध्येयः पन्था च मुक्तेर्विवृतमिदमहो, स्तौमि तं वाचकेन्द्रम् ।।१९।।

**मूल-१८ जेह उवज्झायनो गुण भलो, सूत्रसज्झायपरिणाम रे।**

**साधुनी जे वली साधुता, मूल-उत्तर गुणधाम रे ।।**

**ग.वि.** चतुर्थं सुकृतम्-उपाध्यायपदप्रतिष्ठितानाम्, जिनागमपाठनपराणां श्रुताध्ययनाध्यापनसुकृतं सदैव मतिमद्भिर्मुक्तिपदप्रस्थितैर्भव्यात्मभिरनुमोदनीयम्। अतः पाठक-वाचकपर्यायपूज्याऽभिधेयानां श्रुताभ्यासाऽऽयासाध्वानमाश्रित्य भव्याः ज्ञानमार्गमादौ धृत्वा कर्मरिपून् पराजित्य संपराये विजयवरमालारोपणकीर्त्तिताऽऽरव्या भवन्ति।

पञ्चमं सुकृतम्-संयमाराधनानिरतानां संयतानां संयमाराधनाऽनुमोदनम्, ये

१. घनाः-मेघा

परमदयालवो निर्ग्रन्था: संयता: सर्वज्ञाऽऽप्तै: प्रज्ञप्तमुक्तिमार्गमध्यास्यैव तन्मयास्तच्छीला एव, नैव कदापि क्वापि निर्वाणाध्वानाच्चलति, नमो नमस्तेभ्यो, नमोर्हणामहितेभ्यो नमोस्तु श्रमणेभ्य:, तेषां साधूनां साधूता, मूलगुणोत्तरगुणसमाश्रिता अत एव ते सिद्धिपदं साध्नुवन्ति, भवान्तविश्रामाय श्राम्यन्ति, ममत्वादिकं मोहं मथित्वा निर्ग्रन्था: भूता:, .

**पद्या0** यज् ज्ञातं सर्वविद्भिर्नयगमसुगमं, तत्त्वमात्मैकसौख्यं,

तच्छैक्षाञ्ज्ञापयन्तो मृदुवचनगुणा:, वाचका: शास्त्रधीरा:[१]

आप्ताऽऽख्यातानुयाता: [२]शयशयितशिवा:, भूतसङ्घातताता:,

येनाऽगीयन्त सत्यं जिनमतमुनय:, स्तौमि तं वाचकेन्द्रम् ।।२०।।

**मूल-१९ जेह विरति देश श्रावकतणी, जे समकित सदाचार रे।**

**समकित दृष्टि सुर नरतणी, तेह अनुमोदिअे सार रे ।।**

**ग.वि.** षष्ठं सुकृतं-श्रमणोपासकानां श्रमणोपासना, श्रावणानां जिनप्रवचनश्रवणपरायणता, जिनवचनपरिणत्या दिवानिशं, संपत्सुखेष्वलीन-भावेन,विपद्दु:खेष्वदीनभावेन प्रसादविषादविनाभावेन प्रकर्षप्राप्तप्रज्ञावद्भि: श्रमणत्वलाभायैव यतितव्यं, तदर्थं यानि सुकृतानि, सर्वथैवानुमोदनीयानि तानि सम्यक्त्वमूलानि द्वादशव्रतानि, सर्वगुणसंपत्संपन्नाऽपुनरावृत्तिं मुक्तिमवा-पयितुमलम्,

सप्तमं सुकृतम्-ये सर्वतो देशतो वा विरतिमाराद्धुं न शक्ता: किन्तु विरतिमेवादेयतान्वितां मन्यन्ते, विरत्यैव कर्ममुक्ति:, मुक्तावेव च सर्वथा सर्वविधं सर्वतोरुपं, सर्वकालीनं सर्वश्रेष्ठतरं सौख्यं संभवति इति दृढं प्रागल्भ्यपूर्णं प्रतिज्ञाय, नित्यमेव निजमनोमन्दीरे जिनं वीतरागद्वेषमोहं देवं, जिनाख्यातं स्याद्वादमयमहिंसाप्रधानं तत्त्वं धर्मं, जिनोपज्ञतत्त्वाराधनातत्परानाचार्यो-पाध्यायश्रमणश्रमणोपासकवर्गान्, तत्फलभूतांश्च सिद्धान् संस्थाप्य सर्वदा सम्यक्त्वमेवालम्ब्य जीवन्ति, तेषां सम्यक्त्ववतां नराऽमराणां जिनवचनसंशुद्धं सम्यक्त्वं तत्वश्रद्धानं मुक्त्याधानप्रधानं सर्वदैवानुमोदनीयम्...

१. शास्त्रेण धिया ईरते धीरा:। २. शये-हस्ते शयितं शिवं येषां यैर्वा हस्तगतकल्याणा इत्यर्थ:।

**पद्या०** सर्वज्ञाः वीतरागाः सुर-नरमहिता, दृष्टमोक्षाश्च सिद्धा-
ये सर्वत्यागिनस्तानभिरुचिप्रणता, देशतस्त्यागवन्तः;
सम्यक्तत्त्वार्थश्रद्धामसुर-सुर-नरा, येऽपि सम्यक्त्वभाजस्,
तेषां प्रेम्णाऽनुमोदोऽप्रथयदसुहितात्, स्तौमि तं वाचकेन्द्रम् ।।२१।।

**मूल(२०) अन्यमां पण दयादिक गुणो, जेह जिनवचनअनुसार रे।**
**सर्व ते चित्त अनुमोदीअे, समकित-बीज निरधार रे ।।**

**ग.वि.** अन्येऽपि जिनमतमनवाप्यापि सदाचारनिर्मलचेतस्कतया निष्कामप्रेमप्रवृत्तदयाकृत्यं, संसारे सांसारिके कृत्ये निर्लेपताऽभिजात्यादिकं यत् यान्ति, ततस्तेषां यत् किञ्चित् शुभं शुभ्रं, तत् सर्वमनाभोगेनापि यदि जिनवचनानुभावानुसाराणि, लौकिकसुकृतानि, तानि नयाश्रितमत्या शुभानि मत्वानुमोदनीयानि, एवं च कृत्यविदां लोकोपकारपरायणानां कृतिनां सद्भूतगुणानुमोदनं तु शास्त्रे सम्यक्त्वामरपादपस्य बीजमिव प्रोक्तम्,

**पद्या०** सार्वज्ञादन्यमार्गे शिवसुखकरणभ्रान्ततत्त्वेषु रक्तास्,
तेषां यद् यद् दयाद्यं जिनवचनमनुश्रित्य सौहार्दपूर्णम्;
तेषां तस्यानुमोदः सुविहितमनसाऽऽचीर्ण एवार्हतैर्यत्,
सद् यत्, तत् सार्वमित्थं वदति यतिपतिः,स्तौमि तं वाचकेन्द्रम् ।।२२।।

**मूलः२१ पाप नवि तीव्र भावे करे, जेहने नवि भवराग रे।**
**उचित स्थिति जेह सेवे सदा, तेह अनुमोदवा लाग रे।।**

**ग.वि.** ते सरलाऽमलमानसः सुमनसः कदापि पापं नाऽऽचरन्ति, यदाचरन्ति, तदा तेषां मनसि पापाचरणे तीव्रभावो न विद्यते, यतो तीव्राद् रौद्राद् रौद्रफलाद् भीतभीता भवस्वरुपं च यथातथा येनकेनचिन्निमितेन जानन्ति, चित्तं भवे रक्तं न भवति, तेनानवरतं स्वौचित्यं संचिन्त्यैव किमपि कृत्यं कुर्वन्ति, अतस्ते सुमनसः शुभमनसाऽनुमोदनीयाः

**पद्या०** पापे तीव्रानुभावो न हि भवति भवे, रागभावोऽपि तीव्रो,
येन स्यान्नाऽनुबन्धं प्रतिभवमसुखं, शुद्धमार्गस्तु सद्यः;
औचित्यं नित्यमेवं विदधति सुजना, नैव सीदन्ति यस्मान्,

मोदस्वैवं गुणाप्त्या य इति कथितवान्, स्तौमि तं वाचकेन्द्रम्।।२३।।

**मूलः २२ थोडलो पण गुणपरतणो, सांभली हर्ष मन आण रे ।**

**दोष लव पण निज देखतां, निर्गुण निज आतमा जाण रे।।**

**ग.वि.** ये नित्यं परगुणाणुपर्वतात् प्रशंसापयोवाहिनीं निजमनोवनेऽवतारयन्ति, सद्भूतपरगुणप्रशंसासुधया शुभभावनाऽऽलवालं संसिच्य शुभ्रप्रवृत्तिलतामुज्जीवयन्ति, सदाचारेण पुष्पितां परिकीर्णयशःकीर्त्तिपरिमलां, शुभभाविफलयुतां विदधति, तथाविधसुमनस्त्वेन ते निजदोषस्य लवमपि यदा पश्यन्ति, तदात्मानं निर्गुणमेव मन्यन्त एवं परगुणनिजदोषदर्शिनस्तानभिवन्देत.

**पद्या०** येषां चित्ताब्धिवृद्धावणुरपि सुगुणः, स्यात् शुभः शीतधामा,
चित्तामोदश्च येषामनणुरिह जने, सद्गुणाम्भोजभृङ्गः;
दृष्ट्वाऽणुं दोषमेकं, निजमगमिव ये, निर्गुणंमानिनः स्वं,
तानीडिष्वेति पूज्यः कथयति सुगुरुः, स्तौमि तं वाचकेन्द्रम् ।।२४।।

**मूलः २३ उचित व्यवहार अवलम्बने, इम करी स्थिरपरिणाम रे।**

**भावीअे शुद्धनयभावना, पावनाशय तणुं ठाम रे ।।**

**ग.वि.** एवं अर्हदादिशरणगमनेन दुष्कृतसुकृतयोर्गर्हाऽनुमोदनाभ्यां व्यवहारसमग्रमौचित्येन सन्मानवन्तं विरचय्य, मनःपरिणतिं स्थितिमत्तया संस्कृत्य, नयपरिष्कृतां भावनाविशोधिं विधाय, निजाऽऽशयप्रसारं तारोज्ज्वलं पावनं कुर्याः...

**पद्या०** औचित्याच्छुद्धिमत् स्वव्यवहृति विशदात्, शल्यहानेः स्थिरत्वं,
चेतोवृत्ते र्विधेयं, स्वकृतिपरिणतौ, ध्येयमेवार्हतोक्तम्;
पावित्र्यादाशयस्याऽऽविमलनयमया, भावना याऽऽर्हतोक्ता,
भाव्यैवं पावना सा, सदुपदिशति यः, स्तौमि तं वाचकेन्द्रम् ।।२५।।

**मूल-२४ः देह मन वचन पुद्गल थकी, कर्मथी भिन्न तुज रूप रे।**

**अक्षय अकलङ्क छे जीवनुं, ज्ञान आनन्दस्वरुप रे।।**

**ग.वि.** भावविशुद्धिसुधामग्नस्त्वं जानासि, यत् 'त्वमात्मा' असि, देहमनोवचनमयोऽपिदेहस्थोऽपि, मनःप्रभृतिभिः कार्यकृदपि वचनादिभिरीहितप्रवृत्तिं

कुर्वन् कारयन्नपि त्वं पुद्‌गलमयैस्तैः कर्मभिश्च नितान्तभिन्नोऽसि, तव स्वरूपं तु निरुपममस्ति, रुपरहितस्त्वमक्षयः, कर्मकलङ्कविनाभूतः, केवलं चैतन्य-ज्ञानानन्दमयस्त्वम्, तदेव तव स्वरूपमस्ति.

**पद्या०** आत्मंस्ते रूपमेतत् तनु-वचन-मनः, कर्मभिः पुद्‌गलै र्यद्

भिन्नं भिन्नं विभिन्नं सततममितशं, निष्कलङ्कं चिदाख्यम्;

नित्यानन्दात्मकं सत् शिवमयमचलं, सर्वदाऽऽस्थायि मुक्तं,

कार्यं स्यान्नैव हेतो र्विरह इति वदन्, स्तौमि तं वाचकेन्द्रम् ।।२६।।

**मूल:२५ कर्मथी कल्पना नीपजे, पवनथी जेम जलधिवेल रे ।**

**रूपप्रगटे सहज आपणुं, देखतां दृष्टिस्थिर मेल रे ।।**

**ग.वि.** प्रबलपयःपूरप्रवाहवशतोऽवगाहनविप्रतिकूलाभिः कूलङ्कषाभिः परिपूर्यमाणे पयोनिधौ प्रचण्डपवनप्रोच्छलत्-तुङ्गतरङ्गभङ्गा इवाकल्पनीय स्वभावफला सर्वापि मनःकल्पना कर्मभिरेव जायते, तत्रैकान्तेन निजस्वरूपे स्थिरतरया दृष्ट्या संसारस्वरूपं भावयतामसुमतां निजाक्षुब्धः स्तिमितः स्वभावः प्रादुर्भवेत्, वेलानिवृत्तौ जलधेरिवातरलतरः।

**पद्या०** भङ्गैस्तुङ्गास्तरङ्गा पवनजवनतो, भीषणां वार्धिमध्ये,

सङ्कल्पैः कल्पनौघाः परगुणविषयैः, कर्मभिः क्लेशकृष्णाः;

एवं चित्तेऽस्वचिन्तां विदधति सततं कर्ममुक्तं स्वकीयं,

रुपं शान्ताब्धिवत् ते भवति वदति यः, स्तौमि तं वाचकेन्द्रम् ।।२७।।

**मूल:२६ धारतां धर्मनी धारणा, मारता मोहवडचोर रे।**

**ज्ञानरुचिवेल विस्तारतां, वारतां कर्मनुं जोर रे।।**

**ग.वि.** एवंरीत्या निजे स्वरूपे स्थैर्यमयदृष्टया ध्यानमग्नस्त्वं यदा 'धारणां' धारयिता, तदा तवाऽपूर्वा मोहतस्करमारणशक्तिः शरणगमन-दुष्कृतगर्हा-सुकृतानुमोदनात्रितयमयं त्रिशूलमवाप्य सर्वथा तत्वचिन्तनेन मनसि, सत्यवचनेन वचसि, तपः स्वाध्यायेन वपुषि, बलमाधाय मोहं विध्वंसयिष्यसि. ततः **'मूले विनष्टे न लतावितानम्'** इति नाऽतः परं मोहाऽज्ञानादयस्तव पार्श्वमपि समायास्यन्ति , तदा

च त्वं भवपत्तनप्राकाराकाराणि कर्माणि निवारयिष्यसि।

**पद्याः** धर्म्या या धारणाऽसिः स्थिति-धृति-निशिता, त्वं तया मोहचौरं
सम्यग्दृष्ट्याऽऽद्यऽमूल्याननघगुणमणींश्चोरयन्तं विहन्ता;
निर्मोही ज्ञानवांस्त्वं प्रबलमतितरां कर्मणां वारयेस्त्वं,
प्राऽऽशीर्यस्येति वर्या भुवनगुरुनयैः, स्तौमि तं वाचकेन्द्रम् ।।२८।।

**मूलः२७ रागविषदोष ऊतारतां, जारतां द्वेषरसशेष रे।**
**पूर्वमुनिवचनसंभारतां, वारतां कर्मनिःशेष रे ।।**

**ग.वि.** यदि राग उरगस्तदा तस्य वृद्धिर्विषं, विचेतनत्वं तस्य विपाकस्तं विषं जिनोक्तप्रशमजाङ्गुलीविद्यया समुत्तारयसि द्वेषश्च यदा रागोत्कर्षे निष्फलतावाप्ते तस्याः निमित्तभूतस्य यस्य कस्यापि वधबन्धनतिरस्काराप-माननादिभेदभिन्नः, तस्य रागानुजस्य मोहधूर्तद्वितीयतनुजस्य बलदारु प्रज्वालयसि, मृगेन्द्र-गजेन्द्रोपमितौ तौ राग-रोषौ कदाचित् जीवं मृगं कल्पयतः तयोर्विनाशकं वीतराग-द्वेषवचनं प्रबलं प्रबलतरं प्रबलतमं चेतसि त्वं अष्टापदायिष्यसि, तदा समग्राणि कातररिपूभूतानि कर्माणि विनङ्क्ष्यसि.

**पद्या०** यद् रागेऽहीनरुपे विषमविषमये, जाङ्गुलीमन्त्रभूतं,
प्रद्वेषो जन्तुजाते ज्वर इति विषमस्तत्र पीयूषपोषम्;
प्रध्वस्ताऽशेषदोषाऽऽदिमुनिपवचनं, संस्मरन् शान्तचेताः,
कर्मध्वंसं विधाता त्वमिति यदुदितं, स्तौमि तं वाचकेन्द्रम् ।।२९।।

**मूलः २८ देखीअे मार्ग शिवनगरनो, जे उदासीन परिणाम रे ।**
**तेह अणछोडतां चालीअे, पामीअे जिम परमधाम रे ।।**

**ग.वि.** यदा त्वं संसारकारणे मोहे, तत्फलमये राग-द्वेषे, तद् विकारप्रकारांश्चतुरः कषायान् दूरतस्त्यक्त्वा भवे भावत औदासीन्यं प्राप्नुयार-थवौदासीन्यमेव शिवपुरमहाध्वानमध्यास्य, नयनयनोद्घाटनतस्शिवपरिपन्थिन-मतिक्रम्य, शिवपन्थानं सम्यगधिगम्य प्रान्ते परमसुखमयं शिवनगरमध्यासिष्यसे.

**पद्या०** यस्ते संसारभावे कमलदलसमं, साम्यभावात् प्रकृष्टौ,
दासीन्यं जायते तच्छिवनगरमहाऽध्वाऽऽप्तिरेवास्ति भोः भोः;

नित्यं संश्रित्य तं त्वं परममधिगतो धाम, सौख्यं परं स्या-,
देवं य: सौख्यधामा प्रतिपदमवदत्, स्तौमि तं वाचकेन्द्रम् ।।३०।।

**मूल:२९ श्री नयविजयगुरुशिष्यनी शीखडी अमृतवेल रे ।**

**अेह जे चतुर नर आदरे, ते लहे ''सुजस'' रङ्गरेल रे ।।**

**ग.वि.** भवाटवीमध्ये गहनभ्रान्तिगह्वरे, गाढाज्ञानतोऽपमार्गे बम्भ्रम्यमाणेभ्योऽस्मादृग्भ्योऽसुमद्भ्यो महोपाध्याया: परमदयालुतया स शान्तरसोपदेशामृत पावनपानप्रान्ते 'अमृतशीखडी' सुधोपमोपदेशमयं स्वाध्यायं प्रदत्तवन्त: स्वयं तु नयविजयाभिख्यामलङ्कारयितृणां नयविजयगुरूणां सुशिष्या: सन्ति परांश्च नयविजयवतां श्रीमदर्हतां भगवतां सुशिष्यत्वं प्रापयितुकामा: अध्यात्मरसपोषणक्षमाममृतवेलां सुस्वादिकां सुखादिकां सुश्राव्यां सुशिक्षां समुपदिशन्ति तस्या: फलं तु स पुमान् सचेतन: योऽमृतवेलसज्झायं स्वस्वान्ते समादृत्य संस्थाप्य विहरति, स जगति सुयशोरङ्गरेलिम् संप्राप्स्यति। एवं लघुरपि 'सज्झाय' स्वाध्याय: प्रवरप्रज्ञया महोपाध्यायवर्यै: श्रीमद्भि**र्यशोविजय**गणिभि: देशीभाषायां सरलपदैरतीव सफलतामानीत:

**पद्या०** कर्मक्ष्वेडाप्रणा**शेऽमृत**मिव सफलां, वल्लरीं मोक्षदक्षां,
मोक्षाख्याऽपूर्वपूर्या: भवगहनवनेऽध्वानमीक्षा यदा चेत्;
श्रीमान् धीमान् पुमान् यो नयविजयगुरो:, शिष्यतोऽवाप्य शिक्षां,
लब्धा धीलब्धिमत्सु प्रवचनपटुता, वर्णवादं **यश:** सद् ।।३१।।
श्रीमज्जैनेन्द्रदृष्टेरमृतसमवच:, सिञ्चति प्रौढशैक्षे,
सन्न्यायोक्त्या पवित्रं नयविजयगुरु:, सद्यशोधामनामा;
न्यायाचार्य: प्रणीयाऽनयविनयगुरु: सद्यशोधामग्रन्थान्,
स्तुत्वा तं धीप्रधानं विविधबुधजने, सिञ्च जैनेन्द्रतत्त्वम् ।।३२।।
साताऽसातादिवाताऽप्रतिहतविरतानात्मसातप्रसक्तान्,
स्वस्थांश्चित्ते च वृत्ते जिनवचनरते:, श्रद्धया जैनवृत्त्या;
जीवाऽहिंसाप्रधानं जिनसमयममुं, वेत्ति योऽवेदयद् द्राक्,
मुग्धानां बोधहेतो: सरलतरगिरा, स्तौमि तं वाचकेन्द्रम् ।।३३।।

# सम्मीलनम्

(अवधूत-श्रीआनन्दघनजी-
उपाध्यायश्री यशोविजयमहाराजयो:)

**-राजेन्द्र एस. संघवी**

''१८'' तमम् वैक्रमीयम् शतकम् प्रभुभक्तश्रमणश्रेणीनाम् सद्‌युग इति कथन मयुक्तन्न, अस्मिञ्शतक आत्मानन्द्यवधूतश्रीआनन्दघनमहाराज:, पूज्या नयविजयप्रवरा:, उपाध्यायश्रीयशोविजयवाचका:, पूज्यदेवचन्द्रमहाराजाद्यनेके महापुरुषा एतत्पृथ्वीतलम् प्रभुभक्त्याऽप्लावयन्।

अधिकोकिलनिनादम् ''रसत्वम्'' तु सहजमेव किन्तु तस्मिन् यदा आम्रकलिकाया: स्वादो मिलेत् तदा तदीयकण्ठस्तु प्रकर्षरसवान् भवत्येव। तथैवै-तेषाम् महापुरुषाणाम् हृदि भक्तिलीनता तु सहजैव तत्रापि यदा प्रभुदर्शनं प्रभुमीलनं वा भवेत् तदा त्वेषा भक्ति: मर्यादाया: सीमानमतिक्रामति ।

साम्प्रतम् गीयमानानाम् त्रिचतुर्विंशतीनां स्तवनानामुत्पत्ति: ''१८'' तमे शतके जातैरेतै: पुण्यात्मभि: भूतवती !

**उपाध्याय श्री यशोविजय-आनन्दघनजी महात्मनो: प्रथमम् मीलनम्-** उपाध्यायश्रीयशोविजयमहाराज:, आनन्दघनप्रवराणां दर्शनार्थं गुजरातं परिहृत्य मरुभूमावायातवान् । मरुभूमिस्तु महायोगिन: कर्मभूमि: तेषामुरस्त-अद्‌भुतानाहतनादास्त्वत्रत्यगिरिकन्दरासु प्रसृतवन्त: ।

अर्बुदगिरि-मेडतामध्यस्य गिरिप्रदेशस्तु तेषामात्मयोगिनाम् पदार्पणस्य पवित्रतायास्साक्ष्यासीत्!

उपाध्यायशोविजय मेडतानगरे प्रविवेश, पूज्यानन्दघनमहाराजस्तत्रैवासीत् तथापि तेषाम् विरक्तजीवनस्य क्षणा: मेडताया अज्ञाता आसन्। कोपि कथयितुं नालं भवति यदवधूतोऽयमद्य कुत्र भविष्यति?

चेदद्य तेषाम् दर्शनम् सञ्जायते तर्हि तत्पश्चात्तु त्रिचतुराण्यहानि तदीयदर्शनन्दुर्लभम्भवेत्।

उपाध्यायप्रवराणां विद्वत्ताप्रशस्तिस्तु सर्वत्र विख्यातैव। अतो मेडतासङ्घस्तान् पूज्यान् तत्र स्थिरतार्थम् विज्ञप्तवान्। ते पूज्या अपि तत्र स्थिरीभूता: यतस्त अवधूतवर्यान् सञ्जिगमिषव एव।

एकदोपाध्यायवर्या योगस्यैकश्लोकमाश्रित्य व्याचख्यिवांस:, योगस्य सामान्यजनागम्यप्रदेशस्यैषानुभववाग् बहुजनेभ्यो नूत्नैवासीत्, एकश्लोके ऽनेकानि तत्त्वानि दर्शयितुरुपाध्यायवर्यस्येयम् विद्वत्ता मेडतासङ्घाय महदाश्चर्यकरी बभूव।

प्रवचनपूर्णतावसर उपाध्यायवर्येण सर्वतो दृक् क्षिप्ता, श्रोतॄणाम् मुखकमले प्रवर्तमानाहोभावधाराज्ञायि, सभायां चतुर्विधस्सङ्घ उपस्थित आसी दधिश्रमणसङ्घम् वयौवृद्धैकश्रमणनेत्रकमलमहोभावधाराभावुकन्न बभूव, तादृशी प्रसन्नतापि तदीयमुखकमले न समज्ञायि।

उपाध्यायप्रवरैरचिन्ति पक्वघटे नूत्नाग्रीवाऽसम्भविनी, वृद्धत्व एव अयम्मुनिस्संयमं गृहितवानतो योगगूढतत्त्वेऽसौ श्रमण: किम्बुध्येत? ते पप्रच्छु: भो: स्थविर! किमपि तत्त्वमवगतन्नवा? अयं श्लोक: योगस्यास्ति।

वृद्धमुनिनाप्युक्तम्- विद्वत्त्वम् भिन्नम्, योगोऽपि भिन्न:, अध्ययनेन विद्वान् भवेत् किन्तु योगबोध: तदीयप्रभावकता तु केवलमनुभवगम्यैव, सोऽनुभव स्त्वन्तर्लीनेनैवानुभूयते।

वृद्धश्रमणवाक्छ्रवणेन सर्व एवोदुरयन्तु ''आनन्दघनजी'' एतम् विना एवङ्को भाषेत?

सर्वेषां दृष्टि: प्रत्युपाध्यायप्रवरमेवाभवदतोऽवधूत: कदायातवान्, कदा च मुनिवृन्द उपविष्टवान् इति न कैरपि समबोधि!

''आनन्दघन'' इति नामश्रवणत एवोपाध्यायवर्यो व्याख्यानपीठतोऽवततार,

तेषामानन्दो निरवधिः सञ्जज्ञे, महद्विहारयात्रातीर्थम् सहसैवोपलब्धमिति। सरोमाञ्चम्, सगद्गदस्वरम् विज्ञप्तिश्चकार-

योगमहाब्धितलम् निमज्ज्य, देदीप्यमानरत्नानि लम्भक! योगमहाब्धि-तरणशील! ''आनन्दघनमुनिप्रवर! अथास्मिन् श्लोके भवान् विवर्णयत्विति!

अध्युपाध्यायमानन्दघनमुनेरपि सद्भाव आसीदेतद्दर्शनञ्च प्रथमम्, एतस्य ज्ञानमयव्यक्तित्वेन सहानुस्यूतैतावती नम्रतापि कल्पनातीतातोऽस्योपाध्यायस्य हृत्प्रार्थना कथमपसार्येत ?

सङ्घस्याप्येषा विज्ञप्तिरुपाध्यायप्रवर! एतावति काले व्यतीते सत्यप्यवधूतगिरम् वयं न शुश्रुम, भवतः प्रार्थनाम् त्विमे महामनसोऽवश्यम् स्वीकरिष्यन्त्येव!

आनन्दघनमुनिप्रवरा अधिव्याख्यानपीठमासितवन्तस्तेषां पार्श्व उपाध्यायवर्या अपि व्यराजन्त। योगज्ञानयोरदोऽभूतपूर्वम्मीलनम् मेडतासङ्घायापि नव्यमेवाबो-भवीत्।

आनन्दघनयोगिनोऽनुभवगिरो वीणानादे सर्वेषां मनोमृगास्तल्लीनाः सञ्जज्ञिरे-

ब्रह्मरन्ध्रं किम्, अनाहतनादः कः?, चक्रभेदः किमुच्यते, कुण्डलिन उत्थानम् किम् ?, प्राणायामस्वरुपम् किम्?, आत्मसाक्षात्कारपुण्यक्षणानुभूतिः कीदृशी ?

इति आनन्दघनयोगीश्वरस्यानुभववाक्त एतादृशान्यगम्यतत्त्वानि प्रज्ञाय उपाध्यायाश्चिन्तयामासिवानिदं- मम योगप्रवासस्तु श्लोकस्योपरितनभूमावेव किन्त्विमे महायोगिनो योगतले पर्यंकासनम्बद्वा रत्नराशिमानीय शिखरतले-ऽप्याजग्मुः, तदा न केवलमेकं व्याख्यानम्, किन्तुं योगस्यान्तरतत्त्वस्पृक्-प्रवासस्सम्पन्नः, आनन्दघनश्च किमप्यभिगिरिगुहम् चेलिवान्।

विद्युदिव सहसागतो महायोगी सहसैवादृश्यीभूतोऽध्युपाध्यायहृद् द्विधोत्पन्ना, बिन्दु तु प्रापि तस्यानन्दमनुभवेयमुताखिलाब्धिस्सम्पद्येत तादृक्सुवर्णक्षणः हस्ततलतोऽपासरत् तस्य विषादमनुभवेयम्! इति!





**प्रकाशकम्**

**जगद्गुरु पू.आ.श्री**

**विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**

**पालडी-अहमदाबाद**



Matiksha
M.: 9820715236